कृष्णीयं

कृष्णीयं

(चतुरसुन्दरी व्याख्यः)

कृष्णीयं

श्री कृष्णाचार्यरचितं कृष्णीयं

प्रथमोध्यायः

येन त्रैकाल्यभवं समुदितमज्ञानतिमिरवर्तिभ्यः
तत् ज्ञानं दिव्ययुतं वक्ष्ये तस्मै नमस्कृत्य ।। १

चतुरसुन्दरी व्याख्या :-

नत्वा त्रिकालतत्वज्ञं सर्वज्ञं क्रियते मया

व्याख्या कृष्णीयशास्त्रस्य नाम्ना चतुरसुन्दरी ।।

येन त्रिकालज्ञानदर्शिना भवेन यत् त्रैकाल्यज्ञानं ज्योतिर्ज्ञानं सम्यक् उक्तं तस्मै नमस्कृत्याज्ञानतिमिरवर्त्तिभ्यो मनुष्येभ्यस्तत्ज्ञानं दिव्ययुतमहं वक्ष्यामीत्यर्थः। अयमिष्टदेवता प्रणाम प्रतिपादक।।

ज्योतिषफलमादेशः फनार्त्थमारंभणं भवति लोके
तस्माद्यत्नः कार्योह्यादेशे ज्योतिषज्ञेन ।। २

ज्योतिषफलमादेश उच्यते। आदेश उच्चारणं। धर्म्मादि चतुर्वर्गाश्रित उपयोगः फलमित्युच्यते। यतस्सर्वेषां कर्म्मणामारंभणं फलार्त्थं भवति हि नियमेन लोके तस्मादादेशे यत्नः कर्त्तव्यो ज्योतिषज्ञेन पुरुषेणेत्यर्थः ।।

नवभिर्नवभिरथांशैर्निष्पन्ना राशयो दश दौ च
अश्विन्याद्यंशाद्यैः पौष्णान्त्यांशकैः क्रमशः ।। ३
मेषवृषमिथुनकर्क्कटसिंहाः कन्यातुलाश्वकीटनिभाः
धन्वी मकरः कुंभो मीनाविति संज्ञिता मुनिभिः ।। ४

अनेन राश्यंशकानाह (राशयोद्वादशः) ते ऐकैकशः नवभिर्नवभिरंशैर्निष्पन्ना प्रतिपादिताः। अथ अश्विन्यादिसप्तविंशतिनक्षत्राणि द्वादशराशिषु विन्यस्य प्रथम राशावाद्यंशमश्विनीप्रथमांशं च संयुज्य मीनराशावन्त्यांशं पौष्णान्त्यांशं च संयोजयेत्। अश्विनीनक्षत्राद्यंशाद्यैरंशकैः पौष्णान्त्यांशान्तैः क्रमान्नेतव्या राशयः। तत्र प्रथमांशः स एव। द्वितीयांशो द्वितीयराशिः। एवं द्वादश राशयो नेतव्याः। पुनः पुनरेवं प्रथमराश्यंशमारभ्य मीनान्ता नेतव्याः। अष्टोत्तरशतसंख्या नवांशकास्ते राशय। चकारादेकैकशो द्वादशांशो द्वितीय राशिः। एवं सर्वेषु राशिषु तद् राश्यादिना द्वादशतमराश्यन्तेन नेया अंशकाः।

अथ राशिनामान्याह-प्रथमराशिर्मेष। द्वितीयो वृषभः। तृतीयो नरमिथुनं। चतुर्थः कर्क्कटकः। पञ्चमः सिंहः। षष्ठः कन्या। सप्तमस्तुलाहस्तः पुरुषः। अष्टमः कीटः। नवमो धन्वी पुरुषः। मकरो मकरः। एकादशो घटहस्तः पुरुषः। द्वादशो मत्स्ययुगळं। एते राशयः स्वैस्स्वैर् गुणनामभिः मुनिभिः संज्ञिताः पठिताः।।

कुजभृगुबुधशशिरवयो बुधभृगुभौमाङ्गिरो(अ)र्क्कपुत्राश्च
मन्दो गुरुरित्यधिपा राशीनामंशकानां च ।। ५

अथ राश्यंशकाधिपानाह-भौमशुक्रबुधशशिरविसौम्यभृग्वारजीवसरिमन्दगुरवो मेषादि राशीनां मेषाद्यंशकानां चाधिपतयः क्रमेण इति।।

पुरुषो(अ)ङ्गनाचरस्थिरमूर्तिद्वयसंयुताः पुनस्सर्वे
भीन्नास्त्रिद्रेक्काणैस्तेषां पतयः प्रपन्नेशाः ।। ६

अथ राशि स्वभावमाह - ते राशयः क्रमाल् पुरुषस्त्रीसंज्ञा भवन्ति। मेषः पुमान्। वृषभः स्त्री। एवमेवौजराशयः सर्वे पुरुषाः युग्माः स्त्रियः। ते चैव क्रमाल् चरस्थिरोभयाः। मेषवृषमिथुनास्सकेन्द्राश्च राशयः सर्वकालं सञ्चरन्ति। स्थिरराशयः सर्वत्र स्थिताः। द्विरवाभावा उभयेन वर्त्तन्ते। पुनस्सर्वे राशयस्त्रिभिर्द्रेक्काणैर्भेदिताः। तेषां द्राक्काणानां अधिपतयः प्रथमपञ्चमनवमराश्यधिपतय इति।।

क्षितिसुतरविगुरुसौरा भृगुबुधभार्गवशनैश्चरास्सबुधाः
सोमाङ्गारकजीवा द्रेक्काणगणेश्वराः प्रोक्ताः ७

अथ द्रेक्काणनाथक्रमाह मेषवृषमिथुनकर्क्कटद्रेक्काणानां क्रमाल् कुजरविजीवमन्दशुक्रबुधशुक्रशनिबुधशशिकुजजीवाः अधिपतयः तेषां त्रिकोणयोरप्येवमेवकथयेत्।।

भूमिष्ठं स्थिरचक्रं चरति तथाकाश एव चरचक्रं
चक्रद्वितयेन फलं प्रश्नादौ पृच्छतां वाच्यं ।। ८

अथ राशिचक्रप्रकरणमुच्यते - द्विविधं चक्रं, स्थिरचक्रं, चरचक्रं चेति। यदि बहुप्रश्ने प्रष्टा प्रश्नं पृच्छति चेत् स्थिरेण वदेत्। तद्वदेवान्तर्गृहगतः पृच्छति चेत् स्थिरेण मुष्टिं वदेत्। स्थावरादौ तेनैव। स्थिरद्रव्यादौ तेनैव। शयितः पृच्छति चेत् तेनैव। कर्म्मावसाने रात्रौ च तेनैव वदेत्। एवमन्यत्रापि स्थिरभावे स्थिरचक्रेण वदेत्। आरूढेनेत्यर्थः। तत्र यदि चरन् पृच्छतितर्हि चरेण वदेत्। अर्क्कलग्ने तेनैव। बहुग्रहयुते लग्ने तेनैव। चरद्रव्ये तेनैव। विद्वान् पृच्छति चेत् तेनैव। एवमन्यानि लक्षणानि ज्ञात्वा चरभावे चरचक्रेण वदेत्। उदयेनेत्यर्थः। तत्र यदृच्छया यः प्रश्नं पृच्छति तस्य न वदेत्, रिक्तपाणेश्च, निन्दायुक्तस्य, तद्वन्नास्तिकस्या, तद्वत् पथिकस्य, तद्वत् प्रस्थितस्य, तद्वद्यः सन्ध्याकाले मूत्रपुरीषोत्सर्ग्गे यथेष्टं पृच्छति तस्य च प्रश्नफलं न वक्तव्यं। तत्र संभाषणं कर्त्तव्यमेव। मणिकनककुसुमान्याहृत्य ग्रहपूजार्त्थं शुभदिवसे ज्योतिषिकमुपेत्य विनयेन यथेष्टं पृच्छेत् ततः सर्वं साध्यते।।

ईदृग्विशिष्टो ज्योतिषिकः -

विद्वान् महामन्त्रसिद्धिक इति मन्ये सो(अ)पि निर्द्दिष्टः

स्वाध्वायी ग्रहपूजायां रतो(अ)नलसको द्विजः

स्रग्वी नासत्यवादी स्यात्तेनोक्तं न मृषा भवेत् ।।

ततः समभूमौ शुचौ स्थिरचक्रं संस्थाप्य राशिचक्रं सनक्षत्रं सग्रहं संपूज्य शुभाशुभलक्षणानि कथयेत्। उदयारूढयोर्बलयुतेनेत्यर्थः।।

आत्मार्थ सहज बान्धवतनयारिकळत्रनैधनानि पुनः
धर्म्म क्रियायनिर्गम भावा होरादिषु ज्ञेयाः ।। ९

अथ मूर्त्त्यादिषु द्वादशराशिषु द्वादशभावानाह - होरेतिलग्नं। लग्नं मूर्त्तिः शरीरं प्रथमराशिः। द्वितीयो(अ)र्थः। तृतीयो भ्राता। चतुर्थो बन्धुः। पञ्चमः पुत्रः। षष्ठः शत्रुः। सप्तमो भार्या। अष्टमो निधनं। नवमो धर्म्मः। दशमः कर्म्मभावः। एकादशो लाभः। द्वादशो व्ययः। एते द्वादश भावाः। यस्मिन् भावे तद्राश्यधिपतिर्बलयुतः स भावो(अ)स्तीति वक्तव्यं। शुभग्रहयुते शुभमिति वदेत्। क्रूरयुते(अ)शुभं वदेत्। बहुग्रहयुते बहुविधं फलमिति वदेत्। राश्यधिपतिः शुभग्रहो वा शुभफलं करोति। पापग्रहो वा मूढो वा पापफलं करोति। धनस्थानाधिपतिर्लाभस्थश्चेद् अर्त्थसिद्धिर्भवति। लाभाधिपतिर्धनगतश्चेल्लाभं वदेत्। धनस्थानेन पूर्वं यद्धनमस्ति तद् वदेत्। यद् राश्यधिपतिर्लग्नगतस्तद् राश्युक्तफलं तत्रैव भवति। यदि पुत्रस्थानाधिपतिर्लग्ने तदासन्ने वा स्थितः तदा स्वल्पेन कालेन पुत्रसिद्धिः। दूरस्थे चिरकालात्। एवं द्वादश भावान् कथयेत्। पुत्रस्थाने यावन्त आस्थिता ग्रहाः, यावन्तः पश्यन्ति क्रमाल् तावतः पुत्रान् वदेत्। शत्रुनीचराशिस्थितैर्मरिष्यति। एवमेव भ्रातॄन् वदेत्। अन्यान् भावांश्च वदेत्।।

अथोदयराशिना आरूढेन वा द्वादशभावान् प्रति द्वादशसंवत्सरान्तं कालनिर्ण्णय उच्यते - लग्नारूढच्छत्राणामेकस्य नामान्यस्य वर्त्तते। लग्नवदुदितो भवत्यारूढराशिः। छत्रं च लग्नवदुदितं तल् पुनर्वक्ष्यामि। उदयगतराशिं ताल्क्कालिकं कृत्वा यावल् प्रमाणमुदितं ताल्क्कालिकं स्फुटलग्नं द्वादशराशिषु लग्नवदुदितं कृत्वोदितेषु द्वादशांशकेषु ग्रहयुतेषूदितद्वादशांशादुल्क्रमेण यतिर्मेशे ग्रहस्थितस्ततिमे वर्षे स भावश्चाभवदिति वदेत्। उदितेंशे ग्रहयुते तस्मिन् संवत्सरे भवति। अनुदिते ग्रहेंशसमे संवत्सरे भविष्यतीति वदेत्। द्वादशसंवत्सरादतीते भावे तद्भावाधिपतिरुदितांशाद्यतिर्मेशे स्थितस्ततिमे वर्षे भवेदिति वदेत्। दृश्यभावगतश्चेदेवं लक्षणं। उदितराशिषु स्थित इत्यर्थः। अनुदितेषु स्थितश्चेद् भविष्यतीति वदेत्। एवमंशाधिपति स्थितनवांशेन वा वदेत्। बलयुतेनेत्यर्थः। एवं दर्शनेषु वदेत्। यमंशकं ग्रहः पश्यति तदंशाधिपतिस्थितांशेन वक्तव्यं। ग्रहस्थितांशाधिपतिना बलयुतेनातीतकालं भविष्यत्कालं वा वक्तव्यं। तत्र यदि पुत्रस्थानगतश्चेद् भौमः पुत्रमरणं करोति। एवं कळत्रादिषु ज्ञेयं। तत्र पुत्रस्थानाधिपतिः भ्रातृगतश्चेत् पुत्रो भ्रातृवदाचरति। एवमेव सर्वभावेषु ज्ञेयं। यद्यद् भवाधिपतिः षष्ठव्ययाष्टमेषु स्थितः तस्य भावस्य नाशव्ययरोगान् वदेत्। यस्मिन् भावे शुभग्रहः स्थितः तस्य शुभत्वं लाभश्च वदेत्। एवं निरीक्ष्य प्रवक्तव्यं। षष्ठस्थितः पापः शत्रुविरोधं करोति। शुभश्चेत् तन्नाशं करोति।।

मूर्धास्यगळस्कन्धा हृदयोदरवस्तिदेशगुह्यानि
ऊरू जानू जंघे पादौ चेत्यंगविन्यासः ।। १०

अथ स्थिरचक्रान्यासमाह शरीरस्य - यदि संशयाल्लग्नं ज्ञायते तदंगस्पर्शने लग्नविज्ञानार्थमाह - मेषः शिरः। वृषो मुखं। कण्ठो मिथुनं। स्कन्धः कर्क्कटकः। हृदयं सिंहः। उदरं कन्या। तौलिर्वस्तिश्शिश्नौ। गुदं वृश्चिकः। ऊरु धनुः। जानू मकरः। जंघे कुंभः। पादौ मीनः। एवमंगविन्यासः।।

राशेः पूर्वार्द्धं वामभागः अपरार्द्धं दक्षिणभागः। अत्र शुभग्रहयुक्तं शुभं पापग्रहयुते रोगं वदेत्। प्रश्नकाले यं राशिं स्पृशति तेनापि फलं वदेत्।।

होरोत्तमांगसंस्था दक्षिणवामावनागतातीतौ
कर्ण्णाक्षिनासिकापुट कपोलहनवो(अ)थ वक्त्रान्ताः ।। ११

अथ चरचक्रविन्यासमाह - उदित - राशिः शिरसि स्थाप्यः पूर्वषट्का राशयो दक्षिणभागस्था अपर षट्का वामभागस्थाः उदितानुदिता राशयो वामदक्षिणभागस्था इत्यर्थः। एतेषां स्थानानि - मूर्द्धा लग्नं। द्वितीयद्वादशौ कर्ण्णौ। तृतीयैकादशौ नेत्रे। चतुर्थदशमौ नासिकापुटौ। पञ्चमनवमौ कपोलौ। षष्ठाष्टमौ हनू। सप्तमो वक्त्रं इति। लग्ने प्रथम द्रेक्काणोदये शरीरस्योर्ध्वभागो ग्राह्यः। द्वितीय द्रेक्काणे मध्यभागः तृतीय द्रेक्काणे अधोभागः। तत् उच्यते।।

ग्रीवांसभुजौ पार्श्वे पृष्ठे हृदयोदरे कटिश्चान्त्या
नाभिर्वस्ति गुदाण्ढा मुष्कावूर्वादयो द्वौद्वौ ।। १२

मध्यद्रेक्काणोदये उदयराशिं गळे संस्थाप्य उदितानुदितराशयो वामदक्षिणभागस्थाः। असंभुजौ द्वितीयद्वादशौ। तृतीयैकादशौ पार्श्वे। चतुर्थदशमौ पृष्ठे। हृदये पञ्चमनवमौ। उदरे षष्ठाष्टमौ। कटिः सप्तमराशिः। एवं द्वादश राशीन् न्यस्य योजयेत्।।

अथान्त्यद्रेक्काणोदये उदयगतराशिं नाभौ न्यस्य उदितानुदितान् राशीन् वामदक्षिणयोर्योजयेतत्। द्वितीयद्वादशौ वस्तिः। तृतीयैकादशौ अण्डमुष्कौ। चतुर्थदशमौ ऊरु। पञ्चमनवमौ जानु। षष्ठाष्टमौ जंघे। सप्तमः पाद इति।।

ऊध्वमुखे ऊर्ध्वभागः, तिर्यङ्मुखे मध्यभागः, अधोमुखे अधोभागो ग्याह्य इति केचिल् वदन्ति। यो द्रेक्काण राश्योर्बलयुतस्तेन भागो ग्याह्यः। अत्र देहन्यासे यस्मिन् राशौ शुभग्रहः स्थितः तस्मङ्गंगे शुभभूषणलक्षणानि वदेत्। बहवः शुभाः सन्ति चेत् नियमेन वदेत्। यस्मिङ्गंगे पापः स्थितः तत्र व्रणलक्ष्मक्षतानि वदेत्। स्थिरराश्यंशकवशात् स्थिराणीति वदेत्। अस्मिन् प्रकरणे पिटकविषामृतकाले ज्ञेये। अशुभयुतैः किणपिटककुष्ठविसर्प्पकादींश्च वदेत्।

शीर्षं वदनग्रीवावक्षोहृदयोरुजान्वधोभागाः
मेषाद्यधिपांगानि व्रणभूषणलक्ष्मकाद्यत्र।। १३

अथ ग्रहाणां स्थिरांगविन्यासमाह। भौमस्य शिरः। शुक्रस्य मुखं। बुधस्य कण्ठः। वक्षश्चन्द्रस्य। हृदयं सूर्यस्य। ऊरु जीवस्य। जानू मन्दस्य। तदधो भागः सर्पस्य। बलयुतेन ग्रहेणांगस्य दृढादृढत्वं ज्ञेयं। एषु स्थानेषु व्रणभूषणलक्ष्मकादीनि वदेत्।।

मूर्द्धा नयने श्रवणे नासा वदनं हनुः पुनश्च हनुः
सौरावनेय गुरुभृगुबुधरविशशिनां त्रिधा गतयः ।। १४

अथ चरचक्रांगविन्यासमाह। पूर्ववद् द्रेक्काणैः शरीरभागेषु त्रिषु ग्रहः अपि स्थापनीयाः। द्रेक्काणस्य द्विधा भागं कृत्वा पूर्वभागे ग्रहे स्थिते वामभागो ग्राह्यः। उत्तरे दक्षिणः। ओजयुग्मराशिवशादिति केचित् वदन्ति। एवं पूर्वोक्तन्यायेन मध्यभागो(अ)धोभागश्च ग्राह्य इति।।

मेढ्राग्रशिरस्कन्धा यमस्य कर्णौ गुरोर्विनिर्दिष्टौ
असृजो बाह्वक्षिगुदाशुक्रस्य तु नासिकाग्रपुटौ ।। १५
हनुजानुनाभयः स्यू रवेश्शशाङ्कात्मजस्य पृष्ठोरु
वक्षः कपोलजंघाश्चन्द्रक्षेत्रं वदन्त्यन्ये।। १६

अथ पक्षान्तरेण ग्रहांगविन्यासमाह - ग्रहस्थितद्रेक्काणवशादूर्द्ध्वभागादारभ्योक्तेषु स्थानेषु ग्रहाः स्थापनीयाः इति केषाञ्चिल्पक्षः। केन्द्रेषु ग्रहयुक्तेषु स्वदिशि स्थितेन ग्रहेण शुभाशुभलक्षणानि वदेत्।।

ननु बहुप्रकारं राशिग्रहन्यास उक्तः। तस्मिन् विषये केन कथ्यते। मूर्धास्य, शीर्षवदन इति श्लोकद्वयं राशिज्ञानार्थं ग्रहज्ञानार्थञ्चाह। होरेति श्लोकद्वयेन प्रश्नजातकादिषु राशिग्रहयुते(अ)ङ्गे व्रणभूषणाद्युक्तं। मूर्द्धा इत्यनेन ग्रहबलादुक्तं यल्लक्षणं शरीरे(अ)स्ति तत् पूर्वोक्त राशिग्रहवशान्न ज्ञायते चेत् तत्र केषाञ्चिन्मतेन वदेत्. यस्मिन्नंगे त्रयः पापास्तिष्ठन्ति तत्र भंगशल्यलक्ष्मादीन् नियमेन वदेत्। यस्यांगस्य त्रिविधोक्तलक्षणं संभवति तत्र पापास्तिष्ठन्ति तत्र किणविचर्च्चिकादीन् वदेत्। यदंगं बहुप्रकारेणैकस्य पापस्य भवति तत्र पापास्तिष्ठन्ति चेत्तत्र नियमेन कुष्ठ विकृतादीन् वदेत्। एवं शुभेषु श्री भूषणालङ्कारादीन् वदेदिति होराचार्यमतं।।

उद्यन्त्यजमकरवृषाः कुळीरचापौ च पृष्ठतस्सर्वे
तिर्यङमत्स्यौ ज्ञेयौ शेषाश्शिरसोदयं यान्ति ।। १७

अथ राशीनां पृष्ठोदयादि विभावमाह - अजो मेषः। मेषमकरवृषभकर्क्कटचापाः पृष्ठत उद्यन्ति। पृष्ठोदया इत्यर्थः। उत्स्यौ पृष्ठतः शिरसा चोदितः। शेषा राशयः शिरसा उदयं यान्ति। मिथुनसिंहकन्यातुलावृश्चिककुंभाश्शेषाः। सर्व्वेषु भावेषु चिन्तनीयाः पृष्ठशीर्षोदयाः।।

पृष्ठोदयेषु सिध्यत्यशुभं मूर्द्धोदयेषु शुभयुक्तं
उभयोदये विमिश्रं ग्रहरहितेभ्यः फलं वाच्यं ।। १८

तेषां फलं - पृष्ठोदयेषु सित्यत्यशुभं। वधरोगबन्धमरणहानिषु यद्यत् पृच्छति तत्तत् भवतीति प्रष्टुर्वदेत्। मूर्द्धोदयेषु यद्यच्छुभं पृच्छति तत्तत् भवेति। उभयोदये विमिश्रं वदेत्। ग्रहरहितेभ्यो राशिभ्यः एवं वदेत्। ग्रहयुक्तेभ्यो(अ)पि ग्रहवशाद् वदेदिति।।

युक्तप्रमाणकायाः कुळीरमृगमकरमिथुनचापाह्वाः
ह्रस्वाः कुंभझषाजा वृषश्च शेषाः पुनर्द्दीर्घाः ।। १९

युक्तप्रमाणकायाः कर्क्कटमकरमिथुनचापाः। न चाति ह्रस्वा न चातिदीर्घा। कुंभमीनमेषवृषाः ह्रस्वाः। सिंहकन्यातौलिवृश्चिकाः शेषा दीर्घाः।।

चतुरश्रौ रविभौमावायतवृत्तौ गुरुर्बुधस्त्र्यश्रः
आयतचतुरश्रांगौ भुजगेन्द्रशनैश्चरौ ज्ञेयौः ।। २०

चतुरश्रौ रविभामौ। चतुष्कोणौ रिवकुजौ। दीर्घवृत्तो गरु बुधस्त्रिकोणः। दीर्घचतुरश्रदेहौ शनिराहु।।

इन्दुर्मण्डलगात्रो दैत्यामात्यो(अ)र्द्धवृत्तचित्रांगः
द्रव्याभरणोपस्करभोजननष्टादयो ग्राह्याः ।। २१

इन्दुश्चन्द्रो वृत्तशरीरः। भृगुर्वृत्तार्द्धदीर्घचित्रांगः। एतैर्ग्रहैः प्रयोजनं नष्टद्रव्याणि च, आभरणानि च, भोजनपात्राणि च मुष्टिचिन्ताश्च ग्राह्याः। केन्द्रगतैर्ग्रहैर्वाच्याः। यदि केन्द्रे बहवो विद्यन्ते तदा स्वदिशिस्थितो ग्राह्यः। स नास्ति चेत् सप्तमराशिगतो ग्राह्यः। केन्द्रे ग्रहो नास्ति चेत् त्रिकोणयोर्गतो(अ)पि ग्राह्यः। मुष्टौ सप्तमगेन वा लग्नगतेन वा रहस्योक्तं द्रव्यं ग्रहांगाकारं वदेत्, आभरणेष्वपि।।

शशियमकुजभुजगेन्द्रा ह्रस्वा रविभार्ग्गवौ च मध्यतनू
गुरुचन्द्रसुतौ दीर्घौ ग्रहवच्चैषां वदन्त्यन्ये ।। २२

चन्द्रशनिकुजराहवो ह्रस्वाः, रविभार्ग्गवौ मध्यतनू, गुरुचन्द्रसुतौ दीर्घौ। ग्रहवद्ग्रहाणां राशय इत्यन्ये आचार्या वदन्ति।।

ह्रस्वः पृथुमधुनेत्रो रक्तश्यामः कृशो(अ)ल्पकेशश्च
पित्तात्मको(अ)स्थिसारः शूरो मूर्खो रविर्ज्ञेयः।। २३

तदनन्तरं मनुष्येषु ग्रहैर्देहाकृतिश्च धातुश्च त्रिदोषं च शीलं च विद्या च सर्वं ज्ञायते। तल्कथमिति चेत् सप्तभिः श्लोकैः आह। एते बलयुता ग्रहाः पूर्वोक्तकेन्द्रत्रिकोणेषु स्थिताः नराणां चिन्ताकाले शरीराणि स्वशरीरसमानि कुर्युः। बहूनां बलसाम्ये तेषामुक्तं सर्वं वदेत्। अथ तत्र चाधिपतिश्चिन्तनीयः। चन्द्रश्चाति

बलस्थो यस्मिन् राशौ स्थितः तत्स्वामिदेहं वा वदेत्। जातके लग्नगेन ग्रहेण वदेत्।।

चन्द्रश्चपलो दीर्घः प्रियवाग्युक्तो मृदुर्घृणी स्वक्षः
स्निग्धो वातकफात्मको गौरः प्राज्ञो रुधिरसारश्च ।। २४
चपलो बालाकारः पित्तप्रकृतिः समज्जासारश्च
वधकस्त्र्यश्रो(अ)वनिजो झषोदरो रक्तगैरश्च ।। २५
दूर्वाकाण्डश्यामो मध्याकारस्सिरातितो हृष्टः
मिश्रप्रकृतिस्सौम्य स्त्वक्सारः श्लिष्टवाक्चापि ।। २६
गौरो मेदस्सारो विशालकुक्षिर् बृहस्पतिर्दीर्घः
ईषद् पिंगळकेशो मध्वक्षः श्लैष्मिको वाग्मी ।। २७
वातश्लेष्म प्रकृतिरधस्तान्निर्म्मार्ज्जितो(अ)क्षिकान्तश्च
शुक्रो विकृष्टपर्वा मधुरवचाश्शुक्लसारश्च ।। २८
वातप्रकृतिस्सौरः पिंगाक्षस्थूलदशननखरोमा
कृष्णो दीर्घः पिशुनो निर्मांसः स्नायुसारश्च ।। २९
एते ग्रहा बलिष्ठाश्चिन्ताकाले नृणां स्वमूर्त्तिसमान्
कुर्यर्देहान्नियतं बहवस्तु समागता मिश्रं ।। ३०

विप्रौ भृगुदेवगुरू क्षत्रियभावौ दिवाकरोर्वीजौ
वैश्या बुधचन्द्रमसौ शनैश्चरः शूद्रसङ्करकृत्।। ३१

अथ ग्रहवर्णानाह। ब्राह्मणौ गुरुशुक्रौ। क्षत्रियौ आदित्यकुजौ। चन्द्रबुधौ वैश्यौ। शनैश्चरः शूद्रः। सङ्करकृत् राहुः। राशिषु मीनमेषवृषमिथुनास्सत्रिकोणाः क्रमाल् विप्रादयः। आदित्यः शुद्धक्षत्रियः। कुजो माण्डलिकः। गुरुः शुद्धब्राह्मणः। शुक्रः क्षत्रियब्राह्मणः। चन्द्रो जातिवैश्यः। बुधः शूद्रवैश्यः। सौरिर्जातिशूद्र अधमः। राहुश्चण्डालः। ग्रहाश्यंशद्रेक्काणवशात् बलयुतात् पुरुषश्चिन्तनीयः। तत्र गुरुः स्वक्षेत्रमित्रस्वोच्चविप्रराशिषु स्थितश्चेत् शुद्धक्षेत्रजातः। दिनराशिषु सूर्यो बलवान्। रात्रिराशिषु चन्द्रो बलवान्। तत्र यदि मन्दो विप्रराशिषु स्थितश्चेत् विप्रपरिचारकः शूद्रः। यस्मिन्नंशे स्थितः तद्राश्युक्तदेशवान् भवति। एवमेव चिन्तनीया ग्रहा इति। यदि क्षत्रिय ग्रहो विप्रराशिषु स्थितश्चेत् ब्राह्मणस्य क्षत्रियया जात इति वदेत्। एवं अप्यन्तरा चिन्तनीयाः।।

क्रूरा रविकुजसौराः सौम्या गुर्वसुरपूज्यशशितनयाः
क्षीणः शशी च पापो बुधो(अ)नुवर्त्तीति भाषन्ते ।। ३२

अथ क्रूरसौम्यग्रहानाह। क्रूरा रविकुजसौराः। एते पापग्रहाः। गुरुशुक्रबुधाः शुभग्रहाः। क्षीणचन्द्रः पापः। शुक्लपञ्चमीमारभ्य यावत् कृष्णपञ्चमी तावत् चन्द्रः शुभः। पापराशिगतो वा पापसहितो वा बुधः पापः। शुभराशौ वा शुभसहितो वा शुभः।।

भृगुशशिजौ राजसिकौ गुरुशशिरवयस्तु सात्विका ज्ञेयाः
तामसिकौ यमभौमौ भावाश्चैते नृणां चिन्त्याः ।। ३३

ग्रहवशात् त्रिविधोक्तान् गुणान् नराणां वदेत्। सात्विकराजसतामसानुत्तममध्यमाधमान् पुरुषान् वदेत्। सुखदुःखसम उत्तमपुरुषः। वधबन्धासक्तचित्त अधमः। रागसाहसयुक्तो मध्यमः। उत्तमाधममध्यमग्रहैः स्वर्ग्गनरकमनुष्यलोकगतिर्ग्रहदृष्टया जन्ममरणेषु बलयुतेन विज्ञायते।।

राशेः पञ्चमनवमौ त्रिकोणसञ्ज्ञौ परस्परं ज्ञेयौ
प्राच्यामजत्रिकोणास्चान्यत्रान्ये(अ)पसव्येन ।। ३४

राशयः प्रथमपञ्चमनवमाः परस्परं त्रिकोणसंज्ञाः। मेषत्रिकोणाः प्राग्वर्त्तिनः। वृषत्रिकोणाः दक्षिणदिग्वर्त्तिनः। मिथुनत्रिकोणाः पश्चिमदिग्वर्त्तिनः। कर्क्कटकत्रिकोणाः उत्तरदिग्वर्त्तिनः। वामभागक्रमाल् प्रदक्षिणावर्त्ता इत्यर्थः। क्षेत्रबलाच्चोराहृतद्रव्यस्थानं, प्रष्टुः स्वगृहस्य द्वारं, प्रोषितदेशञ्च लग्नत्रिकोणराशिभिर् ग्रहरहितैर्वक्तव्यं।।

रविशुक्रभौमभुजगा बलिस्सौरेन्दुसौम्यवाक्पतयः
प्रादक्षिण्यात्पतयः प्राच्यादीनां दिशां ज्ञेयाः।। ३५

बलयुतग्रहोदये एते ग्रहास्सूर्यादयः प्रादक्षिण्यात् प्राच्यादीनामष्टानां दिशां पतयः। एतज्ज्ञातकेषु ग्राह्यं।।

रविकुजसुरगुरुशशिसुतभृगुसुत सौरेन्दुसैहिकेयानां
प्रादक्षिण्येन दिशः प्राच्याद्याः कल्पिताश्चान्यैः ।। ३६

एतेषां ग्रहाणां प्राच्यादिदिशः स्थापिता इत्यन्ये आचार्य वदन्ति। सैहिकेयो राहुः। ये ग्रहाः पश्यन्ति तेषां मध्ये बलवद्ग्रहेण दिग्वाच्या। चोरप्रवासद्रव्यादिषु ग्राह्यं। द्वयोर्दिशोर्यां दिशं प्रतिग्रहो गच्छति सा दिक् तस्य ग्रहस्य वक्तव्या। प्राच्यां दिषु अष्टयमाः कल्पिताः।।

दिक्षु प्राच्याद्यासु द्वे द्वे मेषाच्चरस्थिरे भवने
आग्नेयादिषु यमळा विदिक्षु मिथुनादयस्सव्याः ।। ३७

अथ स्थिरचक्रस्थापनमाह। मेषक्रमाच्चरस्थिरे भवने द्वे द्वे प्राच्याद्यासु चतुर्दिक्षु स्थापिते। आग्नेयादिषु विदिक्षु मिथुनादयो यमळाः स्थापिताः। स्थिरचक्रसव्यक्रमस्थापिताः। प्रष्टारूढराशिमुदयं कृत्वा मूर्त्यादिषु यद्यत् पृच्छति तद्भमिश्य वदेत्।।

तत्र प्रश्नकाले यस्मिन् राशौ गौळीकाकमनुष्यपशुभेरीनादः संभवति तं राशिमप्युदयं कृत्वा वदेत्। ततश्चरचक्रगतिः। उदयराशिं प्राक्स्थितं ज्ञात्वा तस्माद्दक्षिणावर्त्ता राशयः। उदयाच्चतुर्त्थराशिः पाताळगतः। सप्तमो(अ)स्तमितः। दशमो मध्यगतः। शेषास्तदन्तराळस्थाः। स चक्रे भवति। उदयारूढयोरुपरि छत्रवत् स्थितः छत्रराशिः भूयश्चिन्त्यः तेषां विषय विभागं पुनर्वक्ष्यामि आगन्तुफलमूह्यमित्यस्मिन् श्लोकान्ते।।

मेषो वृषो(अ)थ सिंहस्तुरगान्त्यार्द्धं मृगस्य पूर्वार्द्धं
योनिश्चतुष्पदानां मध्यो धनुषो भवेन्मर्त्त्यः।। ३८
कन्याघटमिथुनतुलाहयार्द्धमाहुर्मनुष्ययोनिरिति
कर्क्कटझषकुंभधरा मृगापरार्द्धञ्च जलयोनिः।। ३९
वृश्चिककुळीरमीनाःसरीसृपाणां वदन्ति योनिरिति
कन्यातुलेशतुरगा राशिषु पौरा विनिर्द्दिष्टाः।। ४०
मेषवृषमिथुनकुंभा ग्राम्या इति सूरिभिः समाख्यातः
मृगपतिमकराद्यध्यावारण्यौ सर्वभावेषु।। ४१

अथ राशियोनिमाह। मेषवृषसिंहाश्चतुष्पदानां योनयः। तुरगान्त्यार्द्धं मृगस्य पूर्वार्द्धं च चतुष्पाद्योनिः। मध्यो धनुषो भवेन्मर्त्त्यः। धनुषो मध्यद्रेक्काणः केवलमनुष्यः। कुंभो जलधरमनुष्यः। वृश्चिककुळीरमीनाः सरीसृपाणां योनिः। जलचरसृपौ कर्क्कटमीनौ। राशिषु कन्यातुलाहया नगरवासिनः।।

मेषवृषमिथुनकुंभा राशयो ग्रामवासिनः। सिंहो मकराद्यार्द्धं चारण्यौ। एतानि स्थानानि सर्वभाषेषुचिन्त्यानि। पूर्वोक्तचतुष्पतो नगरग्रामवनवासिन इत्यर्थः।।

गुरुसौम्यौ ग्रामचरौ रविकुजसौरोरगा वसन्ति वने
जलनिलयौ शशिशुक्रौ भोननष्टादिषु ग्राह्याः।। ४२

गुरुबुधौ ग्रामवासिनौ। तत्र गुरुर्नगरे ग्रामे वा ब्राह्मणगृहवासी। बुधो राष्ट्रे जनपदे वा वसति। सूर्यो(अ)द्रितलवासी। कुजो(अ)द्रिकूटवासी। शनिर्गहनकान्तारवासी प्रेतवनवासी च। राहुर्वल्मीकश्चभ्रपल्वलरन्ध्रकुञ्जेषु वसति। शुक्रो जलचरमनुष्याः। अगाधं जलं शुक्रस्य। चन्द्रो(अ)गाधजलवासी। सरीसृपश्चन्द्रो ग्रामात् वनं गच्छति। शुक्रो वनात् ग्रामं गच्छति। बलयुतेन भोजनं वनजं वा ग्रामजं वा ज्ञातव्यं। पात्रञ्च नष्टद्रव्यञ्च मुष्टिञ्च ग्रामजं वा वनजं वा विमृश्य वदेत्। तत्र यदि ग्राम्यराशौ पौरग्रहस्तिष्ठति चेत् ग्रामजातो ग्रामवासीति वदेत्। पुरुषेष्वेवं सर्वं। ततः पौरग्रह आरण्यराशौ पौरजातमारण्यवासं वदेत्। एवमेव व्यत्यासं वदेत्।।

सूर्यात्मजेन्दुपुत्रौ पक्षीसमानौ सरीसृपश्चन्द्रः
भृगुदेवगुरू द्विपदौ चतुष्पदौ भूमिपुत्रार्क्कौ।। ४३

शनिबुधौ पक्षिग्रहौ। चन्द्रः सङ्कुलपादः। शुक्रगुरू मनुष्यौ। कुजार्क्कौ चतुष्पदौ। बुधो ग्रामविहगः। चन्द्रो जलराशौ जलसरीसृपः, स्थलराशौ स्थलसरीसृपः। शुक्रो जलचरः। गुरुर्ग्रामचरः। कुजो मांसभक्षणः। रविस्तृण भक्षणः।।

विहगौ मृगमकरझषौ होराशास्त्रे परैर्विनिर्द्दिष्टौ
आरण्यमिति च मेषं वदन्ति होराविदः केचित्।। ४४

राशिषु मकरमीनौ विहगौ। केचिदाचार्या मेषमारण्यमिति वदन्ति।।

द्वितीयाध्यायः

पुरुषा रविगुरुभौमा नपुंसकाख्यौ बुधार्क्कपुत्रौ च
नार्यौ भृगुचन्द्रमसौ ग्रहाः स्वभावाल् त्रिधा प्रोक्ताः ।। १

अथ ग्रहाणां पुल्लिंगादि विभागमाह - एते ग्रहाः स्त्रीपुरुषनपुंसकाः। बुधः स्त्रीनपुंसकत्वाद् स्त्रीपुंवर्ग्गमिश्रांशस्थितौ मिश्रग्रहदृष्टौ च स्त्रीनपुंसकः। केवलं स्त्रीवर्ग्गमिश्रांशस्थितौ स्त्रीग्रहमात्रदृष्टौ च स्त्रियमेव वदन्ति। पुंवर्ग्गावस्थितौ तु बलयोगमवेक्ष्य पुमांसं वदेत्। शनिस्तु पुन्नपुंसकत्वाद् उक्तप्रकारेण पुंस्त्वसूचको द्रष्टव्यः।।

गुरुरर्क्कसुहृदनर्क्का बुधस्य शुक्रस्य सूर्यशशिवर्ज्याः
कुजरहिता देवगुरोश्शेषा रिपवो ग्रहा ज्ञेयाः।। २
सुहृदौ गुरुबुधशुक्रा यमस्य सोमस्य देवगुरुसौम्यौ
भौमस्य शशिजभृगुजौ शेषा रिपवो विनिर्द्दिष्टाः।। ३
जीवो रवेस्तु मित्रं शशिनो जीवस्तथैव सोमसुतः
शुक्रबुधौ भौमस्य तु सौम्यस्य रविं विना सुहृदः।। ४
जीवस्य भौमवर्ज्यास्शुक्रस्य शशाङ्कदिवसकरवर्ज्याः
रविचन्द्रभौमवर्ज्यास्सुहृदस्सौरेस्समाख्याताः।। ५
रविशशिवर्ज्या राहोस्सुहृदः केतोस्तु चन्द्रशुक्रौ च
ये नोक्तास्ते रिपवो होराचार्या वदन्त्येवं ।। ६

अथ सूर्यादीनां मित्रशत्रुभावमाह। उक्तैः पञ्चभिः श्लोकैः सूर्यादीनां शत्रुमित्रभावग्रहा विज्ञायन्ते। जीवः सूर्यस्य बन्धुः, अन्ये ग्रहा रिपवः। शशिनो मित्रे जीवबुधै, अन्ये रिपवः। कुजस्य शुक्रसौम्यौ मित्रे, शेषा रिपवः। बुधस्य रिवं विना सुहृदः। जीवस्य भौमवर्ज्या ग्रहास्सुहृदः। शुक्रस्य शशाङ्कदिवसकरौ शत्रू, शेषास्सुहृदः। मन्दस्य रवि भौमचन्द्रवर्ज्याः सुहृदः। रविशशिनौ राहोः शत्रू, शेषास्सुहृदः। केतोश्चन्द्रशुक्रौ

मित्रे, शेषा रिपवः। एवं होराचार्या वदन्ति। ग्रन्थगौरवाल् प्रत्ययार्थं पुनर्वृत्तिवचनं प्रश्नादौ वक्ष्यामि - आदित्यस्य गुरुर्बन्धुः, राहुबुधौ शत्रु, शेषा उदासीनाः। चन्द्रस्य जीवबुधौ बन्धू, कुजः शत्रूः, शेषा उदासीनाः। कुजस्य शुक्रबुधौ बन्धू, गुरुः शत्रुः, शेषा उदासीनाः। बुधस्यादित्यः शत्रुः, शेषास्सर्वे उदासीनाः। जीवस्यादित्यो बन्धुः, कुजः शत्रुः, शेषा उदासीनाः। शुक्रस्य रविचन्द्रौ शत्रु, शेषा उदासीनाः। शनेर्गुरुबुधशुक्राः मित्राणि, शेषाः रिपवः। राहोश्चन्द्रादित्यौ शत्रू, शेषाः मित्राणि। केतोश्चन्द्रशुक्रौ बन्धु, शेषाः रिपवः। एवं शत्रुमित्रोदासीना ग्राह्याः।।

मूलत्रिकोणसंज्ञा धनुरज घट वृषभसिंहषष्ठतुलाः
गुरुभौमसौरशशिनां दिनकरशशिपुत्रशुक्राणां ।। ७

धनुर्गुरोर्मूलत्रिकोणं। मेषः कुजस्य, कुंभौ मन्दस्य, वृषभश्चन्द्रस्य, सिंह आदित्यस्य, कन्या बुधस्य, तौलिः शुक्रस्य। एते सप्तराशयः सप्तग्रहाणां मूलत्रिकोणानि।।

मूलत्रिकोण भवनाच्चतुर्त्थपञ्चमधनव्ययाष्टमगाः
स्वोच्चे धर्म्मे च गता ग्रहास्तु तात्क्कालिकस्सुहृदः ।। ८

स्वमूलत्रिकोणभवनाच्चतुर्त्थपञ्चमद्वितीयनवमाष्टमव्ययस्वोच्चराशिस्थितो ग्रहो बन्धुर्भवति। तत्क्कालबन्धुरित्यर्थः। पूर्वोक्तबन्धुरुक्तस्थानगतश्चेदधिकबन्धुः। शत्रुर्वा यावत्कालमुक्तराशौ स्थितस्तावद्बन्धुः।।

षष्ठत्रिकोणसंस्थाः स्वस्थानान्निधनसप्तमोपगताः
मूलत्रिकोणरहिता रिपवस्तात्क्कालिकाः कथिताः।। ९

ग्रहस्थितभवनाद् षष्ठाष्टमत्रिकोणसप्तमराशिषु स्थितो ग्रहः स्थितस्य रिपुर्भवति। सहगतश्च रिपुः। एतानि भवनानि स्वमूलत्रिकोणं न स्यात्। तत्क्कालिकरिपवः कथिताः।।

दशमायव्यय धनगाश्चतुर्त्थदुश्चिल्कसंस्थितास्सुहृदः
अरयः परेषु राशिष्वितीह केचित् प्रभाषन्ते ।। १०

ग्रहस्थितभवनात् दशमायव्ययधनचतुर्त्थदुश्चिल्कसंस्थिता ग्रहाः स्थितग्रहस्य सुहृदो भवन्ति। अपरेषु राशिषु स्थिताः ग्रहाः शत्रवो भवन्ति। एवं केचित् प्रभाषन्ते। सर्वत्र स्थाने मूलत्रिकोणगतो बन्धुर् भवति।।

उदये बुधगुरुमनुजो बलिनो मध्ये चतुष्पदार्क्ककुजाः
हिबुके(अ)म्बुगामिशशिनो भृगुश्च शेषास्तथास्तमये ।। ११

अथ ग्रहराशीनां बलाबलमाह। उदये बुधजीवौ बलिनौ। द्विपाद्राशयश्च बलिनः। दशमराशावर्क्ककुजौ चतुष्पाद्राशयश्च बलिनः। चतुर्त्थे अंबुराशयः शशिशुक्रौ च बलिनः। सप्तमे शशिराहू कीटराशयश्च बलिनः। तत्र कर्क्कटकश्चतुर्त्थे चास्ते च बलवान् कीटजलभावाल्।।

बलिनो गुरुरविसौरा दिवसे चन्द्रात्मजौ निशि दिवा च
रात्रौ शेषाः प्रबलाः सौम्याः शुक्ले(अ)धमाः कृष्णे।। १२

पूर्वाह्ने गुरुर्बलवान्। मध्याह्ने रविर्बलयुतः। अपराह्ने मन्दो(अ)पि बलवान्। बुधो दिनरात्रसमबलः। चन्द्रो(अ)पि पूर्वरात्रे बलवान्। कुजो मध्यरात्रे। अपररात्रे शुक्रो बलवानिति। सौम्यग्रहास्सर्व्वे शुक्लपक्षे बलयुताः। क्रूराः कृष्णपक्षे।।

शुक्ले चन्द्रो बलवानुदगयने दिनकरो बलोपेतः
वक्रानुवक्रकाले शेषाः स्निग्द्धाः प्रदक्षिणगाः।। १३

शुक्लपक्षे बलयुतश्चन्द्रः। उत्तरायणे सूर्यो बलवान्। वक्रानुवक्रकाले शेषाः बलयुताः। यस्माद्भागाद् ग्रहो वक्रमारंभते वक्रनिवृत्तेश्च पुनस्तत्र यावतः कालात् गच्छति तावद् ग्रहो बलयुतो भवति। प्रदक्षिणगाः स्निग्द्धाः रश्मिविकसिताश्च ग्रहयुद्धे उत्तरभागस्थाश्च बलयुता भवन्ति।।

मेषूरणहिबुकाभ्यां बलवल्पूर्वं ततो(अ)परं विबलं
होरागुरुबुधपतिभिरदृष्टा तैरेव युक्ता वा ।। १४

उदयवशाद्शमादारभ्य तृतीय राश्यन्तं राशि षट्कं बलयुतं। हिबुकादिराशिषट्कं बलरहितं। होरागुरुबुधपतिभिर्दृष्टा युक्तावा बलयुता भवति।।

सिंहाद्या दिवसबलाः कुंभधराद्या निशासु बलवन्तः
उत्तममध्यम विबलाः केन्द्राद्याः प्राप्तेप्यनिर्वृत्ताः।। १५

सिंहाद्यं राशिषट्कं दिनबलयुतं। कुंभाद्यं निशि बलयुतं। उदयकेन्द्रगता राशयः उत्तमबलयुताः। उदयादूर्ध्वराशिकेन्द्रगता राशयो मध्यमबलाः। उदयात्पूर्वोदितराशिकेन्द्रगता बलारहिताः।।

होरा शशियुक्ता वा द्विपदा दिवसे चतुष्पदा रात्रौ
बलिनो दिनावसाने शेषा नान्यत्रबलवन्तः ।। १६

शशियुक्ता होरा बलवती पूर्वपक्षचन्द्रश्चेत्। क्षीणचन्द्रयुता दुर्बला द्विपदा ग्रहराशयो दिने बलयुताः। चतुष्पाद् ग्रहराशयो रात्रौ बलयुताः। कीटराशिग्रहा सन्ध्ययोर्बलयुता इति। उक्तस्थानकालादन्यत्र क्षीणबलाग्रहराशयः।।

तात्क्कालिक नैसर्ग्गिक सन्पातिकमित्रशत्रुमध्यस्थं
बलमपि चतुष्प्रकारं स्थानाश्रय कालचेष्टादिभिः ।। १७

स्थानाश्रय कालचेष्टाभिश्चतुर्भिस्तात्क्कालिकनैसर्ग्गिक सान्पातिकमित्रशत्रुमध्यस्थं चतुष्प्रकारं बलं ज्ञातव्यं। स्वोच्चस्वद्रेक्काण स्वनवांशस्वभवनस्वमूलत्रिकोणगस्य स्थानबलमुक्तं। उदये गुरुबुधमनुजा इत्यनेन आश्रयबलमुक्तं। बलिनोगुरुरविसौरा इत्यनेन कालबलमुक्तं। शुक्लेचन्द्रोबलवान्

इति चेष्टाबलमुक्तं। होराशशियुक्ता इत्यनेन तात्क्कालिकबलमुक्तं। मन्दारसौम्य इत्यनेन नैसर्ग्गिकबलमुक्तं। उत्तममध्यमविबला इति, धशमायव्ययधनगा इति श्लोकद्वयेन सान्पातिकमुक्तं। जीवोरवेस्तुमित्रं इत्र शत्रुमित्रोदासीनभव उक्तः। एवमष्टधा ग्रहाणां बलमुक्तं। ग्रहाणां बलाबलं ज्ञात्वा फलं योजयेत्।।

मन्दारसौम्यवाक्पतिसितचन्द्रार्क्का यथोत्तरं बलिनः
नैसर्ग्गिकबलमेतत् बलसाम्ये(अ)स्मात् बलाधिक्यं।। १८

मन्दाद् बली कुजः। कुजाद् बली सौम्यः। सौम्याद् बली गुरुः। जीवाद् बली शुक्रः। शुक्राद् बली चन्द्रः। चन्द्राद् रविर् बलवान्। सर्वेषां ग्रहाणां बलसाम्ये अनेन बलयुतं ग्रहं गृह्णीयात् इति।।

उच्चास्तुलाजकन्याः क्रमेण झषमृगकुळीरगोपतयः
सैरार्क्कसौम्य भृगुकुजगुरुशशिनां सप्तमाः नीचाः।। १९

तौलिर्मन्दस्योच्चः, मेषो नीचः। मेषा(अ)र्क्कस्योच्चः, तौलिर्नीचः। बुधस्य कन्योच्चः, मीनो नीचः। मीनः शुक्रोस्योच्चः, कन्या नीचः। मकरः कुजस्योच्चः, कुळीरो नीचः। कर्क्कटो जीवस्योच्चः, मकरो नीचः। वृषश्चन्द्रस्योच्चः वृश्चिको नीचः इति।।

विंशतिरथ दशभागास्त्रि पञ्चकं सप्तविंशतिश्चैव
अष्टाविंशतिरुच्चेषूच्चाः पञ्च त्रयश्चैव।। २०

उक्तेषु राशिषु अत्युच्च संज्ञितं त्रिंशत्भागमाह - विंशतिर्मन्दस्य, दशार्क्कस्य, पञ्चदश सौम्यस्य, सप्तविंशतिः शुक्रस्य, अष्टाविंशतिः कुजस्य, पञ्च जीवस्य, त्रयश्चन्द्रस्य। एवमतिनीचो ज्ञेयः।।

सुखिनः प्रकृष्टकर्म्मा राजप्रतिरूपको(अ)थ राजा च
एकद्वित्रिचतुर्भिर् जायन्ते(अ)तः परं दिव्याः ।। २१

एकोच्चग्रहदृष्टया सर्व्वतस्सुखिनो भवन्ति। जातो(अ)प्यायुष्मान् भवति। द्वौ ग्रहौ उच्चगतौ विक्षेते (चेत्) सर्व्वकर्म्मभोक्ता। त्रय उच्चगता वीक्षन्ते (चेत्) राजा भवति। चतुर्भिर्वीक्षितश्चेच्छक्रवर्त्ती भवति। अतः परं दिव्याः। पञ्चभिः षड्भिर्वा उच्चसहितैर्वीक्षितश्चेद्देवसमो भवति। इदं प्रश्नजातकयोः संग्राह्यं। नीचग्रहवीक्षितश्चेद् अनायुष्मान् नीचो वा भवति। नरकर्म्म च क्लेशाश्च बहवो नीचस्था(श्चेत्) नीचाश्चण्डालाश्च जातेरधमा भवन्ति जाताः।।

त्रितीयाध्यायः

षष्ठं द्वितीयभवनं द्वादशमेकादशं न पश्यति
स्वस्थानाद्वीक्षन्ते ग्रहास्तदन्यानि भवनानि।। १

अथ वीक्षणप्रकालमाह - ग्रहस्थितभावादारभ्य षष्ठं द्वितीयभवनं द्वादशमेकादशं ग्रहा न वीक्षन्ते। अन्यानि भवनानि वीक्षन्ते। एतज्ज्ञातकलक्षणं।

वीक्षन्ते रविभौमावूर्ध्वं शुक्रेन्तुजौ कटाक्षेण
इन्तुगुरू समदृष्टचा राहुः सौरो(अ)प्यधोदृष्टचा।। २

वीक्षेते निरीक्षेते। रविभौमौ ऊर्ध्वदृष्टया वीक्षते। शुक्रेन्दुजौ तिर्यग्दृष्टया। इन्दुगुरू समदृष्टया। सर्पसौरा अधोदृष्टया। दर्शनलक्षणं सर्वत्र ग्राह्यं। चोराहृतप्रकरणे ऊर्ध्वदर्शनग्रहदृष्टे गृहस्योर्ध्वभागं विपाटय अन्तर्गतश्चोरः। अधोदर्शनग्रहदृष्टे लग्ने भूमिं भित्वान्तर्गतः। तिर्यग्दर्शनग्रहदृष्टे भित्तिं प्राकारं वा भित्वान्तर्गतः। समदर्शनग्रहदृष्टया द्वारेणान्तर्गतः इति। एवं द्रव्यभोजनेषु योजयेत्। यथा चोरो द्रव्यमाहरति अधोभागं विपाटय वा द्वारेण वा ऊर्ध्वं भित्वा वा तथा वाच्यं। द्रव्यञ्च भूमौ स्थितं, उपरिस्थितं वा भूमेरधः स्थितं वा योजयेत्। द्रव्यस्य मुखचिह्नं च ग्रहदर्शनभागे वदेत्। यथा सप्तमराशिश्चरति चतुष्पात् द्विपात् सङ्कुलपाद्वा तथा चरन् चोरो द्रव्यमाहरत्। पूर्वोक्तवनग्रामजलादिषु चोरो द्रव्यं स्थापयेदिति सप्तमस्थग्रहराशिवशेन कथयेत्। आरूढराशिवशात् चरस्थिरोभयात् बहिर्गृहे वा गृहान्ते वा पूर्वं द्रव्यस्थितस्थानं वदेत्। तत्र ऊर्ध्वमुखे ऊर्ध्वस्थितं द्रव्यं। अधोमुखे अधःस्थितं द्रव्यं। तिर्यङ्मुखे भूमौ स्थितं द्रव्यं इति राशिग्रहवशाद् वाच्यं। चोरो(आ)प्येवंमुखः। तत्र उदयराशिस्तिर्यङ्मुखसहवर्त्ती स्याद् गृहात् बहिरासन्नश्चोरो गृहे स्थितं द्रव्यं हस्तेनाहरदिति वाच्यं। आरूढराशिकेन्द्रैर्वा तत्रस्थैर् द्रव्यं निर्द्देश्यं। तत्रारूढवशात् चोरश्चरन् हरति। तदस्ते बलयुते आसनस्थो हरति। तद्दशमे बलयुते स्थित्वा हरति। चतुर्थे बलयुते शयितो हरति। तत्रोदयवशात् प्रश्नकाले चोरवृत्तिं पूर्ववद्वदेद् उदयकेन्द्रग्रहराशिभिरिति।।

दर्शनफलमपि दद्युस्त्रिकोणसप्तमचतुर्थदशमगताः
अर्धफलं संपूर्णं पादोनं पादमन्यत्र।। ३

ग्रहदर्शनवशात् शुभाशुभं वा लाभालाभं वा यद्यत् फलं ग्रहस्योक्तं तस्यार्धं फलं ददाति त्रिकोणयोः स्थितो ग्रहः। लग्नसप्तमस्थः सर्वं ददाति। चतुर्थस्थितः पादोनं फलं ददाति। दशमस्थितः पादं, स्वोक्तफलात् पादं ददाति। नष्टादि वस्तुनः संख्याज्ञाने विनियोगः।।

चतुरेकविंशषोडशनवसंख्याः पञ्चसप्तदशकिरणाः
मन्दगतिचन्द्रभार्ग्गवशशिसुतरविभौमजीवानां ।। ४

अथ ग्रहरश्मीनाह - मन्दस्यांशवश्चत्वारः चन्द्रस्यैकविंशति, शुक्रस्य षोडश, बुधस्य नव, सूर्यस्य पञ्च, भौमस्य सप्त, जीवस्य दश। एतैः किरणैः पूर्वोक्तफलं विभज्य कथयेत्।।

सर्वं पश्यति लग्ने कुजस्त्रिययायय्योश्चतुर्भागं

सार्द्धत्रिकं त्रिकोणे सार्द्धचतुष्कं चतुर्द्धस्थः ।। ५

सर्वं पश्यति लग्ने कुजः। भौमो लग्नगतः सर्वं किरणं पश्यति। त्रितीयाययोः स्थितः रश्मीनां चतुर्भागं पश्यति। त्रिकोणस्थितो भौमः स्वोक्तकिरणार्द्धं त्रिकसहितं पश्यति। अर्द्धयुक्तं चतुष्कं चतुर्त्थस्थः पश्यति।।

रश्मीञ्जामित्रगो दशमे द्वावर्द्धमीक्षते नवमे
भौमश्शेषाणामपि विभाज्यमिति केचिदिच्छन्ति।। ६

जामित्रगतो भौमः सर्वान् किरणान् पश्यति। दशमे स्थितः द्वौ किरणौ पश्यति। नवमे स्वेक्तकिरणार्द्धं पश्यतीति।।

भौमग्रहणं ग्रहोपलक्षणार्त्थं सर्व्वेषां ग्रहाणामेवं विभज्य फलं कथयेत्। उक्तप्रकारं ग्रहाः फलं ददातीति केचिदाचार्या वदन्ति। इदानीं पूर्व्वोक्तमेव ग्राह्यं। ये ग्रहाः केन्द्रत्रिकोणतृतीयैकादशेपुस्थिताः पश्यन्ति तेषां किरणविभागं विभज्य यावल्संख्या अंशस्तावल् संख्यातं चोरहृतद्रव्यं भवति। एवं सर्वत्र प्रश्ने द्रव्यस्य संख्या वाच्या। पापग्रहैः पापफलं भवति, शुभग्रहौः शुभफलं।।

मित्रस्वक्षेत्रोच्चत्रिकोणसहिता ग्रहाः फलं दद्युः
पादं पादेनोनं संपूर्ण्णञ्चात्रफलमर्द्धं ।। ७

पूर्व्वोक्तस्थानगतग्रहरश्मिर्यथा फलं ददाति तदुच्यते। मित्रेति-मित्रक्षेत्रगतः पादं फलं ददाति। स्वक्षेत्रगतः पादोनफलं ददाति। उच्चगतः संपूर्णं फलं ददाति। त्रिकोणगो(अ)र्द्धं फलं ददाति। एतत् फलोपयोगलक्षणं।।

नीचार्क्कगता विफला रिपुभवनगता भवन्ति चाल्पफलाः
निहता ग्रहेण हीनांशवो(अ)पसव्येन संयुक्ताः।। ८

नीचराशिस्थितग्रहकिरणा विफला भवन्ति तथा मूढग्रहकिरणाः। शत्रुराशिस्थितग्रहकिरणाः स्वल्पफलदा भवन्ति। युद्धपराजिताश्च हीनांशवश्चन्द्रस्य वा ग्रहस्य वा दक्षिणभागस्था ग्रहा अल्पफलदा भवन्ति। स्वक्षेत्रस्वोच्चमित्रगाश्चेत् स्वोक्तफलदा एव भवन्ति। चोराहृतप्रश्ने ये विफला रश्मयस्तावल्संख्यं सस्यं वा फलं वा चोरैर्भक्षितं। अन्यच्छुभवीक्षितरश्मिसंख्यं द्रव्यं प्रष्टा लभते। मित्रग्रहस्थितवीक्षिते लग्ने शुभवीक्षितरश्मिसंख्यं लाभं वदेत्। अन्यन्नश्यति।।

स्तनपानवया भौमः षोडशवर्षो भृगुर्बुधस्याष्टौ
त्रिंशत् गुरोरथेन्दोस्सप्ततिरर्क्कस्य पञ्चाशत् ।। ९

कुजस्त्रिवर्षयाः चतुर्त्थवर्षादारभ्याष्टवर्षपर्यन्तं वयो बुधस्योक्तं। नववर्षादारभ्य षोडशवर्षपर्यन्तं शुक्रस्य। सप्तदशवर्षादारभ्य द्वात्रिंशद्वर्षान्तं गुरोः त्रयस्त्रिंशद्वर्षादारभ्य पञ्चाशद्वर्षान्तमादित्यस्य। एकपञ्चाशदारभ्य सप्ततिवर्षान्तं चन्द्रस्य।।

राहोर्क्कोरब्दशतं विंशतिरपि चापरैर् विनिर्द्दिष्टं
स्व स्वामिनां वयो यत्तदेव तेषां ग्रहाणाञ्च।। १०

एकसप्ततिमारभ्य शतवर्षं शनेः फणीन्द्रस्य चोक्तं। विंशतिसंयुक्तं शतमपरे वदन्ति। ग्रहवत् स्वेषां भवनानां वर्षमुक्तं। ग्रहसमवर्षं पुरुषस्य वदेत्। ग्रहस्थितराशौ ये(अ)म्शाः ग्रहभुक्तास्तद्भद्वत्सरं त्रिवर्षादिषु संयुज्य वदेत्। स्वराशिस्वद्रेक्काणे स्वांशकेषु ग्रहे स्थिते ग्रहस्योक्तं विभज्य कथयेत्। परवर्ग्गस्थिते राशेरंशकस्य वा यदुक्तं तदर्द्धं वा अर्द्धार्द्धं वा ग्रहवर्षे संयुज्य वदेत्। पुरुषस्य यस्य ग्रहस्योक्तं वयो वर्त्तते तत्र शुभाशुभं मरणजीवनं च ग्रहेण जायते इत्यर्थः।।

बालकुमारयुवानो मध्यो मध्याधिकः पलितवृद्धौ च
कुजबुधभृगुगुरुशशभृत्तपनार्क्कसुताः परैः कथिताः।। ११

कुजो बालः। बुधः कुमारः, शुक्रो युवा, गुरुर्मध्यवयाः, चन्द्रो मध्याधिकः, तपनः पलितः, सितरोमा इत्यर्थः, शनिवृद्ध इति।।

द्वात्रिंशदेकसप्ततिपञ्चाशद्भिंशतित्रिविंशशतं
भृगुशशिरविगुरुसोमजभैमार्क्कीणां वदन्त्यन्ये।। १२

द्वात्रिंशत् शुक्रस्य, एकसप्ततिश्चन्द्रस्य, पञ्चाशदर्क्कस्य, विंशतिर्गुरोः, त्रिंशद्वर्षा बुधस्य, विंशति भौमस्य, शतं राह्वार्क्कोः इति केचिद्वदन्ति। गुरुकुजयोर् विंशतेरारभ्य एकत्रिंशद्वर्षान्नयेत्। अन्येषां पूर्व्ववत्। अनेन चोरवयो विज्ञायते।।

कण्टककेन्द्रचतुष्टयसंज्ञा लग्नास्तहिबुकदशमानां
प्राग्रेखागतराशिं होरेत्याचक्षते यवनाः।। १३

उदयसप्तमचतुर्त्थदशमानां कण्टककेन्द्रचतुष्टयसंज्ञाः। उदयगतं राशिं होरेत्याचक्षते यवनाः।।

शशिलग्नस्थाभ्यां तृतीयसप्तमचतुर्त्थदशमानि
दुश्चिल्क्कं जामित्रं हिबुकं मेषूरणञ्चापि।। १४

लग्नचन्द्रस्थानयोः भवनयोः तृतीयं दुश्चिल्कसंज्ञं। सप्तमं जामित्रं, चतुर्त्थं हिबुकं, दशमं मेषूरणं, इति संज्ञा।।

ऊर्ध्वमुखो रविमुक्तो राशिर्युक्तस्त्वधोमुखो ज्ञेयः
अभिलषितस्तिर्यक् स्यात्तेषां केन्द्राश्च तत्संज्ञाः १५

रविमुक्तराशिरूर्ध्वमुखः। रवियुक्तराशिरधोमुखः। अभिलषितस्तिर्यङ्मुखोराशिः। तेषां त्रयाणां केन्द्राश्च तत्संज्ञा भवन्ति सूर्यगतिवशात्।।

ऊर्ध्वमुखो यदि राशिर्होरा प्रश्ने नरस्य सिद्धिकरी
अन्ये विफले भवतश्शुभयुतदृष्टे शुभाख्ये च ।। १६

ऊर्ध्वमुखादि फलमाहपृच्छकस्य - ऊर्ध्वमुखो राशिर्यदि लग्नगतः चिन्ता

सिद्धिकरीति वदेत्। अन्ये अधोमुखतिर्यङ्मुखे होरे विफले फलरहिते भवतः। यदि ते शुभयुते शुभदृष्टे वा शुभे भवतः। कार्यस्य परिसमाप्तिर् भवति। चोराहृते ऊर्ध्वमुखे उपरिस्थितं, अधोमुखे भूमेरधस्थितं, तिर्यङ्मुखे भूमौ स्थितं द्रव्यमिति वदेत्। एवं द्रव्यमुखञ्च।।

क्षित्यंबुपवनपावकवियन्ति भूतानि पञ्चकथितानि
बुधभृगुशनि भौमानां जीवस्यैषां गृहाणाञ्च।। १७

अथ ग्रहाणां क्षित्यादिपञ्चभूतसंबन्धमाह - बुधस्य भूमिः, शुक्रस्य जलं, शनेरनिलः, कुजस्याग्निः, जीवस्याकाशः। एतानि पञ्चभूतानि पञ्चानां ग्रहाणामुक्तानि। ग्रहस्योक्तानि पञ्चभूतानि ग्रहाणां राशीनां स्वभवनाञ्च वदेत्। भूतानां विषयो नष्टमुष्टिचिन्तासु। ग्रहस्य भूतस्थानादाहृतं द्रव्यं ज्योतिषिको यदाहृतं तस्य स्थानञ्च वदेत्। अस्तमयराशिना अस्तगतदर्शन ग्रहेण चोराहृतद्रव्यं यत्र चोरैः स्थापितं तत्स्थानं वदेत्।।

चन्द्रो यं यं राशिं भुङ्क्ते तत्स्वामिभूतमनुकुर्यते
ग्रहराशयः स्वादिकस्थाः कुर्व्वन्त्यात्मीयभूतानि।। १८

यद्यपरपक्षचन्द्रो वा शत्रुनीचगो वा यस्य ग्रहस्य राशिं भूङ्क्ते तत्स्वामिभूतं करोति चन्द्रः। केन्द्रत्रिकोणेषु ग्रहयुतेषु बलयुतग्रहवशाल् स्वोक्तं भूतं ग्राह्यं ग्रहा न सन्ति चेद् बलयुतराशिवशाद्वदेत्।।

यदि चन्द्रो बलयुक्तः करोति सर्वत्र सलिलमात्मीयं
पृथ्वीं करोति दिनकृच्चान्ये स्वान्येव कुर्व्वन्ति।। १९

पूर्व्वपक्षचन्द्रः सर्व्वत्र भावे सलिलं करोति। बलयुतः स्वक्षेत्रस्वोच्चगतो(अ)पि सलिलमेव करोति। सूर्ये बलरहिते चन्द्रवत्। बलयुते पृथिवीं करोति। अन्ये ग्रहाः स्वानि भूतानि कुर्व्वन्ति।।

चम्पककुरण्ड शशरुधिर तुल्यशुकहंसचित्रनीलनिभाः
गुरुसूर्यभौम बुधशशिभृगुसौराणामिमे वर्ण्णाः।। २०

इमे ग्रहाणां वर्ण्णाः - गुरुश्चम्पकपुष्पवर्ण्णः, सूर्यः कुरुण्ड पुष्पवर्ण्णः, भौमः शशिरुधिर तुल्यवर्ण्णः, बुधः शुकवर्ण्णः, चन्द्रो हंसवर्ण्णः, सौरो नीलवर्ण्णः इति।।

आत्माकृतिर्वर्ण्णादीन् ग्रहस्तु न जहातिपरगृहस्थो(अ)पि
तत्स्वाम्याकृतिवर्ण्णौ व्रजतीत्यपरे व्यवस्यन्ति।। २१

स्वक्षेत्रस्वेच्च मित्रगतेग्रहे स्वाकृतिञ्च स्वभावञ्च स्ववर्ण्णञ्च यद्यदुक्तं यद्यद्धक्षति तत्सर्व्वं वदेत् नष्टमुष्टिचिन्तासु। यद्यबले ग्रहे राशिवर्ण्णञ्च ग्रहवर्ण्णञ्च संयुज्य वदेत्। राशौ बलयुते राशिवर्ण्णं प्रधानं वदेत्।।

मेषवृषमिथुनकर्क्कटकानां वर्ण्णो(अ)धिपस्य निर्द्दिष्टः
तेषां त्रिकोणयोरपि स एव वर्ण्णः ।। २२

मेषादीनां चतुर्ण्णां राशीनां स्वाधिपति वर्ण्णः समादिष्टः। तेषां त्रिकोणयोरपि स एव वर्ण्णः समाख्यातः। मेषवन्मेषत्रिकोण इत्यादि।।

चतुर्त्थाध्यायः

शुष्का रविकुजसौरा भृगुचन्द्रमसौ जलात्मकौ भवतः
आश्रयगौ गुरुसौम्यौ बलिनावित्युक्तमाचार्यैः १

रविकुजसौराः शुष्कग्रहाः। भृगुचन्द्रौ जलग्रहौ। आश्रयराशिवर्त्तिनौ गुरुसौम्यौ विबलौ सबलौ वा आश्रयग्रहौ। नष्टादिषु वर्ण्णाद्रशुष्कादयो ग्राह्याः।।

वृश्चिक वृषकर्क्कटकास्सप्तमगृह मकरमत्स्यकुंभधराः
सजला राशिष्वेते विजलाश्शेषास्समाख्यातः २

वृश्चिकवृष कर्क्कटकुला मकरमत्स्यकुंभधराः जलराशयः। मेषमिथुन सिंह कन्याधनूंषि स्थलराशयः।।

जलवत्यजलेन गते(अ)धस्ताज्जलमुपरि भवति विपरीते
सजलद्वयसम्पाते प्रभूतमुदकं विनिर्द्देश्यं।। ३

एतेषां प्रयोजनमाह - जलवति राशौ अजलग्रहे स्थिते कूपादीन् पृच्छति चेदधस्ताज्जलमस्तीति वदेत्। यदि स्थलराशौ जलग्रहे स्थिते उपरि जलमस्ति अधस्तान्नास्ति। राशिग्रहौ सजलौ चेत् प्रभूतमुदकमस्तीति वदेत्। अजलद्वये नास्तीति वदेत्। वर्षप्रश्ने एवमेव वदेत्। गोक्षीरञ्च। अथवा बलवच्चेच्छत्रेणैवं वदेत्। वर्षप्रश्ने तोयासन्ने वा तोयादर्शी वा आर्द्रद्रव्यं स्पृशन् वा पृच्छति यदि तदस्तीति वदेत्। अथवास्ति नास्ति इति वा शब्दः श्रूयते तदा तदनुरूपं वर्षं वदेत्। तत्र बुधः अन्यग्रहेण राशिना वा युतश्चेद्रूक्षवातयुतं वर्षं। बुध एको(अ)प्युदयति चेद् बुधक्षेत्रांशद्रेक्काणे वा वर्षरहितं रूक्षवातमस्तीति वदेत्। एवं कुजयुतेदृष्टे विद्युन्मेघध्वनियुतमिति वदेत्।।

पितृमातृसहजभार्यात्ममित्र तनयारयो व्यवस्थेयाः
अर्क्कशशिसौम्यभार्ग्गवजीवधराजार्क्कजैस्सततं।। ४

रविः पिता, चन्द्रो माता, सौम्यो भ्राता, भृगुर्भार्या, गुरुरात्मसुहृत्, कुजः पुत्रः, राहुमन्दौ शत्रू। यद् भावो ग्रहः शत्रुनीचमूढगतः केन्द्रे त्रिकोणे स्यात् क्रूरयुते दृष्टे स मृत इति वदेत्। तत्र पूर्व्वषट्के ग्रहे स्थिते ग्रहे मृतः। अपरषट्के परदेशे। ग्रहस्थितराश्यंशकसमभूमिं वदेत्। षवं रोगमरणं वदेत्। यद् भाक़आभिपो ग्रहो(अ)तिबलवान् तस्य सम्पदं वदेत्। यद् भावो ग्रहो लग्नं न पश्यति तद्भावस्तस्य

प्रष्टुर्नास्तीति वदेत्। धनलाभबन्धुसप्तमदशमगतग्रहभावं शुभमिति वदेत्। षष्ठाष्टमद्वादशेषु स्थितग्रहस्य भावः शत्रुवदाचरति। लग्नसप्तमे शुभः।।

पितृपक्षौ भौमयमौ मातुः पक्षा बुधो शनो(अ)ग्गिरसः
पुंग्रहराश्योर्विषमाः स्त्रीग्रहराश्योस्समास्संज्ञाः।। ५

पितृपक्षौ भौमयमौ। भौमो ज्ञातिः, शनि पितृव्यः, बुधो मातुलपुत्रः। यदि स्त्रीराश्यंशकगते मातृष्वसा पुत्रिका वा भवति। गुरुर्मातुलश्च भवति। शुक्रो मातृष्वसा। पुरुषस्य पुरुषराश्यंशकगतास्सर्व्वे ग्रहाः शुभं कुर्व्वन्ति। स्त्री राश्यंशकस्थिताः स्त्रियः शुभदा भवन्ति।।

नृपती रविचन्द्रमसौ भूसूनुर्नायको(अ)र्क्कजः प्रेष्यः
सचिवौ भृग्वंगिरसौ बुधः कुमारो विनिर्द्दिष्टः ।। ६

रविश्चक्रवर्त्ती, चन्द्रो राजा, कुजः सेनापतिः, शनिः प्रेष्यजातिः, शुक्रः सहचरामात्यः, गुरुर्बहिश्चरामात्यः, बुधो राजकुमारः। ते(अ)पि नष्टादिषु ज्ञेयाः।।

चन्द्रस्याग्रे राशौ सुनभा ह्यनभा त्वतीतराशिस्थे
उभयत्र ग्रहयुक्ते धुरुधुरासंज्ञो भवेद्योगः।। ७

चन्द्रस्थितराशेरग्रराशौ ग्रहे स्थिते सुनभा नाम योगः। चन्द्रातीतराशौ ग्रहयुते अनभा नाम योगः। चन्द्राद् द्वितीयद्वादशराश्योर्ग्रहयुतोः धुरुधुरायोगः। एते योगाः शुभग्रहवशात् शुभाः, अशुभग्रहवशादशुभाः।।

चतुरश्रधुरुधुरगताः क्रूराः शंसन्ति मरणमचिरेण-
सौम्यैर्दृष्टा रोगो नात्र प्रभवेत् बलोपेतैः ।। ८

एषां फलं - चतुरश्रधुरुधुरगतास्सर्व्वे क्रूरा अचिरेण कालेन मरणं कुर्व्वन्ति। यस्यायुः पृच्छति तस्येत्यर्थः। ते(अ)पि बलयुतैः शुभैः दृष्टाश्चेद् रोगशान्तिर्भवति। शुभधुरुधुरा चेद्रोगो न संभाव्यते। आयुषस्सन्ति। अशुभसुनभा द्रव्यहानिं नाशं पराभवं वा पूर्व्वार्ज्जितस्वहानिं कुटुंबरोगञ्च करोति। शुभा विपरीतं। अशुभानभा रोगं व्ययं अंगभंग पतित्वं वा करोति। शुभानभा दीर्घायुष्यं नीरोगत्वं निर्भयत्वञ्च करोतीत्येवं विमृश्य नष्टस्य लाभालाभं शुभाशुभवशाद्वदेत्। योगेषु शुभाशुभैर्मिश्रं फलं।।

सौम्यादृष्टः सौरो यं यं राशिं हिनस्ति चारेण
क्षयपति चायुस्तस्य क्रूरग्रहवीक्षितः शीघ्रं।। ९

सौम्यदृष्टो वा नीचशत्रुगतो वा मन्दो यस्य चारवशाद् धुरुधुरः प्रवृत्तः जन्माष्टमगतो भवति, तस्यायुः क्षयं करोति। क्रूरग्रहवीक्षितश्चेच्छीघ्रेण। शुभैः शुभं। एतद् गोचरफलं।।

सौरबुधभैमभार्ग्गवगुरवश्चैकेन्द्रियादयो जीवाः
ग्रहवर्ण्णो राशीनां तत्रस्थेनापि संव्रजति।। १०

सौरादयः पञ्च ग्रहाः एकेन्द्रियादीनां पञ्चेन्द्रियपर्यन्तानां जीवा अधिपाः स्पर्शरसगन्धरूपशब्देन्द्रियाणि सौरादीनामेकाधिकमिन्द्रियमुक्तं। एतद्विमृश्य द्विपदादिजीवानां वदेत्। शनिरत्वग्गिन्द्रियः, बुधस्त्वग्जिह्वेन्द्रियः, भौमस्त्वग्जिह्वानासिकेन्द्रियः, शुक्रस्त्वग्जिह्वानासिकाचक्षुरिन्द्रियः, गुरुः पञ्चेन्द्रियः। ग्रहस्योक्तमिन्द्रियं भावं वर्ण्णञ्च राशेश्च वदेत्। राशिग्रहयोरुक्तान् विशेषान् संयुज्य वदेत् बलप्रधानादित्युपदेशः।।

पञ्चमोध्यायः

यतिमे ग्रहो विलग्नाद्राशौ स्यात्तेन राशयो(अ)भ्यस्याः
आदेश्यः फलपाकः प्रवासविनिवृत्तिषु स कालः ।। १

ग्रहो लग्नाधिपतिः। स लग्नोदितांशदारभ्य यस्मिन् नवांशे स्थितः तल्कालललग्नोदितांशैर्गुणित्वा अष्टोत्तरंशतभागहृते अवशेषिताः। क्षणदिवसाद्याः भवन्ति। या संख्या अवशेषिता सा संख्या प्रवासादिषु कालो भवति। अस्यार्थमन्यत्र अन्ये आचार्या वदन्ति - यतिमे यावल् संख्ये राशौ प्रवासनिवृत्त्यादिकारको ग्रहः स्थितः तावत्या संख्यया द्वादशसंख्या अभ्यस्याः। संगुण्य तदानीं या संख्या तया परिच्छिन्ने दिने मासे वत्सरे वा प्रवासादि वक्तव्यं तच्च उद्यद्रांशेः स्थिरत्वे वत्सरः, उभयत्वे मासं, चरत्वे दिनं। ततः दीर्घाल्पमध्यत्वं इत्यनेनोक्तं। कारकग्रहलक्षणन्तु-

इष्टभावादधस्थो वा लग्नगो केन्द्रगो(अ)पि वा

बली वा योगकर्त्ता वा कारकग्रह इष्यते।।

इत्युक्तं। इष्टभावो निवृत्तिप्रश्ने सप्तमः, प्रवासप्रश्ने दशमः, गृहप्रवेशप्रश्ने चतुर्त्थः, पुत्रप्रश्ने पञ्चमः। तत्तद् भावाधिपस्तत्तद्भावादधस्थे राशौ तत्तद्भावकेन्द्रराशौ वा यदि बली तर्हि स एव कारकः। भावादधस्तराशेः भावकेन्द्रराशेर्व्वा अन्यत्रावस्थितस्य बलिनो(अ)पि न काकत्वं। तत्रावस्थितस्यापि दुर्बलस्य न कारकत्वं। योगकर्त्ता बली चेत् स एव कारकः। तत्तद्भावसाधारणश्चन्द्रो लग्नाधिपश्च, प्रवासादिकारकग्रहश्चक्रस्थितराशेरारभ्य चतुर्षुराशिषु मृगस्थे कुंभादिराशिचतुष्टये बलचतुष्टययुते यदि पूर्वन्यायागतदिनमासाद्यारंभ एव।।

दीर्घाल्पमध्यमत्वे राशीनां सूर्यभुक्तिलक्ष्यांशैः
ग्रहचारनष्टजातकविधिभिश्चैवादिशेत् कालं ।। २

दीर्घाल्पमध्यमत्वे चरस्थिरोभयोदय इत्यर्थः। चरोदये मेषादावारभ्य सूर्यस्थितनवांशकपर्यन्तानंशान् लग्नस्योदितांशैर्गुणित्वा अष्टोत्तरशतेन हृते

अवशेषिता याः ताश्च क्षणाद्या भवन्ति। यो ग्रहः प्रश्नफलदायी तस्येत्यर्थः। प्रवासगतस्यागमनकालो भवति। स्थिरोदये यस्मिन् राशौ रविः स्थितः तद्राशेरुदितांशान् पूर्ववद् गुणित्वा पूर्ववद् भागहृते(अ)वशिष्टा या संख्यावशिष्टा स कालो भवति। उभयोदये रविस्थितांशादुपरि यावन्मीनान्तांशान् पूर्ववद् गुणित्वा पूर्ववद् भागहृते या संख्यावशिष्टा स कालो भवति। एवमागमनकालपरिमाणे ज्ञाते आगमनहेतुश्चन्द्रश्चेत्तावन्तो मुहूर्त्ताः, क्षणाः, नाडीद्वयं। कुजश्चेत्तावन्तो दिवसाः, शुक्रश्चेत्तावन्तो(अ)र्थमासाः, गुरुश्चेत्तावन्तो मासाः, बुधश्चेत्तावन्त ऋतवः, सूर्यश्चेत्तावन्त्ययनानि, शनिश्चेत्तावन्तः संवत्सरा इति। सूर्ये बलयुते(अ)यं क्रमः। ग्रहचारवशाल् कालनियमो वा वक्रव्यः। यावता कालेन फलदायी ग्रहः स्वोच्च स्वक्षेत्रं मित्रक्षेत्रं वा प्रविशति तावता कालेनागच्छतीति वक्तव्यं। जातकवशाद्वा कालनियमं ब्रूयाल्। नष्टजातकं दृष्टजातकं वा ज्ञात्वा तस्य तस्य जन्मलग्नं वावगम्य यदि तत्र शुभग्रहः प्रविशति तत्र शुभं भवतीति ब्रूयाल्।।

अटवीक्षेत्रग्रामांबुगिरिग्रामापणावटारामाः
नद्या मुखं सरो(अ)र्ण्णव इत्युद्देशास्वजादीनां ।। ३

मेषादीनामटव्यादि प्रदेशाः। लग्नराशीस्थानं चन्द्रस्थितराशिप्रदेशं छत्रराशिप्रदेशं वा बलवशाद् द्रव्यप्रोषितभोजननष्टचिन्तासु स्थानं वदेत्।।

भूम्याकाशस्थानं राशीनामुपरिसन्निपातेन
नीचोच्चारातिसुहृद्दूरासन्नत्वमादेश्यं।। ४

भूमिस्थो राशिरारूढः। आकाशस्थः छत्रराशिः। तयोः संयोगाद्यदि छत्रराशिरारूढराशेः नीचराशिश्चेत् स प्रदेशो नीचपरिगृहीतः। उच्चराशिश्चेदुल्कृष्ट परिगृहीतः। दुरराशिश्चेद् दूरपरिगृहीतः। रिपुराशिश्चेद्रिपु परिगृहीतः। मित्रराशिश्चेन्मित्रपरिगृहीतः। सन्निकृष्टश्चेल् सन्निकृष्टः।।

चङ्क्रमणासनशय्याः स्थितिरित्युदयास्तहिबुकमध्येषु
स्वदिगभिमुखेन कर्म्म ग्रहभवनैः प्राणिनां वाच्यं।। ५

उदयराशिश्चरति। अस्तमयराशिरास्ते। चतुर्त्थराशिश्शेते। दशमराशिस्तिष्ठति। तेषां बलयुतेन राशिना तत्रस्थेन ग्रहेण वा प्रोषितस्य दिक्च कर्म्म च वक्तव्यं। अनेनान्यदप्युपदिश्यते - यदि कश्चित् कस्मै प्रयोजनाय गच्छति तदा फलदायी - ग्रहस्य या दिक् तदभिमुखाल् प्रवृत्तिरिति वक्तव्यं, तस्य कर्म्म च वक्तव्यं। तदारूढद्रेक्काणस्य हस्ते यद् द्रव्यं तच्च तस्य हस्ते भवति। तद्वा चङ्क्रमणादि योगश्च वक्तव्यः।।

अर्क्कस्यादूरगताः क्षिप्रं फलदा ग्रहास्तु बलवन्तः
दूरस्थाश्चिरकालाद्दीर्घादि गृहप्रमाणवशात्।। ६

अर्क्कद्वितीयतृतीयचतुर्त्थगता अदूरगताः। अन्यत्र गता दूरगताः। अदूरगता उक्तकालेन क्षिप्रं फलं दिशन्ति। दूरगताश्चिरकालाल्। चरराशिर्लग्नगतश्चेद्दीर्घकालान फलप्राप्तिः। स्थिरो(अ)ल्पकालेन। उक्तकालेनेत्यर्थः। उभय उक्तकालेन भवति।।

लग्नार्क्कचन्द्रभुक्तैर्होराभागांशकैर्यथासंख्यं
वर्षं मासं दिवसं ग्रहगत्या वा वदेल्कालं ।। ७

उदयहोरापिण्डं मेषादिरविभुक्तभागपिण्डं चन्द्रभुक्तांशकपिण्डञ्च पृथक् पृथक् स्थापयित्वा लग्नहोरापिण्डं आदित्यभागपिण्डेन गुणयेत्। आदित्यभागपिण्डं चन्द्रांशकपिण्डेन गुणयेत्। चन्द्रांशकपिण्डं लग्नहोरांशकपिण्डेन गुणयेत्। पिण्डत्रयं पञ्चत्रिंशदधिकेन शतेन लब्धाः, संवत्सरमासदिवसाः क्रमेण भवन्ति। ग्रहगत्या वा वदेत् कालं। एतदुक्तं भवति -

फलदायी ग्रहं उदयलग्नं वा स्वगृहं वा स्वोच्चं वा

यावल्कालेन प्रविशति तत्र फलं भवति ।।

चन्द्रसूर्यावपि वा विमृश्य वदेत् तत्र संवत्सराद्याः। स्थिरराश्युदये लब्धं चतुर्गुणं कुर्यात्। उभयराशिश्चेत् त्रिगुणीकुर्यात्। चरराशौ तदेव ग्राह्यं। शुभफलदायी ग्रहो यस्मिन् काले प्रविष्टो निर्ग्गतो वा भवति उभौ स्मर्त्तव्यौ। उभयस्थितग्रहश्चिन्त्यः। तस्मिन् काले फलप्राप्तिः। पुत्रलाभं पृच्छति चेत् पुत्राधिपतिर् वा पितृमातृग्रहश्च यस्मिन् काले अन्योन्यदृष्टौ वा सहगतौ वा भवतः तदा पुत्रप्राप्तिः। तद्भावसंबन्धाद् भवति।।

लग्नातीताद् वृत्तः प्राप्यादेष्यो विलग्नभाल्प्राप्तः
मध्यास्तहिबुकहोरान्तरगैर्वृत्तैष्यसंप्राप्ताः ।। ८

अथातीतानागतवर्त्तमानफलानि कालश्चोच्यन्ते - उदयाल् पूर्व्वोदितराशिवशादतीतफलञ्च कालञ्च वदेत्। लग्नवदारूढमुदयलग्नं कृत्वा लग्नकेन्द्रे त्रिकोणगत ग्रहवशात् शुभाशुभफलं कालञ्च वदेत्। तस्मिन्नेव पूर्वजन्मावस्थाञ्च वदेत्। उदयाद् द्वितीयराशिना एष्यं वदेत्। सर्वमुदयेन वर्त्तमानमुपदिष्टं। उदयराशेरप्यतीतभागेनातीतं पश्चाल्भागेन भविष्यल्भावं वदेत्। उदितांशेनात्यासन्नफलं वदेत्। तत्र यावल्कालेन शुभग्रहो वाप्यशुभग्रहो वा लग्नं प्रविष्टस्तद्दिने अतीतं शुभाशुभं वदेत्। प्रविश्यमानादप्येवं वदेत्। ग्रहैरप्येवं मध्यास्तहिबुकहोरान्तरगैरतीतानागतवर्त्तमानफलमुपदिष्टं। उदयराशिं स्फुटविलग्नं तन्नवमराशिं तावल्लग्नं कृत्वा तदन्तराळग्रहस्थितिवशात् शुभं वाप्यशुभं वा लाभालाभं वा ग्रहबलाल् प्रष्टुर्वदेत्। नवमादपरांशमारभ्य राशिचतुष्कान्तरगैर् ग्रहैर्भविष्यच्च, वदेत्। पञ्चमादारभ्य लग्नानुदितराशिभाग चतुष्कान्तरगैर्वर्त्तमानं वदेदिति।।

क्षणदिवसपक्षमासर्त्वयनाब्दानां नवांशकैर्वाच्यः
शशिभौमशुक्रसुरगुरुबुधरविसौरैः क्रमाद्भुक्तैः।। ९

एते कालाः - सूर्यस्य अयनं, चन्द्रस्य क्षणः, भौमस्य दिनं, बुधस्य ऋतुः, जीवस्य मासः, शुक्रस्य अर्द्धमासः, शनेर्वर्षः। एवं कालो वाच्यः। यो ग्रहः प्रश्नफलदः सो(अ)पि स्थिरराशौ यस्मिन्नवांशके स्थितः तन्नवांशकतुल्यसंख्यानि अयनादीनि ग्राह्याणीत्यर्थः। चिरकालाल्लब्धस्चेत् मेषाद्यंशकानि गण्यानि अथवा उक्तमेव कालं वदेत्।।

षष्ठोध्यायः

प्रष्टारूढं राशिं ये वीक्षन्ते ग्रहा बलोपेताः
तेषां क्षेत्रं प्रष्टुर्जन्मर्क्षं निर्द्दिशेन्मतिमान्।। १

अथ नष्टजातकमाह - प्रष्टा ज्ञातमज्ञातं वा स्वजन्मराशिं पृच्छति चेत् तस्य जन्मराशिं नक्षत्रं लग्नमतीतकालं च वदेत्। तेषां ज्ञानार्थमाह - प्रष्टा आचार्याद् यस्मिन् राशौ स्थितः तमारूढराशिं ये ग्रहा वीक्षन्ते तेषां बलयुतस्य क्षेत्रं तव जन्मर्क्षमिति वदेत् मतिमान्। ग्रहाणां बलाबलं निरूप्येत्यर्थः।।

ग्रहवीक्षणनिर्मुक्तं केन्द्रं बलवत्तमं भवेज्जन्म
विषमे पुरुषगृहे वा स्थित्वारेणेक्षिते मेषः।। २

ग्रहवीक्षणरहितमारूढकेन्द्रगं बलयुतं भवेज्जन्म। तत्रारूढादविषमराशौ वा पुरुषगृहे वा स्थित्वा भौमो लग्नमीक्षते मेषो जन्म। युग्मराशौ वा स्त्रीराशौ वा स्थित्वा यदि लग्नमीक्षते वृश्चिको भवेत्। आरूढोक्तं लग्नस्य भवतीत्यर्थः। शेषैः सर्वग्रहैरेवं विज्ञायते। आरूढलग्नाभ्यां जन्मलग्नौ विज्ञायते।।

युग्मे स्त्रीरासौ वा स्थित्वा यदि लग्नमीक्षते भौमः
जन्माष्टमराशिः स्याच्छेषैरपि चैवमूह्यते।। ३

अस्यार्थ उक्तः। द्विभवनग्रहस्य भौमस्योक्तवद् भवति। एकभवनयोश्चन्द्रादित्ययोरंशकविकल्पो विज्ञायते।।

पुरुषगृहं वारूढं पुरुषगृहस्था ग्रहा निरीक्षन्ते
तज्जन्म पुरुषराशौ विपरीते स्त्रीगृगे वाच्यं।। ४

उक्तलक्षणवलाभावे अनेन लक्षणेन कथयेत्। पुरुषराशिमारूढं पुरुषराशौ स्थिता बहवो ग्रहा वीक्षन्ते तत्र पुरुषराशौ जन्म। स्त्रीराशिगता वीक्षन्ते चेत् स्त्रीराशौ जन्म।।

स्त्रीग्रहभवने स्त्यर्क्षं पुरुषगृहे वापि भवति पुंराशिः
विषमे शशिनि नरर्क्षं स्त्रीराशिर्युग्मराशिगते।। ५

स्त्रीग्रहभवने उदितदृष्टे स्त्रीराशिः। पुरुषग्रहभवने उदिते दृष्टे पुरुषराशिः। सम्पूर्णचन्द्रे पुरुषराशि स्थिते पुरुषराशिर्ग्राह्यः। स्त्रीराशिस्थिते स्त्रीराशिः।।

यावन्तो(अ)त्रासीनाः प्राश्निकसहिताः प्रवक्तृयुक्ताश्च
सर्व्वे त्रिगुणापन्ना भगणविशुद्धास्ततो जन्म।। ६

एवं जन्मलग्ने निश्चयात् ज्ञाते नक्षत्रनिश्चयायाह - यावन्त इति। यावन्तो(अ)त्र प्रश्नकाले आसीनास्ते प्राश्निकप्रवक्तृयुक्तास्सर्व्वे त्रिगुणापन्नाः सप्तविंशति शुद्धाः, शिष्टं नक्षत्रं भवति। चरराश्युदये अश्विन्यादि, स्थिरराशौ मघादि, उभयराशौ मूलादि गणयेत्।।

जन्मर्क्ष प्रश्ने राशिग्रहजातिदर्शनश्रवणैः
कूर्म्मविभागैर्व्वापि ब्रूयाल् भागांशकैर्वर्क्षं।। ७

अयमपरो जन्मराशिनिर्द्देशः - राशिवशाद्वा ग्रहवशाद्वा, जातिदर्शनाद्वा प्रश्नकालश्रवणेन वा जन्मराशिं निश्चयाद्वदेत्। पूर्वोक्तलक्षणैस्संयुज्य तदनुरूपं वदेत्। ततो नक्षत्रं च वदेत्। कूर्म्मचक्रविभागैर्वा वदेत्। शास्त्रान्तरादवगन्तव्यं। उदितत्रिंशद्भागैर्वा नक्षत्रं वदेत्। चरस्थिरोभयात्मकेषु राशिषु क्रमेण नवांशका उदीयमाना अश्विन्यादि सप्तविंशतिनक्षत्राणि कुर्व्वन्ति। पूर्व्ववदश्विमघामूलादि।।

वाच्यं द्वादशभागैराद्ये भागे तदेव जन्म स्यात्
भवति द्वितीयभागे द्वितीयराशिस्तथा नेयः।। ८

अथ द्वादशभागैर्लग्ननिश्चयार्त्थमाह - वाच्यमिति। लग्ने प्रथमद्वादशांशे उदिते लग्नराशिर्लग्नं। द्वितीयांशे द्वितीयराशिः।।

यतमि उदेति नवांशस्ततिमेंशे जन्म निर्द्दिशेल् प्रष्टुः
पृच्छकजन्मर्क्षवशात्तस्य कुलस्यापि जन्म वाच्यं हि।। ९

अत्र लग्ने निश्चिते लग्ननवांशक उच्यते - लग्ने यतिमो नवांश उदीयमानः क्रमाल् गणनया ततिमेंशके जात इति। पृच्छकजन्मराशिवशात्तस्य कुलजातानां जन्मानि वाच्यानि।।

पञ्चमचतुर्त्थसप्तमतृतीयनवमानि षष्ठसहितानि
सुतमातृदारसोदरपितृशत्रूणाञ्च जन्म वदेत्।। १०

कथमिति चेत् पृच्छकस्य राशिमवधिं कृत्वा तत्पञ्चमादयः सुतादीनां जन्मराशयो भवन्ति। यदि पुत्रस्य जन्मर्क्षं पृच्छति चेत् पञ्चमराशिमारूढं कृत्व उक्तलक्षणैर् जन्म वदेत्। एवं शेषाणामपि वदेदित्येके। कृष्णाचार्यस्तु लग्नोदितनवांशकैः पञ्चमादिभानां मयूखान् पृथक् पृथक् संगुण्य सप्तविंशतिभिर्हते शेषं पुत्रादीनां नक्षत्रं वदेत्।।

भौमभृगुसौम्यचन्द्रा रविगरुसौरोरगास्तु दिवसानां
एकादीनां पतयो मेषाद्या राशयो(अ)प्येवं।। ११

तिथिजन्मप्रहरज्ञानार्थमाह - तत्र जन्मतिथिज्ञानं क्रियते। कुजादीनामष्टानां प्रतिपादयो(अ)ष्टौ तिथयः। पुनरपि कुजादीनां नवम्यादयः राहोरप्यमावास्या। तेषां कुजादीनां मेषाद्या राशयः। राहोः कुंभः। येन ग्रहेण निमित्तभूतेन जन्मराशिनिश्चयः कृतः तथैव तस्य तिथिर्जन्मतिथिरिति ज्ञातव्या।।

तिथयस्समविषमाः स्युर्यस्यां तिथ्यां गतो(अ)श्विनीं सूर्यः
विषमे स्थितेन शशिना विषमो युग्मे समो दिवसाः।। १२

तिथिद्वये संयुक्ते विशेषादेकतिथिनिश्चयार्थमाह - तिथि इति। यदि युग्मतिथिषु रवेर्मेषसंक्रमश्चेत् तदा नवम्यादयो ग्राह्याः कुजादीनां यथासंख्यं। यद्योजतिथिषु तदा प्रतिपादयः। एवं यथाक्रमं पुनः पुनः मेषप्राप्तिवशाल् ज्ञेयं। अथ सम्पूर्णचन्द्रवशान्निर्णयः क्रियते। प्रश्नकाले ओजतिथिषु चन्द्रः तदा प्रतिपादयः युग्मतिथिषु नवम्यादयः। एवं तिथिनिश्चये कृते जन्मप्रहरनिश्चयः कथ्यते - कुजादीनामष्टानामष्टौ यामाः। यो ग्रहो निमित्तभूतो जन्मराशिनिश्चये तस्य प्रहरो जन्मप्रहर इति वक्तव्यं।।

पुरुषालयग्रहाणां ज्योत्स्नापक्षो(अ)थ योषितामपरः
मेषादीनां मासा वैशाखाद्याः क्रमेणोक्ताः।। १३

अथ पूर्व्वपक्षापरपक्षनिर्णयायाह - पुरुषग्रहदर्शने पुरुषराश्युदये पूर्व्वपक्षः। स्त्रीग्रहदर्शने स्त्रीराश्युदये अपरपक्षः। प्रश्नकाले मेषादिराशिषु लग्नगतेषु यथासंख्यं वैशाखाद्या मासा जन्मनि भवन्ति।।

आरुढमात्मनो वा ग्रहा विलग्नञ्चते पुनः कार्याः
नक्षत्रमूह्यमेवन्त्वथवा श्रेयान् परः कल्पः ।। १४

अयमपरो नष्टजातकविधिः। यदि कश्चिज्जातकं पृच्छति पृच्छकं दैवज्ञमात्मानं पृच्छकं कृत्वा आत्मन आरुढराशिं यो ग्रहा वीक्षन्ते तस्य राशिः पृच्छकस्य जन्मराशिः। यदि गुरुर्वातिगुणी वा पृच्छति चेदेवं विधिः। एवं लग्नं चिन्त्यं। एवं कूर्म्मविभागज्ञानेन यन्नक्षत्रं श्रेयस्तदेव नक्षत्रं भवति। यस्मिन् राशौ नक्षत्रे वा बहूनि लक्षणानि सन्ति तदेव ग्राह्यं।।

यमशुक्रभूमितनयाश्शशाङ्कचन्द्रात्मजामराचार्याः
शिशिरादीनां पतयो द्रेक्काणाश्चैवमेतेषां।। १५

मासे ज्ञाते ऋतुनिश्चयः। माघफाल्गुनौ शिशिरं कृत्वा शनैश्चरादीनां षण्णां षट्ऋतवः। ग्रीष्म एव सूर्यस्यापि। तत्र तेषां द्रेक्काणोदयेषु तेषामुदयेषु च शिशिरादयो ज्ञातव्याः।।

अन्यतमग्रहराशिन्त्वयनवशाच्चरति रविरतो(अ)न्यैस्मिन्
तस्यर्त्तुरसौ ज्ञेयो ग्रहस्य मासाः क्रमेणोक्ताः ।। १६

अन्येति - यस्मिन् द्रेक्काणे सूर्यस्तिष्ठति तद्रेक्काणाधिपतिवशाद् ऋतुर्ज्ञातव्यः। ऋतुस्थितविकल्पश्चायं। द्रेक्काणाधिपतिः सूर्यं पश्यति चेदेयं क्रमः। अन्यथा पूर्व्वोक्त एव।।

पूर्व्वविभागे राशेरुदयगयनं दक्षिणं ततः शेषे
द्रेक्काणपूर्व्वभागे मासः पूर्व्वः परो(अ)न्यस्मिन्।। १७

अयननिश्चय उच्यते - पूर्व्व इति। ओजराशिषु प्रथमहोरोदये उत्तरायनं। युग्मराशिषु प्रथम होरोदये दक्षिणायनं। व्यत्यये चायनस्यापि व्यत्यासः। उदितद्रेक्काणं द्विधा कृत्वा प्रथमभागे प्रथममासः द्वितीये द्वितीयः। तञ्च त्रिंशद्भागं कृत्वा तिथिविभागो ज्ञातव्यः। रविवशादृतुज्ञाने रविस्थितद्रेक्काणानुरुपं तिथिर्ज्ञेया।।

दिनबलराशिविलग्ने ग्रहे तु पृच्छेन्नरः स निशि जातः
निशि बलिनि दिने जातस्त्रिकोणकक्ष्यं गते चन्द्रे।। १८

ऋतुमासायनानामन्यथात्वे तदनुरुपो व्यत्यास उच्यते - दिनेति। दिवा जातो निशि जातो वेति संशये कुंभादिषु षट्सु राशिषु निशाबलेषु निशिबलग्रहदर्शने च दिवाजातः। सिंहादि दिनबलराशिषूद्यत्सु दिनबलग्रहदर्शने च विपरीतं। रात्रौ जातः। बलवशान्निर्णयः। लग्नात् पञ्चमे चन्द्रे बलयुते दिवाजातः, नवमे निशि जातः।।

नवमो राशी रात्रौ सिवसे जातस्य पञ्चमो राशिः
द्रेक्काणो वा यतिमे लग्नात्ततिमे भवेज्जन्म।। १९

यदि नवमो राशिर्निशिबलश्चेद् बलयुत एव दिवा जातः पञ्चमो राशिर्दिवाबलश्चेन्निशि जन्म। विपरीते विपरीतं। अथ द्रेक्काणनिश्चयः - लग्ने प्रथमे यो द्रेक्काणे उदेति प्रथमादितः - तस्मिन् द्रेक्काणोदये जन्म।।

प्रष्टुर्वयःप्रमाणं ज्ञात्वा प्रतिलोममानयेच्चारैः
असन् ग्रहाः प्रसूतौ ततः परं करणमायोज्यं।। २०

पूर्व्वोक्तकालैर्वा शास्त्रान्तरमुपलभ्य वा प्रष्टुर्वयःप्रमाणं ज्ञात्वा प्रतिलोमं गणयेत्। प्रतिलोमं विपरीतं। उक्तनक्षत्र तिथिलग्ने जन्मनिश्चयं कृत्वा ततः सर्व्वग्रहाणां तत्कालस्फुटं कृत्वा जातकं गणयेदित्यर्थः।।

सप्तमोध्यायः

होरांशद्रेक्काणा भागघ्ना लग्नवर्ग्गविवरौजे
मूलान्तरान्तरुना मासा द्विगुणास्तु ते(अ)तीताः।। १

प्रष्टुर्वयःप्रमाणं ज्ञात्वा क्वचिद्विन्यस्य तदा लग्नलिप्ताः द्विगुणीकृत्य वयःप्रमाणेन गुणयित्वा महत्यल्पं विशोध्य शिष्टा मासा भवन्ति। द्विगुणिताः प्रश्नराशौ विषमे

गतमासाः। समे राशौ आगामिमासाः। ते द्वादशहृता वर्षा भवन्ति। त्रिंशद्गुणिता दिवसा इति।।

होरांशद्रेक्काणा भागघ्ना लग्नवर्ग्गणा च तयोः
विवरो मासादि स्यादोजे(अ)तीतं युजित्वेष्यं।। २

उदयलग्नं त्रिधा कृत्वा एकं भागीकुर्यात्। अपरमंशं कुर्यात्। अपरं द्रेक्काणं कुर्यात्। एवं त्रीन् राशीन् अन्योन्यगुणितानुदयलग्ने उदितत्रिंशद्भागैर्हृत्वा संयोज्य उदयलग्नं लिप्तीकृत्य लग्नवर्ग्गं कृत्वा अधिकान्यूनं विशोध्य भागैर्भक्त्वा लब्धं षष्ट्या विभज्य लब्धा मासा भवन्ति। तान् मासान् द्वादशभिर्हृत्वा संवत्सरो भवति। मासशिष्टं त्रिंशदादिगुणिता द्वादशहृता दिवसा भवन्ति। तथा नाडिका भवन्ति।।

एवमायुःपिण्डं लग्ने विषमराशौ गतं भवति। समराशौ लग्नगते आनीतमायुःपिण्डं गम्यं भवति। एवं गतं वा गम्यं वा प्रष्टुरायुः परिमाणं वदेदिति।।

विषमेषु पञ्च भागाः पञ्च तथाष्टौ च सप्त पञ्चाख्याः
भौमयमार्यबुधानां भृगोश्च युग्मेषु विपरीतं।। ३

अथ त्रिंशांशकविधिरुच्यते विषमेष्विति। मेषादि विषमराशिष्वादौ पञ्च भागाः कुजस्य, पुनः पञ्चभागाः यमस्यः, तस्मादष्टभागाः गुरोः, ततः सप्तभागा बुधस्य, अन्त्यपञ्चभागाः शुक्रस्य। युग्मराशिषु विपरीतं। पूर्वं पञ्चभागाः शुक्रस्य, पञ्चाद् बुधस्य, पुनर्जीवस्य, ततो मन्दस्य, अन्त्ये भौमस्येति।।

गृहभागेष्ववकाशो भोजनविधिशयन मैथुनेषु तथा
वाच्यो वर्ण्णोल्ककर्षो विप्रादीनां पुरोक्तानां।। ४

गृहेति। गृहभागेष्ववकाशः दीर्घह्रस्वसमभागेषूदितेषु स्थानावकाशं वदेत्। भोजनविधौ, शयनविधौ, मैथुनविधौ च त्रिंशांशकनाथवशात् पूर्व्वोक्तविप्रादीनां गृहे भोजनादयः संभवन्तीति प्रष्टुर्वदेत्। तद्यथा गुरुः स्वत्रिंशांशके शुक्रत्रिंशांशके वा स्थित्वा लग्नं पश्यति चेद् ब्राह्मणगृहे भोजनं शयनं मैथुनमपि। एवमन्येष्वपि अनुसन्धातव्यं।।

प्रेतार्त्थवादतस्करयुवतिचतुष्पाद् दुहृतृचिन्तायां
सौमबृहस्पति सौम्यांगाराकभृगुसूर्यशीतकराः।। ५

सौरादीनां क्रमादेते भावाश्चिन्त्याः। भोजन मैथुन चिन्तासु ग्राह्याः। तत्र मन्दवीक्षितयुते प्रेतविषयं भोजनं रविणा चतुष्पाद्गृहे वदेत् शशिना दुहित्रङ्गं मात्रङ्गं वा भुक्तमिति वदेत्। एवमन्यान्यप्यूह्यन्ते।।

पर्यङ्कस्य द्वे द्वे भवने गात्रेषु पादकेष्वेकं
होरान्त्याद्याः शिरसि स्थाप्याः सव्यापसव्येन।। ६

अथ शयनशुभाशुभमाह। जातस्य वान्यस्य वा - पर्यङ्कस्य द्वे द्वे। पर्यङ्कस्य गात्रेषु पादेषु च पूर्वोक्तन्यायेन भूचक्रं स्थापयित्वा ग्रहैः शुभाशुभं दृढादृढत्वञ्च वदेत्। चरचक्रोदयराशिं शिरसि स्थापयित्वा सप्तमराशिं वक्त्रे स्थापयित्वा ग्रहस्थितगात्रे जातस्य व्रणभूषणलक्ष्मकादीनि वदेत्। मैथुने नखदन्तव्रणादीनि वदेत्। मैथुने नखदन्तव्रणादीनि वदेत् प्रष्टुरिति।।

होराकेन्द्रे कुर्यादिन्दुजळबधिरकुब्जवामनकान्
अजवृषमिथुनकुळीरे द्वादशभे वामकाणन्तु।। ७

उदयकेन्द्रगतश्चन्द्रः जळबधिरकुब्जवामनकान् जातान् करोति। सम्पूर्ण्णचन्द्रो न चेत् मेषवृषमिथुनकुळीरे द्वादशभवने वामकाणा भवति। तत्र चन्द्रे स्थिते निश्चयाद्वदेद्।।

दिनकृद्दक्षिणकाणं द्वादशगः फणिपतौ तु केन्द्रस्थे
न स्युर्गुरुभृगुसौम्याश्चतुष्टे वा त्रिकोणे वा।। ८

जातस्य द्वादशभवनगतो रविर्दक्षिणकाणं करोति। फणिपिः केन्द्रगतश्चेदेतल्लक्षणं शुक्रगुरुबुधाः केन्द्रत्रिकोणराशिषु न सन्ति चेत्। पूर्वोक्तल्लक्षणेषु बलयुताः केन्द्रत्रिकोणगताश्चेन्नैत्रकाणत्वं न संभवति। किञ्चिद्रोगं वदेत्। शुभस्तदपि नाशयति।।

मृगराड् वृश्चिककन्या वृषो(अ)प्यपत्यालयं कदाचित्स्युः
चन्द्रस्थानं वा स्यादल्पापत्यो भवेल्प्रष्टा।। ९

प्रश्ने वा जातके वा मृगवृषवृश्चिककन्याः पुत्रस्थानगताः स्युरशुभयुताः प्रष्टारं पुत्रहीनं कुर्वन्ति। अथवा चन्द्रस्थाने पुत्रस्थानगते प्रष्टा अल्पापत्यो भवति। एवं मूर्त्यादिद्वादशभावाश्चिन्त्याः।।

अष्टोत्तरशतमंशं भुञ्जानश्चन्द्रमा नृणां क्रमशः
शुभमशुभं वा कुरुते द्वादशगणसंश्रयान्नियतं ।। १०

अष्टोत्तरशतसंख्यानामंशानां यस्मिन्नंशे चन्द्रः स्थितः तदंशं विमृश्य शुभाशुभं जीवोपायञ्च वदेत्, शुभांशे शुभं, अशुभांशे अशुभं वदेत्। प्रथमतृतीयाद्योजांशे शुभं, युग्मांशे(अ)शुभं। एवं द्वादशांशादपि ज्ञेयं।।

नरजन्मराशिभागे प्रश्नोल्पन्ने निशाकरो(अ)त्रस्थः
अंशाश्रयफलमखिलं तस्मै चन्द्रःप्रदाता स्यात्।। ११

नरस्य जन्मराशौ यस्मिन नवांशे चन्द्रः स्थितः प्रश्ने वा चन्द्रः स्थितः नवांशफलं तस्मै प्रष्टे अंशाश्रय फलमखिलं सर्व्वं ददाति। चन्द्रराशिबलाद्राशिफलं वदेत्। अत्रस्थ उदयकेन्द्रगतश्चन्द्र इत्यर्थः। पुरुषस्य जन्मलग्नस्य प्रश्नलग्नस्य प्रश्नचन्द्रस्य च संवादे सत्यष्टोत्तरशतमपि फलमिति नर(जन्म)राशिरित्यनेनोक्तं।।

सौम्यानामन्यतमस्तस्मिन् काले समग्रबलवीर्यः
स्याद्यस्य नवमराशौ तस्य भवेदिष्टधनलाभः ।। १२

प्रश्ने वा जातके वा यस्य नवमराशौ शुभानामेकः स्थितश्चेत् तस्येष्टधनलाभं करोति। चिन्तितस्य लाभो भवतीत्यर्थः। अशुभेषु विपरीतं। तेन राशिना विधिविहितं ज्ञायते।।

क्रूरः षष्ठे लग्नाल्स्वांगविभागे करोति वैकल्यं
केन्द्रत्रिकोणराशिषु न स्युर्गुरुसौम्यभृगुपुत्राः।। १३

लग्नाद्वा आरूढाद्वा लग्नात् षष्ठभवनगतः क्रूरः स्वोक्तदेहविभागे वैकल्यं करोति। अतिक्रूरश्चेद् भंगं करोति। तत्र केन्द्रत्रिकोणराशिषु बलयुता गुरुसौम्यशुक्रा न स्युश्चेत्। यदि सन्ति तत्रांगवैकल्यं न संभवति।।

क्रूरैर्निहते चन्द्रे सौम्यैरनवेक्षिते शुशुरमाता
दुःखेनासौ जीवति राश्याकृतिजं फलं भुक्त्वा।। १४

क्षीणचन्द्रे क्रूरयुतवीक्षिते अरिष्टयुते षष्ठाष्टमव्ययगते सौम्यवीक्षिते मात्रा हीनः शिशुर्जीवति। लग्नं सौम्यवीक्षितं चेद्राश्युक्तफलं भुक्त्वा दुःखेन जीवति। राशिग्रहाणां फलं मूलञ्च मूलचिन्तासु वक्ष्यामि।।

कुर्युः शुभा वियोनिं धनायकेन्द्राश्रिताः पुनर् न स्युः
होरा विषमे सौरिः करोति पुंजन्म लग्ने वा।। १५

अथैवं लक्षणे वियोनिश्चिन्तितो वा जातो वा भवेत। वियोनिः मनुष्यादन्या, पशुपक्षिसरीसृपादयः। धनायकेन्द्रादन्यत्र गताः शुभा वियोनिं कुर्युः। पापा धनायकेन्द्रगताश्चेत्तत्रापि वियोनिं वदेत्। उदयाद्वा आरूढाद्वा विषमराशिगतो मन्दः पुंजननं करोति। विपरीते स्त्रीजननं। लग्नगतश्चेद्राशिवशाच्चिन्त्यं। सर्वेषां ग्रहाणां बली मन्दश्चेदेवं लक्षणं।।

निधने भौमो न स्याल्लग्ने चार्केण संयुते प्रश्ने
केन्द्रे बलवान् जीवः करोति दीर्घायुषं पुरुषं।। १६

लग्ने अर्क्कयुते प्रश्ने केन्द्रे जीवयुते भौमो(अ)प्यनष्टमगतः पुरुषो दीर्घायुर्भवति। जातस्यापि वदेत्।।

अष्टमोध्यायः

ग्रहगृहयोर्दिशमर्क्को ज्योतिश्चक्रे भ्रमन् यदाश्रयति
दिवसनिशोस्सा वेळा निर्द्देश्या सर्व्वकार्येषु।। १

अथ दिवसे निशि वा कस्यां वेळायां कार्यसिद्धिरित्यवगमनार्त्थमाह - ग्रहोक्तदिशं वा राश्युक्तदिशं वा ज्योतिश्चक्रे भ्रमन् सूर्यो यदाश्रयति दिवसे वा रात्रौ वा सूर्योदितांशसमा नाडिका सर्व्वकार्येषु वक्तव्या इति।।

ग्रहवीक्षणासनाभ्यां राशेर्भावो(अ)नुवर्त्तते ग्रहजं
ग्रहवीक्षणयुतिरहितो राशिः स्वं भावमाश्रयति।। २

ग्रहवीक्षणयुतेन ग्रहजभावप्रधानं राशिफलं वदेत्। ग्रहवीक्षणयुतिरहितो राशिः स्वं भावं सर्व्वमाश्रयतीति नष्टमुष्टिचिन्तालाभालाभेषु ग्राह्यं।।

चन्द्रस्थानं भौमः पश्यत्यात्मा भृगौ कुटुंबं स्यात्
भ्राता सौम्ये चन्द्रे माता सूर्ये भवेल् पुत्रः।। ३

चन्त्रस्थानराशिं भौमः पश्यति चेद् आत्मचिन्तां करोति। द्रव्ये हृते चोरः स्वयमेव भवति। एवमन्यैश्चन्दरस्थानयुतवीक्षणादेवं वदेत्। शुक्रे कुटुंबं, बुधे भ्राता, चन्द्रे माता, सूर्ये पिता वा पुत्रो वा ग्रह्यः।।

भार्या गुरुणा दृष्टे दिनकरपुत्रेण जायते शत्रुः
आत्मादौ द्वादशके क्रूरा नेष्टाश्शुभास्त्विष्टाः।। ४

गुरुणा भार्या पुत्रो वा। दिनकरपुत्रेण शत्रुरिति। आत्मादिद्वादशभावेषु क्रूरग्रहा रोगमरणव्ययानि कुर्व्वन्ति। सौम्याः सुखप्रमोदलाभान् कुर्व्वन्ति।।

भौमो रोगं कुरुते भोगं शुक्रस्त्वरोगतां सौम्यः
सौरो मरणं दिनकृन्नाशं चिरजीवनं जीवः ।। ५

तल्कथमिति चेत्, भौमादयो रोगादीन् कुर्व्वन्ति।।

भूयिष्ठं मेषादौ मेषादावागते तदात्मा स्यात्
वृषभादावायाते धनाद्यमित्येवमादेश्यं।। ६

भूमिष्ठं मेषादौ आरूढगते उदयगते वा तत्तदादिभावश्चिन्त्याः। फलञ्चादेश्यं।।

धनभावेनायेते(अ)रिग्रहभवने(अ)रिणां धनं नश्येत्
भ्रातृपितृमातृपुत्रांगनादिभिस्तद्विरोधः स्यात्।। ७

धनस्थाने अरिग्रहे वा अरिग्रहराशौ वा प्राप्ते शत्रुणा धनं नश्येत्। ग्रहेणापि वदेत्। सूर्यः शत्रुक्षेत्रगतश्चेत् पितृविरोधः संभवेत्। द्वादशभावेषु यत्र स्थितः तद्भावं नाशयति। बन्धुस्थानगतो लाभगतश्चेत् प्रचुरं लाभं करोति। एवमन्येषामपि वदेत्।।

नवमोध्यायः

चन्द्रारोरगसौरैर्धातुमूलं किलार्क्कशुक्राभ्यां
जीवो जीवबुधाभ्यां मेषाश्चिन्यादि धात्वादि।। १

अनेन ग्रहाणां धातुमूलजीवभावमाह। केन्द्रत्रिकोणगताश्चन्द्रशनिकुजनागा धातुचिन्ताकराः, अर्क्कशुक्रौ मूलचिन्ताकरौ, जीवबुधौ जीवचिन्ताकरौ।

मेषादिचरस्थिरोभया धातुमूलजीवाः। अश्विन्यादिषु नक्षत्रेषु क्रमाद्धातुमूलजीवा ज्ञेयाः।।

स्वांशद्रेक्काणं वा स्वामी पश्येतयो स्थितो धातुः
परवर्ग्गस्थो जीवो मूलं परवर्ग्गमस्वस्थं।। २

धातुग्रहो मूलग्रहो जीवग्रहो वा स्वांशस्वद्रेक्काणस्वभवनगतो वा दृष्टो वा भवेत् कर्त्तुः स्वस्य तत्भवति। परवर्ग्गस्थे ग्रहे वा परस्य भावश्चिन्तितः। तत्र जीवग्रहः परवर्ग्गस्थो(अ)प्यन्यवर्ग्गजीवचिन्तां करोति। मूलग्रहे परवर्ग्गस्थे परवर्ग्गगतं मूलमस्वस्थमिति वदेत्।।

आग्नेयद्रेक्काणा ह्याग्नेयक्षेत्रमाश्रिता ये स्युः
आग्नेयग्रहदृष्टाः कुर्युर्धातूत्भवां चिन्तां।। ३

ये क्रूरग्रहद्रेक्काणाः क्रूरराशिगता ग्रहाश्च क्रूरयुतदृष्टाश्च लोहभाण्डचिन्ताकराः द्रेक्काणाः धातुचिन्तां कुर्युः।।

मूलांशद्रेक्काणा मूलानां क्षेत्रमाश्रिता ये स्युः
मूलग्रहसन्दृष्टाः कुर्युर्मूलोत्भवानां चिन्तां।। ४

मूलराश्यंशद्रेक्काणा मूलफलधारिणश्च मूलराशिस्थिता ग्रहाश्च मूलग्रहयुतदृष्टाश्च द्रेक्काणा मूलचिन्तां कुर्युः।।

जीवांशद्रेक्काणा जीवानां क्षेत्रमाश्रिता ये स्युः
जीवग्रहसन्दृष्टाः कुर्युर्जीवोत्भवां चिन्तां।। ५

जीवग्रहांशद्रेक्काणाश्च जीवग्रहक्षेत्रमाश्रिता द्रेक्काणा जीवग्रहदृष्टयुता राशिद्रेक्काणा अपि जीवचिन्तां कुर्युः। राश्यंशकग्रहद्रेक्काणानां बलाधिकेन धातुमूलजीवविकल्पो विज्ञायते। तदुच्यते - प्रश्नकाले यद् दृष्टं यद् श्रुतं प्रष्टा यत् स्पृष्टं यच्छकुनकृतं तत्तद् भावश्चिन्तासु वक्तव्यो(अ)त्र।।

ननु ग्रहस्थितराश्यंशकभेदात् कथं योनिविज्ञायते, तदुच्यते - धातुमूलजीवा एकैकशस्त्रिविधा भवन्ति। केवल धातुश्च धातुमूलश्च धातुजीवश्च त्रिविधो भवति। केवलमूलञ्च मूलजीवञ्च मूलधातुञ्च तदपि त्रिविधं भवति। केवलजीवञ्च जीवधातुश्च जीवमूलञ्च सो(अ)पि त्रिविधो भवति। ते नवधा भवति। धातुमुक्तन्यायेन वदेत्। तत्र धातुग्रहो मूलराशिगतश्चेद् धातुनिर्मितं वृक्षं वा फलं वा वल्ली, वा कुसुमं वा भवति। अथ धातुग्रहे जीवराशिस्थिते धातुरचिरं जीवं भवति। जीवविशेषं जीवचिन्तासु वक्ष्यामि। तत्र यदि मूलग्रहो मूलराशिगतः शुद्दमूलं करोति। यदि मूलग्रहे धातुराशिस्थिते दग्द्धमूलं फलं भस्मं कर्प्पूरं हिङ्गु च वा मूलधातुर्भवति। मूलपे जीवयुक्ते मूलजीवार्त्थकृतं फलमूलसस्यं। जीवग्रहे जीवराशिगते शुद्धजीवो भवति। जीवग्रहे धातुराशिगते जीवधातुः - श्रोत्रमलं, नेत्रमलं, मूत्रपुरीषञ्च मांसरुधिरञ्च रोमनखञ्च देहोत्भवं सर्व्वं भवति। जीवमूलं जीवमेव मूलं भवति। यन्मञ्चुलिका च वृक्षरजन्यादि ज्ञेयं। अन्य जीवयुक्तप्राणी स्वदेहमूलो दृश्यते।।

यस्य ग्रहस्य लग्नं तस्मादारभ्य योनिपर्यायः
यावल् प्रवर्त्तते(अ)सौ ग्रहस्तु तत्र स्थितो भवति।। ६

यस्य धातुमूलविकल्पस्य ग्रहस्य उदयोवर्त्तते तस्मादारभ्य योनिपर्यायश्चिन्त्यः। उदयगतो ग्रहो यावत् प्रवर्त्तते तत्र स्थितांशद्रेक्काणयोर्निर्विज्ञायते। केन्द्रत्रिकोणगतैरप्येवमेव वदेदित्यर्थः। अथवा लग्नाधिपतिस्थितद्रेक्काणसमयोर्निं वा वदेत्।।

अंशा ये नवसंज्ञा विषमे स्युर्धातुमूलजीवकराः
जीवाद्यास्समसंख्ये चन्द्रे लग्नादिके(अ)प्येवं।। ७

ये नवांशका उक्तास्ते विषमराशौ सर्वत्र आद्यांशादारभ्य धातुमूलजीवचिन्तां कुर्वन्ति। ते(अ)पि समराशौ उल्क्रमाज्ज्ञेयाः। चन्द्रस्थितनवांशेन लग्नोदितेन वा प्रष्टुश्चिन्तितं वदेत्। आदिशब्देन अतिबलयुतग्रहश्च चिन्त्यः।।

ताम्रेष्टकाकपालप्रवाळमृद्धूळयो धराजस्य
शशिकान्तलवणशंखस्फाटिककांस्यत्रपूणीन्दोः।। ८

कुजस्योक्ताः षड्धातवः। उदितराशौ पञ्चपञ्चांशेषूदितेषु एकमेकं क्रमाद्धदेत्। एवं चन्द्रस्यापि वदेत्।।

रक्तमणिकनककाचा हरितालमनश्शिलाश्च देवगुरोः
वैक्रान्तिकमणिमरतकमृत्स्नाकाचा बुधस्योक्ताः।। ९

जीवस्योक्तान् पञ्च धातून् लग्ने षट्षड्भागेषूदितेषु एकमेकं क्रमाद्धदेत्।।

रजतस्फाटिकमुक्ता वैडूर्यश्चापि दैत्यपूज्यस्य
सौरस्याञ्जनलोहे नीलं सीसं तथैव राहोश्च।। १०

शुक्रस्योदितराशिं चतुर्भागं कृत्वा रजतादीन् क्रमाद्धदेत्। सौरस्यापि शुक्रवच्चतुर्भागं कृत्वा अञ्जनादीन् वदेत्। सौरस्योक्तान् धातून् राहोश्चापि वदेत्।।

पाषाणसूर्यकान्तारकूटवैडूर्यसीसकानि रवेः
क्रूरेक्षणेन धाम्याः सौम्यग्रहवीक्षणे(अ)धाम्याः।। ११

सूर्यस्य पाषाणसूर्यकान्तादयः षड्धातवः। तानुदितराशौ पञ्चपञ्चभाषेषूदितेषु क्रमाद्धदेत्। तत्र फलदो ग्रहः क्रूरवीक्षितश्चेद् दग्द्धा वा शोधिता वा धातवो भवन्ति। सौम्यवीक्षणे(अ)दग्द्धा भवन्ति। केन्द्रत्रिकोणगतैर्ग्रहैरधिकबलयुतग्रहवशादुक्तान् धातून् नवरत्नानि च वदेत्। मिश्रग्रहवीक्षिते मिश्रं वदेत्। प्रष्टा यद्यत् प्रश्ने पृच्छति तत्तद्भावदर्शिते दृष्टे तत्तदस्तीति वदेत्। संभवतीत्यत्यर्थः।।

मणिकनकरजतमुक्तातामायसशुक्तयो(अ)परैर्विहिताः
शशिभौमजीवभार्ग्गवदिनकृद्यमसोमतनयानां।। १२

केचिदेवं वदन्ति - मणिश्चन्द्रस्य, कनकं भौमस्य, रजतं जीवस्य, मुक्ता शुक्रस्य, ताम्रं सूर्यस्य, आयसं शनेः, शुक्तिर् बुधश्चेति। पूर्व्वोक्तधातून् वराधममध्यमान् उच्चस्वक्षेत्रमूलत्रिकोणमित्रशत्रुनीचेषु ग्रहेस्थिते विमृश्य नष्टमुष्टिचिन्तालाभेषु वदेत् केन्द्रत्रिकोणगतैर्ग्रहैर्बलयुतैरित्युपदेशः।।

सूर्यांशकसंयुक्तं भौमद्रेक्काणमवनिसुतसूर्यौ
पश्येतां केन्द्रगतै धातुर्धाम्यो विनिर्द्दिष्टः।। १३

अथ द्रेक्काणांशकगतैर्धातुविसेषः कथ्यते - सूर्यांशकसहितं कुजद्रेक्काणं कुजसूर्यौ पश्येतां चेदथवा बलिनौ केन्द्रगतौ वा चिन्तितधातुर्धाम्यो भवतीत्येवं प्रष्टुर्वदेत्।।

सोमद्रेक्काणे वा जलचरभवनाश्रये(अ)थवा नियतं
जलयोनिग्रहदृष्टे धातुरधाम्यो(अ)त्र विज्ञेयः।। १४

सोमांशद्रेक्काणे वा जलचरद्रेक्काणे वा जलराशिसंभवे वा शुक्रचन्द्रदृष्टे धातुरधाम्यो भवति। अदग्द्धक इत्यर्थः। प्रवक्ता विमृश्य वदेत्।।

रविभौमद्रेक्काणे भौमांशयुते सुवर्ण्णमिति वाच्यं
यदि वीक्षेते बलिनौ सुरगुरुभौमौ स्ववर्ग्गस्थौ।। १५

रिवद्रेक्काणे वा भौमद्रेक्काणे वा भौमांशकसंयुते स्ववर्ग्गस्थितगुरुभौमवीक्षिते यदि सुवर्ण्णचिन्ता वक्तव्या।।

गुरुभौमांशकयुक्ता यमळा जलजा निरीक्षितास्ताभ्यां
कुर्युः सुवर्ण्णचिन्तां वियोनिधातूत्भवो दृष्टः।। १६

उभयराशौ गुरुभौमयोरेकस्यांशोदये वा जलराशियुते वा गुरुभौमाभ्यां दृष्टे सुवर्ण्णचिन्ता वक्तव्या। पूर्व्वोक्तधातुषु वियोनिधातुर्वा विज्ञेयः।।

लग्नेषु भौमभागेषूर्व्वीतयश्च भवति केन्द्रस्थः
देवगुरुर्वा केन्द्रे सुवर्णचिन्तां विजानीयात्।। १७

कुजद्रेक्काणोदये कुजो वा गुरुर्वा केन्द्रस्थितः सुवर्ण्णं भवति चिन्तितं।।

एतेषु चैव लग्नेष्वार्किकः शुक्रो निशाकरश्चैव
पश्यन्ति बलसमेताश्चतुष्टये वा भवेद्रूप्यं।। १८

भौमद्रेक्काणेषूदितेषु चन्द्रशुक्रशनिनिर्द्दिष्टेषु बलयुताः केन्द्रगता वा रूप्यं चिन्तितमिति वदेत्।।

गुरुवर्ग्गे लग्नगते देवाचार्ये च केन्द्रमुपयाते
दृष्टे चारबुधाभ्यां सुवर्ण्णमिति चिन्तितं ब्रूयात्।। १९

गुरुवर्ग्गे लग्नगते देवगुरौ केन्द्रस्थिते आरबुधवीक्षिते चिन्तितं मुख्यसुवर्ण्णं भवति।।

लग्नेष्विन्दुभागेष्विन्द्राचार्यः समाश्रितः केन्द्रं
सौम्यो वा कुजयुक्तः करोति केन्द्रे सुवर्णाख्यं।। २०

बुधद्रेक्काणेषूदितेषु गुरौ केन्द्राश्रिते दृष्टे वा कृष्णसुवर्णं भवति। सौम्यकुजौ केन्द्रस्थितौ वा तदेव भवति।।

लग्नस्थमवनिजस्य द्रेक्काणं दिनकरो निरीक्षेत
केन्द्रे चेन्द्राचार्ये सुवर्ण्णचिन्ता विनिर्द्देश्या।। २१

लग्नोदितं कुजद्रेक्काणमादित्यो वीक्षते चेत् केन्द्रस्थिते गुरौ ओषधिनिर्म्मितं भवति। जीवक्षेत्रद्रेक्कोणे जीवांशयुते जीवदृष्टे शुद्धसुवर्ण्णं भवति।।

जलजा यदा तु भागास्सौम्येन्दुभ्यां निरीक्षिते लग्ने
जलसंभवो(अ)त्र धातुर्निर्द्देश्यश्चिन्तितो विदुषा।। २२

उक्ताश्च उच्यमानाश्च ये धातवः ते जलराशिद्रेक्काणोदये सौम्येन्दुवीक्षिते जलस्थिता भवन्ति। जलसंभवा विज्ञेया विदुषा।।

लग्नेषु शुक्रभागेषूच्चस्थानाश्रितश्च यदि चन्द्रः
मित्रक्षेत्रगतो वा करोति रूप्यं बलोपेतः।। २३

शुक्रद्रेक्काणोदये चन्द्रः स्वोच्चमित्रस्वगृहे स्थितः पूर्व्वपक्षगः केन्द्रगतो रूप्यं करोति।।

सूर्यसुतद्रेक्काणाः शशिभृगुसौम्यैर्निरीक्षिता बलिभिः
जनयन्ति रूप्यमेव प्रश्नोत्पन्ने तु केन्द्रे वा ।। २४

सौरद्रेक्काणोदये शशिशुक्रबुधवीक्षिते केन्द्रगता वा प्रश्ने ग्रहा द्रेक्काणाश्च रूप्यमेव जनयन्ति। कुर्वन्ति कृष्णरूप्यमित्यर्थः। सर्वत्र वीक्षणोक्तकार्येषु षष्ठं द्वितीयभवनं इत्याद्युक्तन्यायो ग्राह्यः। फलनिर्द्देशे केन्द्रत्रिकोणोक्तदृष्टिर्ग्राह्या। चिन्तासूभयं ग्राह्यं।।

लग्नेषु सौम्यभागेष्वांगिरस केन्द्रमाश्रिते रूप्यं
अथवा त्रिकोणयुक्तौ भृगुशशिनौ वा बलोपेतौ ।। २५

सौम्यद्रेक्काणोदये गुरौ केन्द्राश्रिते शुद्धरजतं वक्तव्यं। अथवा केन्द्रत्रिकोणगतौ बलिनौ भृगुचन्द्रौ चेत् शुद्धरजतमेव भवति।।

स्थिरराशिद्रेक्काणा भृगुसुतभागान्विताश्च बुधदृष्टाः
कार्षापणगतचिन्तां कुर्युः केन्द्राश्रिते च बुधे।। २६

स्थिरराशौ गुरुद्रेक्काणे बुधदृष्टे युते बुधे केन्द्रगते वा कार्षापणाश्चिन्तिताः। हरितमहिषादिकृतचिह्ना इत्यर्थः। एवं शुक्रद्रेक्काणे रजतकाशा ज्ञेयाः।।

रविशशिनोर्द्रेक्काणे चन्द्रे केन्द्राश्रिते भवेद्धातुः

बलवान् सूर्यः पश्येन्निर्देश्यं ताम्रलोहमपि।। २७

रविद्रेक्काणे शशिद्रेक्काणे वा चन्द्रे केन्द्राश्रिते(अ)पि धातुचिन्ता वक्तव्या। तत्र बलवान् सूर्यः पश्यति चेत्ताम्रं। शशिवीक्षिते लोहं।

भौमार्क्कद्रेक्काणे बुधगुरुशुक्रांशकैस्तु संभिन्ने
बलवति पश्यत्यर्क्के ताम्रं चिन्तागतं विद्यात्।। २८

रविकुजद्रेक्काणोदये बुधगुरुशुक्रांशकयुते बलवता अर्क्केण वीक्षते चिन्तागतं ताम्रमिति वदेत्।।

द्रेक्काणेषु रवीन्दोर्बुधयमभागाश्रयेषु बलवद्भिः
दृष्टेषु शशिबुधार्क्कैः कांस्यप्रभवा भवेच्चिन्ता।। २९

रविचन्द्रयोर्द्रेक्काणेषूदितेषु बुधयमवर्ग्गाश्रयेषु बलयुतैः समबलैर्दृष्टेषु चिन्ता कांस्यप्रभवा भवेत्।।

बुधशुक्रद्रेक्काणे चन्द्रे केन्द्रे भवेद्विलग्ने वा
अन्यैर्बलिभिर्दृष्टे कांस्याश्रयिकां वदेच्चिन्तां।। ३०

बुधशुक्रद्रेक्काणे लग्नयुते चन्द्रे केन्द्रे अन्यैर्बलिभिः, रविकुजशशिभिर्बलयुतैः, दृष्टे कांस्य चिन्तां वदेत्।।

दण्डास्त्रशस्त्रधारिद्रेक्काणे शशियुते भवेल् कांस्यं
यद्यवनिसुतः पश्येत् बलान्वितः प्रश्नवेळायां।। ३१

दण्डास्त्रशस्त्रधारिणि द्रेक्काणे शशियुते कांस्यमेवेति वदेत्, यदि बलयुतभौमवीक्षिते शशिनि।।

एतेषु चैव लग्नेष्वार्किकः पश्येद्विलग्नमति बलवान्
उदये(अ)थवा बलिष्ठः प्रश्ने कृष्णायसं कुर्यात्।। ३२

दण्डास्त्रशस्त्रायुधायसधारिषु द्रेक्काणेषु शनिदृष्टेषु बलयुतशनियुतेषु वा कृष्णायसं कुर्यात्।।

सौरांशके विलग्ने द्रेक्काणे वर्क्कजस्तु केन्द्रगतः
अन्यैर्बलिभिरदृष्टः करोति कृष्णायसं सततं।। ३३

सौरांशके द्रेक्काणे वा लग्नगते सौरे केन्द्रगते अन्यैर्बलयुतग्रहैरदृष्टे कृष्णायसमेव करोति।।

दिवसकरद्रेक्काणे लग्ने सौरांशकेन युक्ते स्यात्
केन्द्रगते मन्दो वाप्यायसमिति पृच्छते ब्रूयात्।। ३४

रविद्रेक्काणे सौरांशयुते केन्द्रत्रिकोणगते मन्दे चेदायसमिति पृच्छते ब्रूयात्, सैरत्रिंशांशकयुक्तो दिवसकरद्रेक्काण एव सिंहः स्यात्।।

आमिषफलकलशधरैर्द्रेक्काणैरिन्दुकोणसन्दृष्टैः
भाजनविन्यासो(अ)स्मिन् पूर्णे पूर्णं विनिर्द्देश्यं।। ३५

एवं सामान्येन धातुविशेषे निश्चिते तस्य भाण्डागारादिभेदसंभवे सति भाण्डनियमार्त्थमाभिष फलेत्याह - पूर्व्वोक्तधातुविशेषान् विचिन्त्य द्रेक्काणग्रहयोर्बलयुतेन धातुं निश्चित्य प्रष्टुर्भाजनविशेषान् ब्रूयात्।। आमिषफलकलशरत्नसुवर्ण्णधारिषु द्रेक्काणेषूदितेषु चन्द्रशनिदृष्टेषु चेद् भाजनचिन्ता वक्तव्या। अन्येषु चिन्ता सु भाजने न्यस्तं युक्तं सुवर्ण्णं वा सस्यं वा विमृश्य वदेत्। अत्र चन्द्रे सम्पूर्णे सम्पूर्ण्णं, क्षीणे स्वल्पं। निधिष्वपि प्रश्ने विमृश्य वदेत् सुवर्ण्णं। अथवा जलपूर्णे राशि लग्ने सस्यं चेत् पूर्ण्णमिति वदेत् ऊर्ध्वमुखे पूर्ण्णं, तिर्यङ्मुखे(अ)ल्पं, अधोमुखे(अ)त्यल्पमिति। अनेन सस्यं भाजनं वा तन्न्यस्तं सस्यं वा वदेतिति।।

गुरुकुजयोस्सौवर्ण्णं शुक्रे रौप्यं बुधे तु मणिभाण्डं
दन्तास्थिचर्म्मजातं सौरे कृष्णायसञ्चापि।। ३६

अथ तेषामेव भाजनानां प्रकृतिभेदान् द्रपृग्रहभेदादाह - गुरुकुजयोः सुवर्ण्णकृतं भाजनं वदेत्। शुक्रे केन्द्रत्रिकोणगे रजतकृतं, बुधे मणिकृतं भाजनं। दन्तास्थिचर्म्मजातं सौरे अथवा कृष्णायसकृतं भवति। दन्तादयो धातुभेदा भवन्ति जीवधातुत्वाद्। नष्टमुष्टिचिन्तासु सौरस्य चर्म्मदन्तास्थीत्युक्तानि वदेत्। एवमन्येषु।।

भाजनमिन्दोः कांस्यं काचमयं वा रवौ तु ताम्रमयं
मृद्भाजनमित्यपरे दिनकरकुजयोर्व्यवस्यन्ति।। ३७

इन्दोः कांस्यं काचपात्रं वा भवति। रवौ ताम्रं। अथ दिनकरकुजौ बलक्षीणै केन्द्रत्रिकोणगौ चेत् मृत्कृतं पात्रं भवति। यदि बलयुतै, निर्द्धने पृच्छके मृत्पात्रमेव भवति। दिनकरे मूलाः। रविद्रेक्काणगते पश्यति चेत् काष्ठमयः अन्यथा मृण्मयं। भोजनप्रश्ने द्रेक्काणवशाल् पात्राणि ज्ञेयानि। भोजनादन्येषु ग्रहैः केन्द्रत्रिकोणगतैर् वाच्यानि।।

वरम्माभरणधरेषु द्रेक्काणेष्वारभौमदृष्टेषु
आभरणादेशविधिर्वर्ण्णाकृतयो ग्रैहैर्वाच्यः।। ३८

कवचाभरणरत्नप्रोतकाश्च द्रेक्काणा आभरणरत्नचिन्तां कुर्युः। ग्रहद्रेक्काणैर्वर्ण्णञ्च आकृतिञ्च विमृश्य वदेत्। सूर्यस्य सबलस्य कर्ण्णाभरणं मुकुटञ्च भवति। अबलयुतस्य कृष्णं सुवर्ण्णाभरणं भवति। जीवस्य हृदयोदरबन्धनञ्च सुवर्ण्णकृतं वस्त्रं रत्नयुतं कर्ण्णाभरणं वा भवति। मुक्तारचितं शृंघलाभरणं हस्ताभरणं पादाभरणञ्च रजतकृतानि च विकृतान्याभरणानि वृत्तानि पाशयुक्तानि चन्द्रस्योक्तं। सम्पूर्णचन्द्रस्य ललाटबन्धनञ्चोक्तानि।।

सूर्ये कर्ण्णाभरणं जीवे हृदयोरसोश्च सौवर्ण्णे
मौक्तिकशृंघलपाशकवृत्तानीन्दोर् ललाटे च।। ३९

एतस्यार्त्थमुक्तं। चकाराद् ग्रहस्थितिद्रेक्काणवशात् शरीरस्योर्ध्वमध्याधोभागभूषणाभरणं ग्राह्यं। पूर्व्वोक्तधातुरचितं भवतीति।।

मुक्तांगुलीयपूरिमसुषिरग्रीवाभरणानि भृगुतनये
सौवर्ण्णकण्ठसूत्रप्रवाळकाद्यानि भूमिसुते।। ४०

शुक्रस्य मुक्ताभरणमंगुलीयं पूरिमञ्च सुषिरञ्च कटिसूत्रञ्च कण्ठाभरणञ्च। एतानि चोक्तानि रजतस्वर्ण्णकृतानि ग्रहयुतवीक्षणेङ्गेयानि, प्रायेण स्त्रीणां भवन्तीति विद्वन्मतं। सुवर्ण्णकृतं कण्ठसूत्रञ्च प्रवाळकादि कुजस्यहस्ताभरणञ्च वक्तव्यं।।

नीलकमर्क्के विद्यात् ग्रीवाभरणञ्च भवति यन्नष्टं
दारभूषणमाहुर्मुख्यं बलसंयुते सौम्ये।। ४१

नीलकं कण्ठाभरणं शनेः। अथवा लोहकृतं नूपरं वा भवति। राहोरप्यवमेव कृष्णायसकृतं भवति बन्धशृंघला च। केन्द्रत्रिकोणगतैर्बलयुतैराभरणानि नष्टमुष्टिचिन्तासु वदेत्। बुधस्य बलयुतस्य शिशूनां भूषणं भवति पुष्पकृतं वा। अबलस्य स्थितराशिस्वाम्युक्तं भवति। अस्मिन् नोक्तमपि पुष्पचिन्तालक्षणं वक्ष्येपुष्पानुलेपनालंकृतेषु द्रेक्काणेषूदितेषु बुधशुक्रवीक्षितेषु च प्रष्टुः कुसुमचिन्तां वदेत्। पद्मं हरितञ्च तुळसीचोक्ता सूर्यस्य। चन्द्रस्योल्पलादिजलसंभवाः श्वेताश्च कुजस्य रक्ताश्च कण्टकपुष्पाश्च कानकगन्धिश्चोक्ताः। बुधस्य नीलोल्पलञ्च बकुळं नीलवर्ण्णश्चोक्ताः। गुरोर्जातीपुष्पञ्च कुमुदञ्च चम्पकपुष्पञ्चोक्तं। शुक्रस्य केतकी च मल्लिका च चोक्ता। शनिराहोर्दुर्गन्धो निष्फलानि कान्तारजानि भवन्ति। एवं ग्रहोक्तवर्ण्णाकृतिजपुष्पाणि नष्टमुष्टिचिन्तासु ग्रहैर्द्रेक्काणेन वा विमृश्य कथयेत्।।

दशमोध्यायः

चापास्त्रदण्डधारिषु भीषणवित्रासयत्सु भागेषु
समरास्त्रचोरचिन्ता दर्शनमथवात्र चोराणां।। १

धनुरास्त्रायुधदण्डधारिणश्च भीता वित्रासकाश्च ये द्रेक्काणाः तेषामुदयेषु समरास्त्रचिन्ता चोरचिन्ता वा ग्रहदर्शनाद् विमृश्य वदेत्। तेषु यात्रां पृच्छेत् चेत् चोराहृतसर्वस्वो भवति। युद्धे चोरयुद्धं वदेत्। विरोधश्च भवति बन्धोर्वा।।

द्रेक्काणेषु विहंगेषूडुपशुक्राश्रयेषु सर्व्वेषु
दृष्टे च भृगुबुधाभ्यां वस्त्राश्रयिका भवेच्चिन्ता।। २

यस्य कस्य राशौ मकरमानद्रेक्काणाश्च विहंगद्रेक्काणाश्च उदिताश्चन्द्रशुक्रयुता वा भृगुबुधदृष्टा वस्त्रचिन्तां कुर्युः।।

कवचध्वजवस्त्राविककञ्चुककंबळधरेषु भागेषु
बुधशुक्रचन्द्रमोभिर्दृष्टेषूर्ण्णाकृतं वस्त्रं।। ३

कवचध्वजधारिणश्च वुस्त्रयुताश्च रोमयुताश्च कञ्चुककंबळधारिणश्च द्रेक्काणा लग्नगता बुधशुक्रचन्द्रदृष्टा ऊर्ण्णाकृतं कुर्युः। कुजरविशनिदृष्टा वल्ककलं वृक्षचर्म्मजातं कुर्युः। गुरुः कनकरचितं।।

वल्ककलमार्क्किकुजाभ्यां गुरुणा कौशेयमिन्दुजे वालं
शशिना दुकूलपट्टं रविणा चर्म्मांबरं भृगुणा।। ४

वृक्षत्वचा कृतं गोणिकादि वस्त्रं शनौ शयनं वा विमृश्य वदेत्। त्वचा कृतमपि सूक्ष्मांशुकं रक्तांशुकञ्च कुजे। गुरुवीक्षिते कुशारहितं। बुधे प्रवाळताम्रपल्लवसदृशं। शशिवीक्षिते दुकूलपट्टञ्च वदेत्। रविणा शयनचर्म्मकवचञ्च वदेत् तन्तुकृतं वस्त्रं शुक्रेणेति। शशिना रोमचितेन च रोमरचितं वस्त्रं वदेत्। केन्द्रगतैर्बलयुतैर्ग्रहैः प्रष्टुर्नष्टलाभे वदेत्। सामान्येन वस्त्रं वदेत्।।

मलिनच्छिन्नदृढादृढस्थूलांबुधौजीर्ण्णानि
सौम्येन्द्वार्यभुजङ्गमकुजरविभृगु सौरजानि स्युः।। ५

सौम्ये मलिनवस्त्रं, चन्द्रे छिन्नं, गुरौ दृढं, राहोरदृढं, कुजे दग्ध्रं, रवौ स्थूलं, शुक्रे अंबुधौतमंबरं, मन्दे जीर्ण्णं।।

द्रेक्काणसदृशवर्ण्णं वस्त्रं तद्वाससा समानं वा
द्रष्टृग्रहवर्ण्णं वा बहुभिश्चित्रं ग्रहैर्वाच्यं।। ६

अनेन वाच्यप्रकारमाह - उदयगते द्रेक्काणे बलयुक्ते तस्य वर्ण्णं वस्त्रं भवति। तद्रेक्काणवाससा समानवस्त्रं वा वदेत्। द्रष्टृग्रहस्य बलयुतस्योक्तवस्त्रं वा। यदि तत्र बलयुतैर्बहुभिर्ग्रहैर्दृष्टे बहुविधं वस्त्रं वदेत्। ग्रहसंख्यप्रमाणं विमृश्य वदेत्। द्रेक्काणसदृशवर्ण्णत्वमुदयस्य बलीयस्त्वे। मध्यमबलत्वे तद्वाससा समानत्वं। दौर्बल्ये तु द्रष्टृग्रहवर्ण्णता।।

दण्डामिषयष्टिधाराशाखाफलमूलधारिणञ्च तथा
द्रेक्काणा धान्यकरा वृक्षसमीपाश्रिताश्चैव।। ७

अथ मूलचिन्तामाह - दण्डामिषयष्टिधराः आमिषं मांसं। यष्टिः वृक्षदण्डः। आमिषवृक्षदण्डधरा वृक्षशाखाश्रिताश्च वृक्षसमीपाश्रिताश्च फलमूलधराश्च रविशुक्रवीक्षिताश्च द्रेक्काणा धान्यफलमूलचिन्तां कुर्युः।।

असुराक्यौस्तृणमूले जीवस्येक्षादिमधुररसवन्तः
भृगुकुजरविशशिविदुषां वल्यङ्कुरवृक्षगुल्मलताः।।

असुराक्ष्यौस्तृणमूले। राहोर्मूलं फलं तृणजं, मन्दस्य मूलमेव, गुरोरिक्षुशर्क्करादिमधुररसाः मधुरफलानि च वदन्ति। भृगोर्वल्लीकुसुमं,

कुजस्याङ्कुरग्राह्याः, कण्टकवृक्षाः। सूर्यस्य वृक्षाः फलग्राह्याः। चन्द्रस्य क्षीराढ्या गुल्माः। बुधस्य पुष्पफला ग्राह्याः। लताः तांबूलादि। तत्र तिर्यग्गतास्तांबूलादन्यलता राहोः।।

पापैर्विषकण्टकिनः सौम्यैः सक्षीरमधुररसवन्तः
तिर्यक्कण्टकिनो(अ)र्के कुज उन्मुखिनो यमे चाधः।। ९

बलरहितः सूर्यः पाप एव। पापग्रहैर्विषवृक्षाश्च कण्टकवृक्षाश्चोक्ताः। तत्र राहोर्विषवृक्षाः। सौम्यैः सक्षीरमधुररसवन्तः - चन्द्रस्य क्षीरवृक्षो जलराशि स्थितस्य। स्थलराशिगस्य मधुररसयुक्तः। जीवस्य मधुररसयुताः। बुधस्य मिश्ररसयुक्तः, शुक्रस्याम्लमधुररसः। वृक्षेषु तिर्यक्कण्टकिनः अर्क्कस्य, उन्मुखकण्टकवृक्षाः कुजस्य, दुर्भगकण्टका अधोमुखाश्च वृक्षाः मन्दस्येसि। राहोरपि शनिवत्।

क्रूरक्षेत्रे क्रूरैर्दृष्टे जनपानलेपनायोग्याः
सैम्यक्षेत्रे सौम्यैरदृष्टे भोग्याश्च लेप्याश्च। १०

क्रूरक्षेत्रगते ग्रहे क्रूरदृष्टे पूर्वोक्तफलमूलरसा न भोग्या न लेप्या न सेव्या, उच्छिष्टा वा अपूता वा दुरगन्धयुता वा भवन्ति। सौम्यगृहस्थितग्रहे पापवीक्षिते लेप्या भवन्ति, न भोज्या भवन्ति। सौम्यगृहस्थितसौम्यग्रहे सौम्यदृष्टे भोग्या वा लेप्या वा सेव्या वा भवन्ति।

क्रूरा बहिरस्थिकराः सौम्याः कुर्व्वन्त्यथान्तरस्थितयुतं
कुरुतो निरस्थि फलमिन्दुभास्करौ राशयो(अ)प्येवं।। ११

क्रूरग्रहाः सर्व्वे फलस्य बहिरस्थिकराः। सौम्यग्रहा अन्तरस्थियुतं फलं कुर्व्वन्ति। बहिरस्थयो नाळिकेरादयः। अन्तरस्थय आम्रतिन्त्रिण्यादयः। निरस्थयः कदळ्यादयः। तत्र गुरुशुक्रौ बीजयुतौ, चन्द्ररवी अस्थिहीनफलं कुरुतः। एतानि फलानि राशीनामपि वदेत्, क्रूरक्षेत्रगतस्य कण्टकयुतफलं भवति।।

शुभतरुविटपिगिरिद्रुमकदळीक्रमुकादितालवेणूनां
शुक्रमहीसुतरविशशिगुरुयमसौम्यैर्वनानि स्युः।। १२

सामान्योक्तफलानां वृक्षानाह - शुभवृक्षः शुक्रस्य नाळिकेरश्च, स्ववर्ग्गस्थितस्य आम्रवृक्षः। कुजस्य विटपयुतः कण्टकयुक्तश्च अभोज्यश्च। सूर्यस्य गिरिजाता गृहसभाकृतार्त्था वृक्षाः। चन्द्रस्य कदळ्यादिजलवृक्षाः। जीवस्य क्रमुकश्च पक्वाम्रं च पक्वनाळिकेरफलञ्च पनसफलञ्च मुन्त्रिकपक्वञ्चोक्तं। मन्दस्य तालवृक्षाः। चन्द्रस्यापि तालः, बुधस्य वेणुश्च भवति। शनिवद्राहुः।

निर्यासपक्वफले शुक्रस्य गुरोर्विपक्वफलमाहुः
काण्डं तण्डुलमिन्दोः कन्दास्सौरेर्भवेन्मूलं।। १३

अनेनापि फलविशेषानाह - शुक्रस्य निर्यासफलञ्चापक्वफलञ्चोक्तं। जलराशिस्थशुक्रस्य निर्यासः। चरराशिस्थभृगुदृष्टे त्वाम्रफलं। गुरोर्विशषात् पक्वफलं मधुरफलमुक्तं। क्षीणचन्द्रस्य काण्डं। काण्डस्य कण्विति भाषा। सम्पूर्णचन्द्रस्य शालीतण्डुलं। सौरस्य कन्दाः, रहोरपीति। ग्रहरहिते राशौ केन्द्रे ग्रहस्योक्तं फलं, मूलं सस्यं वा केन्द्रगतेन बलयुतेन राशिना वदेत्। ग्रहेणापि जलशुष्कराशीनपि। ग्रहस्थितराश्यंशद्रेक्काणभागानवलोक्य तेषां बलयुतानामधिकं बलयुतस्योक्तं संयुज्य ग्रहफलं वदेत्।।

भौमे कण्टकपुष्पे शाखापत्रे बुधस्य मुष्टयान्तु
अस्थित्वक्परिणद्धं सवितुस्त्वक् चापि निर्द्देश्यं।। १४

भौमे कण्टकश्च पुष्पञ्च। बुधे स्थलस्थभौमदृष्टे कण्टकं, जलस्थभौमदृष्टे पुष्पं शाखां वा पत्रं वा वदेत्। मुष्टयामपि वदेत्। ग्रहे फलमूलसस्यानीत्यर्थः। अस्थित्वग्युतं फलं सवितुर्वदेत्। अत्र मरीचिफलं सूर्यस्य, कटुकं कुजस्य। मूलेषु क्रूरराशिगतस्य सूर्यस्य शुण्ठीमूलं, सौम्यराशिगतस्य रजनि। जलशुष्कराशिवशादार्द्रशुष्कत्वञ्च वदेत्। चन्द्रस्य कूबाचूर्णं। कुजस्य श्लेना च शाकुटञ्च। बुधस्य पुष्पं मूलञ्च औषधमूलञ्च। जीवस्य क्षीरकन्दादि, स्वादुमूलमुक्तं। शुक्रस्य दीर्घकन्दादि। सौरस्य ऋजुकन्दा उक्ताः। बलयुतस्य राहोस्सौरवत्। बलहीनस्य वनकन्दं।।

कोद्रवकुलस्थकण्वं कुजस्य तिलकृष्णधान्यकं सौरेः
शुक्रस्य रक्तशाली निष्पावाद्याः स्युरर्क्कस्य।। १५

अथ सस्येषु श्वेतकोद्रवञ्च कुलस्थञ्च कण्वञ्च कुजस्य। कण्वं, कटं, तिलञ्च कृष्णकोद्रवञ्च सौरस्य। शुक्रस्य रक्तशाली। रवेर्निष्पावञ्च कोलञ्च आढकी च उक्तं।।

शशिनो गोधूमयवाः मुद्गव्रीही बुधस्य निर्द्दिष्टौ
जीवस्य षाष्टिकाद्याः स्वामिभिरुक्तानि भवनानि।। १६

चन्द्रस्य जलराशिगतस्य यवाः, स्थलराशिगतस्य गोधूमः। बुधस्य बलयुतस्य मूद्गं, अबलस्य कृष्णव्रीहिः श्यामा वा। जीवस्य षष्टिदिवर्द्धितराजशाली। पुनः कुजस्य प्रियङ्गुसस्यञ्च वदेत्। राशिसस्यं स्वाम्युक्तं भवति। सूर्यस्य व्रीहिरिति सामान्यपक्षः। द्रेक्काणवशात् फलमूलसस्यानि सामान्येन ज्ञात्वा त्रिकोणगतैर्ग्रहैर्बलयुतैः उक्तन्यायेन विशेषान् ज्ञात्वा नष्टमुष्टिचिन्तासु वदेत्।।

एकादशाध्यायः

सौम्यानां द्रेक्काणा बलिभिस्सौम्यैर्निरीक्षिता वापि
सौम्यालयसंजाता विज्ञेया जीवयोनिकराः।। १

वृषादियुग्मराशयस्सर्वे सौम्यराशयः। सौम्यग्रहाणां द्रेक्काणाः सौम्यराशिसंभवाः बलिभिस्सौम्यैर्निरीक्षिता युक्ता वा जीवचिन्तां कुर्व्वन्ति।।

नखदन्तरोममज्जास्थित्वग्विट् शृंगमांसशुक्लानि
द्विपदचतुष्पदपक्षिसरीसृपजातानि जीवाश्च।। २

जीवाश्चतुर्विधाः। द्विपदाः चतुष्पदाः पक्षिणश्च सरीसृपाश्च। नखाद्युक्तद्रव्यञ्च ग्राह्यं। मेषादीनां नखादिसंबन्धो भौमादीनामप्युच्यते। मेषस्य नखं, वृषस्य दन्तः, मिथुनस्य रोमः, कर्क्कटकस्य मज्जा, सिंहस्य अस्थि, कन्यायास्त्वक्, तुलाया विष्ठा, वृश्चिकस्य मूत्रं, धनुषः शृंगं, मृगस्य मांसं रुधिरं, कुंभस्य लिंगं, मीनस्य शुक्लं। एते प्रयोजनाद् ग्राह्या इत्यर्थः। एवं भौमादीनां ज्ञेयाः। लिंगग्रहणमुपदेशः।।

द्विपदेक्षणयोगाभ्यां द्विपदी सर्व्वत्र जायते जातिः
एवं शेषाणामपि विषमास्तीक्षणा ग्रहैः पापैः।। ३

द्विपदराशिगतद्विपदग्रहवीक्षणाद्वा योगाद्वा सर्व्वत्र भावे द्विपदचिन्ता जायते। एवं चतुष्पात्पक्षिसरीसृपान् वदेत्। उक्ता द्विपदादयः पापग्रहैर्विषमास्तीक्षणा भवन्ति। सौम्यैः साधवः सौम्यभावा भवन्ति।।

द्विपदेषु मनुजराशिषु भृगुगुरुदृष्टिः करोति मनुजभवं
गुरुशुक्रभौमभागा दृष्टास्तैरेव मनुजकराः।। ४

मनुजराशिषु द्विपदद्रेक्काणेषूदितेषु भृगुजीवदृष्टिरस्तिचेन्मनुष्यचिन्ता वक्तव्या। अथवा मनुजराशिषु गुरुशुक्रबुधद्रेक्काणेषूदितेषु तेषामेकदृष्टिरपि मनुष्यजातिं करोति। उक्तयोगाभावाद्वा अबलत्वाद्वा पश्चादुक्तयोगमपि विमृश्य वदेत्।।

बलवन्तमंशमथवा द्विपदद्रेक्काणमीक्षते सौम्यः
द्विपदे मित्रर्क्षे वा स्थित्वा कुर्यात् ग्रहो मनुजं।। ५

सर्व्वेषु राशिषु द्विपदराश्यंशकं वा द्विपदद्रेक्काणं वा शुभग्रहः पश्यति चेद् द्विपच्चिन्तितं। मित्रर्क्षे द्विपाद्राशौ स्थित्वा ग्रहो वीक्षिते चेल्लग्नं मनुजं कुर्यात्।।

द्विशरीरराशिलग्नं द्विपदद्विशरीरगा ग्रहा बलिनः
यदि वीक्षरन् कुर्युर्जातिं द्विपदाश्रयां सततं।। ६

उक्तयोगाभावे द्विदेहराश्युदये द्विदेहद्विपदराशिस्थितैर्ग्रहैर्बलयुतैर्वीक्षिते द्विपदाश्रयचिन्तां कुर्युः, सर्वत्र पूर्वोक्तयोगाभाव इत्यर्थः।।

जामित्रैकादशगाः तृतीयसंस्था ग्रहास्तु पुरुषकराः
केन्द्रे नरराशिगते लग्ने तु नपुंसके(अ)प्येवं।। ७

पुरुषस्त्रीनपुंसकविधिः कथ्यते - सप्तमतृतीयैकादशगताः पुरुषग्रहाः आदित्यगुरुकुजाः पुरुषजातिं कुर्वन्ति। पुरुषराश्युदय इत्यर्थः। अथवा पुरुषराशुदये पुरुषग्रहाः केन्द्रगताः पुरुषचिन्तां कुर्युः। एवं स्त्रीराश्युदये स्त्रीग्रहौ जामित्रतृतीयैकादशगौ चन्द्रशुक्रौ चेत् स्त्रीन्ता वक्तव्या। यद्युभरराश्युदये उक्तेषु राशिषु नपुंसकभावौ बुधमन्दौ स्थितौ चेन्नपुंसकं भवति। स्त्रीनपुंसकं पुन्नपुंसकं वा राशिवशात् ज्ञेयं। उक्तयोगाभावे वा योगस्य बलहीनत्वा वा पश्चादुच्यमानेन वा वदेत्। एतल्लक्षणं सर्व्वत्र ग्राह्यं।।

पुरुषद्रेक्काणो यतस्मिन् पुरुषांशको विलग्नं स्यात्
नरराशिगतैर्दृष्टः करोति पुरुषाश्रयां चिन्तां।। ८

पुरुषद्रेक्काणोदये पुरुषांशकविलग्नं स्यात् नरराशिगतैर्ग्रहैर्बलयुतैर्दृष्टश्चेत् सो(अ)म्शः पुरुषचिन्तां करोति।।

प्रायेण शुभा बलिनो मनुष्यचिन्तां तदाश्रिताः कुर्युः
देवानामुच्चगता नीचाश्रयिणस्तु नारकिणां।। ९

प्रायेण शुभा मनुष्यद्रेक्काणांशराशिगता मनुष्यचिन्तां कुर्युः। स्त्रीपुरुषविकल्पं विमृश्य वदेत्। उच्चराशिगताः सर्व्वे ग्रहा देवचिन्तां कुर्व्वन्ति। नीचगता नरकस्थितानां आसन्नराणां चिन्तां कुर्व्वन्ति।।

नारीद्रेक्काणे वा सुधांशुशुक्राश्रये(अ)थवा स्त्री स्यात्
स्त्र्यंशं द्रेक्काणं वा पश्येत् स्त्रीराशिगो(अ)पि स्त्री।। १०

उदयगतं नारीद्रेक्काणं वा चन्द्रशुक्राश्रितं वा चन्द्रशुक्रदृष्टं वा समराशिगतग्रहदृष्टिः स्त्रीचिन्तां करोति। स्त्र्यंशं वा स्त्रीद्रेक्काणं वा स्त्रीराशिगतो ग्रहः पश्यति चेत् स्त्रीचिन्ता।।

स्त्रीक्षेत्रे रविचन्द्रौ नारीचिन्ताकरौ विनिर्द्दिष्टौ
तावेव पुरुषराशौ कुरुतः पुरुषाश्रयां चिन्तां।। ११

स्त्रीराशिगतौ रविचन्द्रौ केन्द्रत्रिकोणगतौ बलिनौ चेन्नारीचिन्तां कुरुतः। तौ पुरुषराशिगतै पुरुषचिन्तां कुर्यातां।।

यद्योजेषु स्त्री स्यात्पुरुषाकारस्वभावयुक्ता स्यात्
पुरुषो(अ)पि भवेद्युग्मे नारीसदृशांगशीलः स्यात्।। १२

स्त्रीग्रहे पुरुषराशिगते युग्मराशौ वा स्त्री चिन्तिता जाता वा चेत् तस्याः पुरुषाकारञ्च पुरुषवृत्तिञ्च वदेत्। युग्मराश्युदये वा पुरुषग्रहे स्त्रीराशिगते पुरुषश्चिन्तितो जातो वा भवतेत् तस्य नारीसदृशमंगञ्च शीलञ्च प्रवृत्तिञ्च सर्वं वदेत्।।

नारीग्रहो बलाढ्यो नारीद्राक्काणमास्त्रितो भवनं
नार्यंशकं विलग्नं पश्येन्नारीं विजानीयात्।। १३

स्त्रीग्रहो(अ)तिबलयुतो लग्नगं स्त्रीद्रेक्काणं वा स्त्रीनवांशं वा स्त्रीराशिमाश्रितो वा दृष्टो वा भवेत् तत्रापि स्त्रीचिन्ता वक्तव्या। पुरुषस्त्रीनपुंसकचिन्तालक्षणं गर्भप्रश्ने विमृश्य वदेत्।।

स्त्रीवर्ग्गे लग्नगते केन्द्रे सौम्याश्रिते विना क्रूरैः
कन्यांशद्रेक्काणे वा स्यात्कन्याश्रिता चिन्ता।। १४

स्त्रीत्वे निश्चिते सा परिणीता न वेति संशये अत्र परिज्ञानायाह - स्त्रीद्रेक्काणांशत्रिंशाशराशौ लग्नगते बुधे केन्द्राश्रिते वा कन्यांशद्रेक्काणराशिलग्ने वा केन्द्रे क्रूरवर्ज्जिते कन्यैव चिन्तिता भवति।।

पापयुते जामित्रे सौम्यैरनवेक्षिते तु बलवद्भिः
कन्या न सेति वाच्या प्रश्ने समुदीरिते वक्त्रा।। १५

उक्तप्रकारेणानूढात्वे निश्चिते सा कन्या सदोषो न वेति ज्ञानायाह - जामित्रपापग्रहयुतवीक्षिते बलयुतैः सौम्यैरदृष्टयुते वा पूर्व्वोक्ता न सा कन्यकेति पृच्छकस्य वदेत्। तत्र प्रष्टारूढोदयगे तत्सप्तमगे वा राहौ चेत् कन्या नेति वदेत्। सप्तमदर्शनयुतग्रहवशाद्विप्रादिः कन्यादूषको विज्ञायते।।

भृगुशशिनोर्द्रेक्काणा जामित्रगताः शुभैस्तु संयुक्ताः
सौम्याः स्वभागयुक्ताः कुर्युः पत्नीगतां चिन्तां।। १६

अथोढात्वनिश्चयायाह - शुक्रचन्द्रयोर्द्रेक्काणाः जामित्रराशिगताः सौम्यग्रहयुक्ताः पत्नीगतां चिन्तां कुर्युः। यदि सप्तमगाः सौम्यग्रहाः शुभांशद्रेक्काणगता अपि पत्नीगतां चिन्तां कुर्व्वन्ति। मैथुनचिन्तां वा वदेत्।।

कुजवीक्षणयोगाभ्यामग्न्याश्रयजीविनश्शिलाकाराः
भृगुणा गृहपतिकर्षकगोपालश्रेष्ठिशाकटिकाः।। १७

एवं पुरुषत्वे निश्चिते तद्विशेषावगममन्याश्रयजीवनावगमार्थञ्चाह - उक्तलक्षणैः स्त्रीपुरुषान् ज्ञात्वा पश्चाद् ग्रहवीक्षणयुतिभ्यां तयोः प्रवृत्तिं वदेत्। कुजवीक्षणयुतिभ्यामुदयराशेः पूर्व्वभागे उदिते चिन्तिरपुरुषा अग्न्याश्रयजीविनो भवन्ति। अग्नौ धातून् दग्ध्वा कर्म्मकरादिघटकारान्तं वदेत्। अपरभागे उदिते कुजयुतदृष्टे शिलाच्छेदजीविनः शिल्पिनः। शुक्रयुतवीक्षिते पञ्चवर्ग्गषड्भागेषूदितेषु गृहपतिर्वणिक्प्रवृत्तिर्गृहस्थो वा। पुनः पश्चाद्भागोदिते कर्षको वा वैश्यो वा भवति। तस्माद् गोपालान् वदेत्। ततो विप्रश्रेष्ठिकान् वदेत्। लग्नखण्डो वणिकि शूद्रस्ततः शकटजीविनः इति। लग्नं पञ्चधा विभज्य प्रथमे वणिक्, द्वितीये कृष्याजीविनः, तृतीये गोपालाः, चतुर्त्थे श्रेष्ठवणिक चेट्टिपणिक्कर् इति भाषायां, पञ्चमे शकटाजीवः।।

पाषण्डिपुळिन्दाजीवकरंगचरकथकादयः सौम्ये
चन्द्रे गजपरिचारकविप्रा गणकाश्च मन्द्रिणो वैत्याः।। १८

बुधयुतदृष्टे लग्ने आदौ षट्भागे पाषण्डिनः, आश्रमभ्रष्टा इति। पुनः पुळिन्ताः, ततो नैष्ठिकाः ब्रह्मचारिणः, ततो रंगजीविनः, ततः कथकाः कथनजीविनः इति। चन्द्रदृष्टयुते लग्ने बुधवत् षट्सु त्रिंशद्भाषूदितेषु गजपरिचारकाः। ततो विप्राः ज्योतिषिकाः, पुनर्मन्त्रिजनो मन्द्रवादी वा, तस्माद्भैषज्यजीविन इति।।

रविणा नृपचक्रधराः सेनापतिमन्त्रिपार्त्थिवा गुरुणा
सौरेण सार्त्थवाहा दूतास्त्वथ पाचकाश्च कार्पटिकाः।। १९

राश्यर्द्धहोरे(अ)समराशिषु रविचन्द्रयोः, युग्मेषु विपरीतं। चन्द्रहोरा उदिता सूर्य्ययुतदृष्टा चेत् क्षत्रियवंशो ज्ञेयः। सूर्यहोरा चन्द्रयुतदृष्टा चेत् चक्रवर्त्ती पार्थिवः। चक्रयन्त्रेण जीवति(इति) केचित्। गुरुणा त्रिभिर्द्रेक्काणैः सेनापतिर्मन्त्रिणश्च पार्त्थवाश्च ज्ञेयाः। सौरेण युतदृष्टे उदितराशिं चतुर्भागं कृत्वा वदेत्। प्रथमभागोदिते सार्त्थवाहाः वणिजः, द्वितीये दूताः, तृतीये पाचकाः, चतुर्त्थे कार्पटिकाः, कर्पटधारिणः कर्पटविक्रयवन्तो वा इति। मन्दस्य केचिदेवं वदन्ति - प्रथमषड्भागेभृतकजीविनः, पश्चाद्दूताः, ततः सार्त्थवाहा वणिजश्शूद्राः, पश्चाद् केवलशूद्राः, पश्चात् व्याजकारिण इति।।

सौनिककुणिन्दपाणा राजप्रेष्या निषाकैवर्त्ताः
दैवारिणैवमाद्याः ग्रहवद् ग्राह्याणि भवनानि।। २०

राहुदृष्टयुते पञ्चपञ्चभागेषु मांससूनकाः (कुविन्दाः) वस्त्रकारकाः। पुनः कुणिन्दाः, वनालया इत्यर्थः, पुनः पाणाः चण्डाला इत्यर्थः, ततो राजप्रेष्या अधमाः द्वारपालाः, ततो वनचराधमा वेटाः, ततो मत्स्यजीविनः। यदि ग्रहदृष्टियुतिरहिते लग्ने स्वाम्युक्तान् वदेत्। यदि ग्रहयुक्तः त्रिंशांशकसमपुरुषविधिवत् वदेदिति। इहोक्तपुरुषं चोरचिन्तासु वदेत्।।

लग्नस्योक्तं फलमिदमिन्दुस्थाने(अ)पि दर्शनाद्वाच्यं
अन्योन्यनिपातेष्वपि राशिष्वागन्तुकं वाच्यं।। २१

इहोक्तलक्षणं चन्द्रस्थाने ग्रहयुतवीक्षिते लग्ने बलहीने चन्द्रस्थाने च बलहीने(अ)तिबलयुतेन सम्पूर्णचन्द्रेणापि वर्त्तमानं वदेत्। तत्र लग्ने नैव यदा निश्चयो भवति तदा चन्द्रबलस्य विषयं। यदोदयस्य निस्सन्देहस्तदोदयेनैव जलादिकथनं। अन्यथा तु चन्द्रराशिमुदयं कृत्वा सर्व्वं वाच्यमित्युक्तं भवति। आरूढछत्रसन्निपाते(अ)न्यैल्फलमागन्तुकतया चिन्तितमित्यर्थः। छत्रराशिना भविष्यदर्थं, आरूढेनातीतं वदेत्। उदयेन पञ्चैते केन्द्रत्रिकोणगताश्चेत् प्रश्नफलं शुभं भवति। तेषामतिबले राशौ प्रश्नफलं भवति। बलसमे उदयारूढौ प्रधानावेकराशिगतौ शुभौ। द्वितीयद्वादशगावशुभौ। द्वितीयेकादशगौ शुभतरं फलं। चतुर्त्थदशमगौ शुभं। पञ्चमनवमौ च शुभौ। षष्ठाष्टमगौ न शुभौ। अन्योन्यसप्तमगौ शुभौ। उदयाद्वा उदयारूढाद्वा षष्ठाष्टमव्ययगताः छत्रचन्द्रस्थाना विघ्नं कुर्व्वन्ति बलयुताश्चेत्। दुर्ब्बले दीर्घकालात् कृच्छ्रात् फलं भवतीति राशिफलं।।

चन्द्रश्चतुष्पदस्थो द्रेक्काणो दण्डपाणिरथ लग्ने
रविरपि चतुष्पदे स्याच्चतुष्पदानां भवेच्चिन्ता।। २२

अथ चतुष्पदचिन्तामाह - चतुष्पाद्द्रेक्काणोदये वा हलयुगधारिद्रेक्काणोदये वा

दण्डहस्तोदये वा शकटयुतद्रेक्काणोदये वा चतुष्पात्ग्रहयुतदृष्टे चतुष्पदां चिन्ता वक्तव्या। उक्तद्रेक्काणोदये चतुष्पाद्राशिगतौ रविचन्द्रौ केन्द्रत्रिकोणगौ चेच्चतुष्पाच्चिन्ता भवेत्।।

होरा चतुष्पदा चेद् द्रेक्काणा जंबुकाश्चवदनाः स्युः
चिन्ता चतुष्पदानामिन्द्राचार्ये चतुष्पदगे।। २३

चतुष्पाद्राशौ लग्नगते द्रेक्काणो जंबुकवदनो(अ)श्ववदनो वा भवेत्। चतुष्पाद्राशिगते जीवे केन्द्रत्रिकोणगते चतुष्पदानां चिन्ता वक्तव्या।।

पश्यन्ति चतुष्पदगा ग्रहास्त्रिकोणास्पदाश्चतुष्पदिनः
द्रेक्काणो भवति तथा चतुष्पदानां तु सा चिन्ता।। २४

बलसंयुताश्चतुष्पाद्राशिगता ग्रहाः पश्यन्ति वा त्रिकोणगता वा चतुष्पाद्द्रेक्काणोदये चतुष्पाच्चिन्ता भवति।।

स्थलजे तथांबुजे वा तिर्यग्राशौ ग्रहा यदा बलिनः
द्विपदे चतुष्पदे वा चिन्ता स्यात्तत्र तद्रूपा।। २५

तिर्यग्राशौ चतुष्पाद्राशौ बलयुतो ग्रहश्चेत् द्विपाद्ग्रहाः द्विपदराशौ द्विपदचिन्ता भवति। चतुष्पाद्राशौ चतुष्पाच्चिन्ता भवति। कीटग्रहतिर्यग्राशौ कीटचिन्ता, जलराशौ जलजा भवन्ति। स्थलराशौ स्थलजा भवन्ति। तिर्यक्छब्देन द्विपाद्व्यतिरिक्ताः, अपदा। तद्रूपा - जलतिर्यक्स्थलतिर्यग्जलद्विपाज्जलमनुष्यादि। सो(अ)पि तिर्यग्भेद एव प्रसिद्धमनुष्यव्यतिरिक्तत्वात्तमःप्रचुरत्वाच्च।।

द्विपदचतुष्पदविपदाः सङ्कुलपादाश्च चिन्तिता ज्ञेयाः
द्रेक्काणसदृशरूपा ग्रहरूपा वा बलं ज्ञात्वा।। २६

सङ्कुलपादाः शतपादादयः। उक्तन्यायेन द्विपाच्चिन्तां चतुष्पच्चिन्तां निरूप्य वदेत्। मीनमकरयोः स्थितयोः फणीन्द्रचन्द्रयोः मत्स्यादिपादरहितानां चिन्तां वदेत्। कर्क्कटवृश्चिकयोः स्थितानां चन्द्रशनिराहूणां दृष्ट्या सङ्कुलपादानां सरीसृपाणां चिन्ता ज्ञेया। कर्क्कटवृश्चिकलूतादीनामित्यर्थः। सर्प्पाश्रितद्रेक्काणोदये राहौ केन्द्रगते वा सर्प्पचिन्ता वक्तव्या। तत्र शनिना व्यन्तरसर्प्पाः। कुजदृष्टयुते क्रूराः सविषाः। उक्तद्विपदादयो द्रेक्काणग्रहयोर्बलाधिक्यं चेत् कृष्णादितादृग्वर्ण्णा इत्यर्थः। राशिग्रहवशाद् द्विपाद्वा चतुष्पाद्वा मत्स्यमकरसर्प्पादिर्विपाद्वा सङ्कुलपादा वा तेषामुदितद्रेक्काणरूपं वा ग्रहरूपं वा रक्तशुक्लवर्ण्णादि वदेत्। बलयुतस्य वर्ण्णमित्यर्थः। द्रेक्काणग्रहाणां बलसाम्ये मिश्रं वदेत्। ते(अ)पि सर्व्वे बलयुताश्चेद् बहूनां रूपं बहूनां द्विपदादीनां रूपं वदेदिति।।

भौमस्य धनुषश्चः सिंहे व्याघ्रस्त्वजाविकौ मेषे
एणो वृषभे सौरेर्गजक्षमहिषा महिष्यश्च।। २७

चतुष्पाद्विशेशोपायकथनार्त्थमाह - पूर्व्वोक्तचतुष्पाच्चिन्ता चतुर्षु चतुष्पाद्राशिष्वेवं विधा भवति। धनुषि स्थितस्य कुजस्य दृष्टा अश्वः, सिंहस्थितस्य व्याघ्रः, मेषस्थितस्याजाविकं भवति। वृषस्थितस्य एणो भवति। सौरेर्धनुःसिंहमेषवृषेषु क्रमाद् गजर्क्षमहिषामहिषीति वदेत्।।

सर्व्वत्र चन्द्रतनये शाखामृगवानरादयो ज्ञेयाः
सवितुर्गजेन्द्रमृगपतिमृगपा वृषभे तु रुरुकटमौ।। २८

उक्तेषु धनुः सिंहमेषवृषभेषु बुधस्थिते शाखामृगवानराः वृक्षनिवासिनः। शललशाखामृगवानराद्या ज्ञेयाश्चतुष्पदाः। सूर्यस्य धनुषि गजेन्द्रः, सिंहस्थितस्य सिंहः, मेषस्थितस्यापि सिंहः, वृषस्थितस्य सूर्यस्य रुरुः, स्त्रीकटमश्च।।

शुक्रस्य तुरगकुक्कुटगोगवयाः संभवन्ति चापादौ
जीवस्याश्वोष्ट्रखरा निशाकरो राशितुल्यफलदः स्याद्।। २९

चापस्थितस्य शुक्रस्य तुरगी, सिंहस्थितस्य श्वा, मेषस्थितस्य गौरुक्ता, गवि स्थितस्य गवयः। गवयो गोसदृशः। निशाकरो राशितुल्यजातिः - धनुर्मीनस्थितस्य चन्द्रस्याश्वः। सिंहस्थितस्य चन्द्रस्य सिंहः, मेषगस्याजः, वृषगस्य वृषः। जीवस्य चापगस्याश्वः, सिंहगतस्योष्ट्रः, मेषस्यानर ऋजुखरः, वृषगस्य साक्षादारोहखरः।।

मेषस्याजो धनुषः खरोष्टतुरगा वृषस्य गोजातिः
मांसाशो मृगसिंहे चान्योन्यसमागते(अ)प्येवं।। ३०

चापसिंहमेषवृषमकराणां मेषराशिः छत्रश्चेद् अजरुरुचमरचमूरवश्चोक्ताः। चापः छत्रगतश्चेदुदयवशात् खरोष्ट्रतुरगान् वदेत्। वृषे छत्रगते गोवृषगवयादीन् वदेत्। मृगे वा सिंहे वा छत्रगते मांसभक्षकान् वदेन्मृगान्। अन्योन्यसमागते(अ)पि। उक्तराशीनामुपरिगते इत्यर्थः। यदि मेषे मेषगतश्चेदजमेव वदेत्। एवमन्ये(अ)पि। केचिदेवं वदन्ति - उक्तराशीनामन्यतमो लग्नगतः, अन्यः छत्रगतः तदन्योन्यसमागमः।।

एतेषामुपरि गते मीने तुरगा(अ)ष्टमे त्वजादि स्यात्
एणो मकरे नकुलः कुळीरके मानुषेषु तज्जातिः।। ३१

एतेषां चतुष्पाद्राशीनां छत्रगते मीने यदि तुरगः, वृश्चिके छत्रे अजाविकादीन् वदेत्। मकरे छत्रगते एणो भवति। कुळीरे कच्छपः। यदि मनुष्यराशिः छत्रगतश्चेन्मनुष्यश्चिन्तितः।।

होरेन्द्रर्क्का नरराशिगताः सौम्येषु दुर्ब्बलस्थेषु
कुर्व्वन्ति जन्म बलिनश्चतुष्पदानां विभागेन।। ३२

प्राकारान्तरेण चतुष्पदच्चिन्ता कथ्यन्ते - होरेन्द्रर्क्कास्त्रयः नरराशिगता बलिनश्चेत् शुभेषु दुर्ब्बलेषु चतुष्पाज्जन्म कुर्व्वन्ति। चतुष्पाच्चिन्तां वा विभागेन वदेदिति।।

अस्मिन् योगे शशिनि स्वक्षेत्रगते खरोष्ट्रमहिषाणां

सौम्ये खरस्य सूर्ये वानरमार्ज्जरनकुलानां।। ३३

विभागज्ञानमुच्यते - अस्मिन् योगे होरेन्द्रक्का इत्युक्तलक्षणमस्ति चेत् जातान् चतुष्पदान् पृच्छकस्य वदेत्। स्वक्षेत्रगते शशिनि द्रेक्काणवशात् केन्द्रत्रिकोणगे खरोष्ट्रमहिषाणां जन्म वदेत्। सौम्ये स्वक्षेत्रगते केन्द्रत्रिकोणगे खरान् त्रिविधान् वदेत्। एते मृगा ऊर्ध्वमुखा ऊर्ध्वमुख्युदये शृंगिणः, तिर्यङ्मुख्युदये दंष्ट्रिण, अधोमुख्युदये खुरिणः। सूर्ये स्वक्षेत्रगते द्रेक्काणवशाद् वानरमार्ज्जारनकुलानां जन्म वदेत्।।

अश्वस्य गुरौ भौमे(अ)जाविकमृगमर्क्कजे मृगशुनोश्च
पशुजन्म भृगौ वाच्यं स्वर्क्षस्थेषु ग्रहेषूक्तं ।। ३४

गुरौ स्वक्षेत्रगते(अ)श्वप्रसूतिं वदेत्। भौमे स्वक्षेत्रगते उदितद्रेक्काणवशादजाविकमृगांस्त्रीन् वदेत्। मन्दे सौम्यराश्युदये मृगप्रसूतिं वदेत्। क्रुरराश्युदये शुनो जन्म वदेत्। शुक्रे स्वक्षेत्रगते पशु जन्म वदेत्। सर्व्वेषु ग्रहेषु स्वक्षेत्रतेषु सर्व्वेषां प्रसूतिं वदेत्। यत्र प्रस्तुतो राहुस्तत्र शनिवत् फलं वदेत्।।

द्वादशोध्यायः

भृग्वंगारकवर्ग्गे योगे वा पारदारिकः प्रष्टा
भृगुबुधयोः कन्यायां तथा पुनर्भूपतिश्चार्क्के।। १

तत्र प्रश्नकाले प्रश्नफलप्रत्ययार्त्थमेतानि लक्षणानि प्रष्टुर्वदेत्। तत्र भृगुकुजवर्ग्गषट्क उदिते प्रष्टा पारदारिको भवति। एकराशिगतौ शुक्रकुजौ लग्ने वा सप्तमे वा एवं वदेत्। भृगुबुधयोर्वग्गोंदये वा तयोर्योगे वा पुनर्भूभर्त्ता भवति। अस्मिन् योगे स्वस्त्री क्षत्रियदूषणा वा भवति।।

नार्याश्रयान् समृद्धो दुर्ब्बलचक्षुर्भृगोर्दिनकृतश्च
भृगुचन्द्रमसोराढ्यः कलहप्रायो भवेत्प्रष्टा।। २

शुक्रसूर्यवग्गोंदये वा योगे वा नार्याश्रयाल् समृद्धसम्पद्युतः प्रष्टा भवेत्। नेत्रवैकल्यं च स्वस्य वा स्त्रिया वा वदेत्। शशिशुक्रयोर्वग्गें योगे वा आढ्यो भवति। स्त्रीकलहप्रियश्च अन्येन ग्रहेणापि शुक्रचन्द्रयोर्यदुक्तं तल् प्रष्टुर्वा तस्य पत्न्या वा वदेत्।।

अन्याक्रान्तस्त्रीको यमशशिनोराढ्य इन्दुगुरुवर्ग्गे
बुधशशिवर्ग्गे धन्यः शशिकुजयोर्मातृहीनः स्यात्।। ३

अन्याक्रान्तस्त्रीकः यमशशिवग्गें योगे वा। प्रष्टुर्वा तस्य पत्न्या वा वदेत्। स्वस्त्री अन्याक्रान्ता भवति। चन्द्रगुरुवग्गें वा योगे वा आढ्यो भवति, तस्य माता च सुशीला द्रव्ययुता भवति। बुधशशिवग्गें योगे वा धनवान् भवति, शशिकुजयोर्वग्गें योगे वा क्षीणचन्द्रश्चेन्मातृहीनः प्रष्टा। बलयुते योगयुतः।।

क्रूररक्षकमल्लाः कुजवर्ग्गे सौरसौम्यगुरुयोगे
सौरेन्दुयोर्योगे स्यादानृतिको नरो ज्ञेयः।। ४

कुजमन्दयोर्वग्गोंदये अतिक्रूरः। कुजबुधयोर्वग्गोंदये रक्षापुरुषः प्रष्टा। कुजगुरुवग्गोंदये मल्लः। सौरबुधयोर्वग्गोंदये अनृतवादी। अथ उक्तग्रहौ एकराशौ लग्ने सप्तमगौ वा एवमेव वदेत्। ययोर्वग्गौ नोक्तौ तयोरपि निरूप्य वदेदूहात्। सूर्यकुजयोर्वग्गोंदये वा योगे वा पितृहीनः। गुरुरवियोगे नवमराशिस्थिते पिता सम्पन्नः। गुरुशुक्रवग्गोंदये तौ लग्ने तत्सप्तमेवा एकराशिगौ चेद् भार्या साध्वाचारा। शनिचन्द्रयोगे माता दुष्टाचारा। शनिशुक्रयोगे भार्या दुश्शीला। चन्द्ररविवग्गोंदये योगे वा पितृमातृजनपूज्य इत्येवमूह्यं। प्रष्टारूढराशौ वा तत्सप्तमेवा उच्चगतो ग्रहस्तिष्ठति चेत् तस्य ग्रहस्योक्तं द्रव्यं सर्व्वं प्रष्टुरस्तीति वदेत्। शत्रुनीचराशिगतश्चेत्तस्य तस्य नाशं वदेत्। सौम्यग्रहे प्रष्टारूढकेन्द्रगते बलयुते तस्य ग्रहस्य उक्तद्रव्यलाभं पृच्छति चेत् तस्यापि लाभं शुभत्वं च वदेदित्युपदेशः। एतन्ममाचार्योक्तं। षष्ठाष्टमव्यगतस्य ग्रहस्य यद् द्रव्यमुक्तं तन्न लभ्यते। लाभस्थानगतो लाभाय भवति।।

आरण्ये चरवर्ग्गे पक्षी शृंगी खुरी तथा चर्म्मी
भृगुबुधवर्ग्गे योगे पक्षी यदि तौ निरीक्षेते।। ५

आरण्यराशौ चरवग्गोंदये पक्षिणां च शृंगखुरचर्म्मग्राह्याणां चतुष्पदानां च प्रसूतिचिन्तां प्रष्टुर्वदेदिति। उक्तराशिवग्गोंदये वा बुधभृगुवग्गोंदये वा योगे वा तयोर्योगदृष्टिभ्यां वा पक्षिचिन्ता वक्तव्या। दीर्घदीषाणग्रहवग्गोंदये तयोर्योगदृष्टौ वा उक्षादीनां शृंगग्राह्याणां चिन्ता वदेत्। उक्तराशिवग्गोंदये खुरग्रहदृष्टियुते सिंहादीनां खुरयुतानां चिन्ता ज्ञेया। तस्मिन् राशौ सूर्यभौम वग्गोंदये तयोर्योगे दर्शने वा व्याघ्रादीनां चर्म्मग्राह्याणां भवतीति विमृश्य वदेत्। उद्यन्नक्षत्र प्रथमपादोदये पक्षी, द्वितीये पादोदये शृंगी, तृतीये खुरी, चतुर्थे चर्म्मी।।

होराद्रेक्काणगृहत्रिंशद्द्वादशनवांशका वर्ग्गाः
शुभबुद्धिजराप्रभवा गुरुबुधसौरा यथासंख्यं।। ६

कालहोरा च द्रेक्काणं च स्वगृहं च त्रिंशत्भागाश्च द्वादशांशकनवांशकाश्च वर्ग्गाः। ग्रहस्यैते षड्वर्ग्गाः। ते च सूर्यचन्द्रयोः राश्यर्द्धहोरा भवति। शुभबुद्धिजराप्रभवो गुरुबुधसौरा यथासंख्यं - उदयगता सर्व्वो गुरुवर्ग्गाश्चेत् प्रष्टुः शुभं वदेत्। बुधवग्गोंदये प्रष्टा प्रचुरबुद्धियुतः। शनिवर्ग्गोदये व्ययश्च हानिश्च रोगश्च मरणञ्च भवति। जराप्रभवं प्रष्टुर्वदेत्। जराशब्दस्तु अशुभमात्रोपलक्षणार्थः। शनिवत् सूर्यकुजयोः जीववत् पूर्व्वपक्षचन्द्रशुक्रयोः। अपरपक्षगतश्चन्द्रः शनिवद्भवति।

मेषांशे(अ)जावीनां गोमहिषाणां वृषांशके जन्म

मिथुनांशे स्त्रीपुंसामपरे मध्वम्बुचाराणां।। ७

अथ मेषादिराशिषु वर्ग्गोत्तमोदयेषु येषां जन्म तानाह - उक्तयोगाभावे वा बलरहिते वा वर्ग्गोत्तमांशोदये पृच्छति चेदेतान् जीवान् वदेत्। अथवा वर्ग्गोत्तमरहितेनापि बलयुतेन राश्यंशेन वदेद्राशिना वा। मेषे वर्ग्गोत्तमांशोदये अजानामवीनां च जन्म वदेत्। वृषे वृषांशोदये पशुमहिषाणां। मिथुनांशे स्त्रीपुरुषयुग्मं वदेत्। अपरे कर्क्कटांशे मधुकराश्चांबुचराश्च प्राणिनः।।

वृकसिंहवराहाणां रुरोश्च सिंहांशके परे नृयुग्मं
गजजन्मतुलांशे स्यात् सरीसृपाणां ततः परतः।। ८

सिंहे सिंहांशोदये वृकसिंहवानरवराहरुरुचमरीणां जन्म वदेत्, कन्यांशे नृयुग्मं, तुलांशे गजस्य, वृश्चिकांशे स्थलसरीसृपाणां ततः परतः।।

काकानां वा नवमे पाणा दशमांशके भवेद्दासाः
आधार्म्मिकचोरशुनां कुंभे जलजीविनां चान्त्ये।। ९

चापांशे काकाद्याः पक्षिणः। मृगांशोदये पाणावरदासानां जन्म भवति। धर्म्महीनचोराणां शुनां च कुंभांशे भवति। मीनांशे जलजीविनां पक्षिणां जन्म वदेत् इति। एवमेव नष्टमुष्टिचिन्तासु वदेत्। वर्ग्गोत्तमांशराशिभिर्बलयुतैः पूर्व्वोक्तैर्मनुष्यचिन्तालक्षणे मनुष्ययोनिनिश्चयं ज्ञात्वा पश्चात् स्त्रीपुरुषविकल्पं ततश्चयोः शुभाशुभरोगमरणानि वदेत्। अशुभधुरुधुरायोगे षष्ठाष्टमलग्नचतुर्त्थगतैः क्रूरैर्वा रोगं वदेत्।।

त्रयोदशाध्यायः

उरगैरवेष्टितकाया द्रेक्काणा गृध्रकोलसदृशमुखाः
क्रूराः कुर्युरमरणं निधने यदि चन्द्रमास्तिष्ठेत्।। १

जीवस्य जीवनमस्ति न वेति चिन्तते - सर्प्पवेष्टिताश्च द्रेक्काणाः गृध्रसूकरवानरगोमायुसदृशमुखाश्च द्रेक्काणाः दण्डपाशरज्जुधारिणश्च लग्नगताश्च क्रूरसहिताः दृष्टा वा क्षीणचन्द्रे(अ)ष्टमगते द्रेक्काणाः पृच्छकस्य मरणं कुर्युः। अन्यकार्यार्त्थमन्यत् पृच्छतः प्रष्टुरपि मरणं कुर्युरित्यर्त्थः।।

पृष्टोदये विलग्ने क्रूरा लग्नास्तहिबुकदशमगताः
निधने च शीतरश्मौ म्रियते रोगार्दितः पुरुषः।। २

पृष्ठोदयराश्युदये क्रूरग्रहाः समस्ताः केन्द्रगताः निधने शीतरश्मौ यदि रोगार्दितो म्रियते केन्द्रसौम्या न चेत्। तत्र प्रष्टा अन्यस्यायुः पृच्छति चेत् सर्व्वं तस्यैव वदेत्।।

पश्यन्त्यशुभा यतिमे राशौ स्थित्वाथ रोगसूत्रस्थं
ततिमे दिवसे व्याधिः सौम्यैः सुखमेधते रोगी।। ३

रोगयुतस्य रोगसूत्रकारणं क्रूरग्रहं लग्नगतं यस्मिन् काले यस्मिन् नक्षत्रे स्थित्वा अशुभाः पश्यन्ति तत्रातिक्रूरेण चन्द्रेण युते रोग आरभते। तं ग्रहं लग्नकेन्द्रगाः सौम्याः यस्मिन् राशौ स्थित्वा पश्यन्ति तत्र अतिशुभेन चन्द्रेण युते रोगशान्तिं वदेत्।।

लग्नाच्चन्द्रो यतिमे राशौ ततिमे दिने भवेद्रोगः
सौम्याः पश्यन्तीन्दुं यतिमे ततिमे सूखी दिवसे।। ४

उदितराशिनक्षत्रादारभ्य चन्द्रो यस्मिन् नक्षत्रे स्थितः क्रूरग्रहवीक्षितो युतो वा भवति तस्मिन् नक्षत्रे मरणं भवति। लग्नोदितनक्षत्रादारभ्य यस्मिन् नक्षत्रे स्थितश्चन्द्रः सौम्यदृष्टयुयो वा भवति तस्मिन् चन्द्रे स्थिते रोगी सुखी भवति।।

षष्ठाष्टमयोः क्रूरस्तिष्ठत्यवलोकते(अ)थवा किरणैः
नोत्तिष्ठते स रोगो न रुजति च शुभेक्षणात्ताभ्यां।। ५

लग्नात् षष्ठाष्टमयोः क्रूरग्रहयुतवीक्षितयोः रागात्तों नोत्तिष्ठते। तयोरेकत्र पापो(अ)न्यत्र सौम्यश्चेद्याप्यो रोगः। तत्र नवमराशौ शुभक्षेत्रे शुभदृष्टयुते वा चिकित्सया रोगशान्तिर्भवति। अशुभे विपरीतं। स्थिरराश्युदये रोगो न शाम्यति। चरे शान्तिर्भवति, उभये याप्यः। षष्ठाष्टमे शुभदृष्टयुते वा चिकित्सया रोगशान्तिर्भवति। अशुभे विपरीतं। षष्ठाष्टमे शुभदृष्टयुते रोगो नास्ति।।

पित्तेन कुजे साम्ये वातेनाभ्यां तु सौरभास्करयोः
वातकफाभ्यां शेषेषूह्याः स्वांगेषु धात्वाद्याः।। ६

पित्तेन कुजे। उदयारूढे भौमदृष्टयुते वा पित्तविकाराद्रोगः संभवति। सौम्ये वातविकारात्। आभ्यां तु सौरे च वातविकारात्। सूर्ये पित्तविकारात्। शेषेषु चन्द्रगुरुशुक्रेषु क्रमाद्वातश्लेष्मविकाराद् इति। राहुः सौरवत्। तत्र क्षीणचन्द्रो राशिवशाद्रोगं ददाति। ग्रहवीक्षणरहिते ग्रहाणामुक्तं स्वेषां राशीनामपि वदेत्। तस्मादपि त्रिदोषकापाद्धातुविकाराद् ग्रहस्थितांगेषूदयराशिं शिरसि स्थाप्य पूर्व्वोक्तलक्षणैः यस्मिन्नंगे ग्रहः स्थितस्तत्र रोगं वदेत्। बहुग्रहेषु वातपित्तश्लेष्मकेषु समबलेषु दृष्टेषु रोगः सन्निपातो भवति। सूर्यादिग्रहाणां पूर्व्वोक्तान् धातूनद्यापि वक्ष्ये - स्नाय्वस्थ्यसृक्त्वगथ शुक्लवसा समज्जा मन्दार्क्कचन्द्रबुधशुक्रसुरेढ्यभौमाः। सूर्यस्यास्थि, चन्द्रस्य रुधिरं, कुजस्य मज्जा, बुधस्य त्वक्, जीवस्य वसा, शुक्रस्य शुक्लं, शनेः स्नायुरिति सप्त धातवः। शूलज्वरातिसारकुष्ठविद्रधिकाद्यान् रोगान् बुध्या निरूप्य वदेत्।।

मरणस्य हेतुरूह्याः स्वजातिभूतात्मयोनिभिश्चापि
क्रूरालयग्रहेषु तु विषाग्निशस्त्रैर्वदेन्मरणं।। ७

मरणस्य हेतुं कारणं निरूप्य वदेत् पृच्छकस्य स्वजातिभिः। मेषोदये बलयुते अजेन मरणं, वृषोदये वृषेण इत्यादि द्वादशराशयो ज्ञेयाः। उभयराश्यंशकेन अटवीक्षेत्रग्रामा इत्याद्युक्तस्थाने दृष्टयुतग्रहेण पृथिव्यप्तेजोवाय्वाकाशेषु बलयुतग्रहस्थाने केन्द्रैः चङ्क्रमणासनशय्याः। बलयुतेन राशिना पुनरपि पञ्चभूतैः पृथिव्यादिभिर्मरणं वदेत्। तत्र उदयारूढच्छत्रराशिना वा तत्र स्थितेन ग्रहेण वा मरणभूमिभाजनाश्चिन्त्याः। यदि छत्रराशावत्युच्चगो ग्रहो(अ)स्ति चेद्देवगृहे क्षेत्रे वा मरणं। उच्चगते राजसन्निधौ, नीचगते चण्ढालसन्निधौ, बन्धुगृहे बन्धुजने, शत्रुगृहे शत्रुगृहे। क्षेत्रगते ग्रहे च स्वगृहे मरणं वदेत्। यदि छत्रराशिरुदयाद् दूरराशिश्चेत् परदेशे। समीपे समीपं। ऊध्वमुखे मृत ऊर्ध्वमुखः। एवमन्ये। क्रूरालयग्रहेषु विषाग्निशस्त्रैर्वदेन्मरणं। पापराशौ पापग्रहाः स्थितास्तैर्दृष्टे युते वा यथासंभवं विषाग्निशस्त्रैर्मरणं वदेत्। सर्पेण वा अग्नव्यापत्या वा आयुधेन वा मरणं वदेत्। तत्र एकजिह्वायुधं सूर्यस्य, द्विजिह्वायुधं कुजस्य, त्रिजिह्वायुधं राहोः, मन्दस्य चतुर्जिह्वायुधं।।

गतिरपि तेषां वाच्यं ग्रहभवनांशैः सुरादिषु क्रमशः
द्विपदचतुष्पदपक्षिसरीसृपजात्यादियोगेन।। ८

उदयगतो वा दृष्टो वा यो ग्रहः स उच्चगतश्चेत् देवसमीपे, नीचगतश्चण्डालसमीपे, शत्रुगतो नरकस्थ इत्यादि। द्विपाद्राशिगतश्चेद् द्विपात् भवति। चतुष्पाद्राशिगतश्चेच्चतुष्पाद् भवति। पक्षिराशिद्रेक्काणगतश्चेत् पक्षि, सरीसृपराशिगतश्चेत् सरीसृपो भवति। ग्रहयुतवीक्षणरहितेन राशिनापि वदेत्। एवं निरूप्य पुनर्ज्जन्म वदेत्। वर्ग्गोत्तमांशोदये तेनैव वदेत्। ऊर्ध्वमुखोदये द्विपदादिजातिषु प्रथमः, अधोमुखे(अ)धमः, तिर्यङ्मुखे मध्यमः। बलयुतेन लग्नेन वा द्विपदादिप्रभवं वदेत्। इत्युक्तप्रकारं विमृश्य निश्चयाद्वदेत्।।

सौरद्रेक्काणे वा भुजंगपरिवेष्टिते(अ)थवा लग्ने
शशिसौराभ्यां दृष्टे बन्धनमिति वाच्यमादेशे।। ९

सौरद्रेक्काणोदये वा निगळरज्जुहस्तेषु द्रेक्काणेषूदितेषु चन्द्रशनिदृष्टेषु पूर्व्वोक्तद्विपदादीनां बन्धनमस्तीति वदेत्।।

पापक्षेत्रेषु यमे त्रिकोणचतुरश्रसप्तमेषु गते
क्रूरैर्निरीक्ष्यमाणे बन्धो(अ)स्तीत्यादिशेत् क्षिप्रं।। १०

यदि पृच्छकेन आदेशे कृते सति पापक्षेत्रगतो मन्दः त्रिकोणचतुरश्रसप्तमानामेकत्र स्थितः क्रूरग्रहवीक्षितश्चेत् क्षिप्रं बन्धनं कृतं इति वदेत्।।

अचिरेण चरे मोक्षः स्थिरे(अ)पि मोक्षस्तु दीर्घकालेन
द्विशरीरगते सौरे मध्यमकालेन मोक्षः स्यात्।। ११

येन कालेन बन्धमोक्ष इति पृच्छति चेत् पूर्व्वोक्तस्थानलक्षणयुतो मन्दश्चराशिगतश्चेत् एकमासेन बन्धमोक्षो भवति। उभयराशिगते(अ)र्द्ध संवत्सरेण भवति अथवा अशुभदृष्टयुते मन्दे रश्मिभिर्यावद्भिः सौरः पश्यति तावद्भिर्मासवर्षर्त्तुभिः पूर्व्वक्रमाद्वदेत् कालं बन्धमोक्षाय।।

सर्प्पाग्निशस्त्रवन्तं द्रेक्काणं वीक्षते रविर्बलवान्
भौमो वा दशमगतो विद्याद्भयमग्निसंभूतं।। १२

सर्प्पधारिणं वा अग्निधारिणं वा शस्त्रधारिणं वा द्रेक्काणं दशमगतो रविर्वीक्षते प्रष्टुरग्निभयं भविष्यतीति वदेत्। भौमे दशमगते(अ)प्येवं वदेत्। राहुर्लग्नसप्तमगतश्चेद् सर्प्पभयं, भौमे लग्नसप्तमगते शस्त्रभयं वदेदिति।।

मध्याह्नचतुर्त्थाभ्यां पूर्व्वार्द्धगताः शुभा विवृद्धिकराः
कुर्युः पापा हानिं सर्व्वे मध्याच्च्युता यवनाः।। १३

दशमराशेः द्वितीयहोरामारभ्य चतुर्त्थराशेः प्रथमहोरान्तं राशिषट्कं गताः शुभग्रहाः सर्व्वकार्येषु जयवृद्धिलाभकराः। अशुभा विपरीतं हानिं क्लेशं च कुर्युः। तत्र नवमराशिगतशुभाशुभग्रहवशात् लाभालाभं च वृद्धिक्षयं च वदेत्। नवमराशेरतीते ग्रहे(अ)तीतं। तस्मिन्नेव पश्चाद्गमिष्यति चेत् ग्रहः पश्चादेव फलं वदेदिति यवनाः वदन्ति।।

चतुर्द्दशाध्यायः

चरराशौ तु विलग्ने द्रेक्काणे वा चरात्मके(अ)भ्युदिते
मध्याच्च्युतो ग्रहो वा प्रवासचिन्तां विजानीयात्।। १

चरराशौ लग्नगते वा चरद्रेक्काणे वा पक्षिद्रेक्काणे वा चरराश्यंशकोदये प्रष्टुः प्रवासचिन्ता वक्तव्या। अथवा मध्याच्च्युतो नवमराशिगतो ग्रहश्चराशिगतश्चेत् प्रवासचिन्ता भवति। ग्रहो(अ)धिपतिः। अष्टमे सप्तमेवा(अ)पि चरराशिगतो ग्रहश्चेत् प्रवासश्चिन्तितः।।

निरुपद्रवः प्रवासः शुभग्रहैर्वाञ्छितार्थसिद्धिकरः
त्रासभयपरिक्लेशाः पापैरुदयस्थितैर्वापि।। २

निरुपद्रव इत्यनेन अपि प्रोषितस्य शुभाशुभमुच्यते। लग्नसप्तमाष्टमगतैः शुभग्रहैः प्रोषितस्य नीरोगत्वं च द्रव्यलाभं च वदेत्। पापग्रहैः त्रासं, भयं क्लेशं च वक्तव्यं। तत्र नवमराशौ शुभग्रहश्चेत् प्रवासकाले शुभं। अष्टमे चेद् गन्तव्यदेशप्राप्तिकाले शुभं। सप्तमे चेद् प्रत्युत्तरकाले शुभं। स्वगृहं जिगमिषोः शुभं। तत्रस्थः शुभाः शत्रुराशिस्थाश्चेद् शत्रुसकाशादर्थसम्पत्, गुरुश्चेत् ब्राह्मणसकाशात्, शुक्रश्चेत् स्त्रीसकाशात्, चन्द्रश्चेत् राजमहिषीसकाशात्। बुधे वणिजः। एष्वशुभश्चेदशुभः। आदित्यः स्थितश्चेद्राजनिमित्त उपद्रवः। अस्मिन् प्रकरणे आरूढेन चिन्त्यः। केतूदयराशौ नवमाष्टमसप्तमस्थैरुदयराशिस्थितैश्च वक्तव्यः। नवमगते सूर्ये

राजपुरुषसहायावान् भवति, आयातीति। अष्टमगते सूर्ये राज्ञा वा राजपुरुषैर् वा वारितः पथि तिष्ठति। सप्तमगते सूर्ये लग्नगते च क्षिप्रं आयाति। प्रोषितभयं क्लेशञ्चापि वदेत्। सर्व्वं त्रिषु क्षीणचन्द्रश्चेद् राशिफलं। सम्पूर्णे स्वोक्तं। शनिराह्वोः प्रोषितस्य रोगं वदेत्। भौमे नवमगते वाणिज्यद्रव्यहानिं वदेत्। अष्टमगते पथि दुर्ज्जनविरोधं चोरबाधां च वदेत्। लग्नसप्तमगते रोगं वदेत्। मसूरिकादीनीति।

प्राप्ते ग्रहो(अ)स्तराशिं यदि पृच्छेत् प्रोषितागमं कश्चित्
जीवे चतुष्टयस्थे प्रोषितविनिवृत्तिरादेश्या।। ३

प्रष्टा प्रोषितस्य आगमनं पृच्छति चेदेवं वदेत्। प्राप्ते ग्रहे(अ)स्तराशौ प्रश्नकाले उदयराश्यधिपतिः सप्तमराशिगतश्चेत् प्रोषितागमनं वदेत्। अन्यो ग्रहः स्वोच्चस्वभवनत्रिकोणसप्तमगतश्चेदागमनं वदेत्। बलरहिते ग्रहे वार्त्ता श्रूयते। वक्रीग्रहः सप्तमगतश्चेत् प्रोषितस्य विनिर्वृत्तिर्भवति। बलयुते जीवे केन्द्रगते च आगमनं वदेत्। लग्नाधिपतौ वक्रगते आगमनं।।

ग्रहभवनात्मीयदिशोस्तदन्तराळे कियन्ति चर्क्षाणि
तावद्भिरेव दिवसौः पुनरागमनं प्रयातानां।। ४

ग्रहदिशि वा राश्युक्तदिशि वा स्थितः प्रयातो भवति। लग्नस्थितनक्षत्रादारभ्य प्रश्नफलदग्रहस्थितनक्षत्रान्तराळे ऋक्षा यावद्संख्या भवन्ति स्थिरराशौ तावत्संख्यैर्दिवसैः यात्रानिवृत्त आयाति। उभयराशौ तैर्द्विगुणितैर्व्वदेत्। चरराशौ त्रिगुणितैः दिवसौः वदेत्। द्रेक्काणवशादिति केचिद्वदन्ति। प्रथमद्रेक्काणे उक्तकालेन, द्वितीये द्विगुणितेन, तृतीये त्रिगुणितेन। तत्र यात्रा निवृत्तिः पूर्व्वोक्तैः कालज्ञानार्थलक्षणैः इहोक्तैश्च बलाबलं ज्ञात्वा वर्षं, मासं, च दिवसं च यात्राविनिवृत्तिं वदेत्। निवृत्तेरपि पथितगतदिवसान् ज्ञात्वा प्रष्टुर्व्वदेत्। अत्र नक्षत्राणां स्वरूपसंश्यां केचिद्वदन्ति।।

शुक्रेन्दुजौ त्रिकोणे चन्द्रः केन्द्रे शुभेक्षिताः क्रूराः
मित्रक्षेत्रगता वा भवेयुरशुभेक्षणापेताः।। ५

अथ प्रोषितस्यागमनलक्षणं आह - शुक्रेन्दुजौ एकत्र वा मिथो वा त्रिकोणगतौ बलयुतश्चन्द्रः केन्द्रगतो भवति चोदागमनं भवेत्। तदेको योगः। चन्द्रे केन्द्रगते क्रूरग्रहाः सर्व्वे शुभग्रहवीक्षिता वा स्वोच्चमित्रगता वा तस्यागमनं भवेत्। दूरगतस्यापि सुखं च वदेत्।।

मेषूरणोदयौ द्वौ सौम्यग्रहवीक्षिता यदि स्यातां
भवति तदाप्यागमनं प्रोषितनृणां कृतार्थानां।। ६

उक्तयोगाभावे लग्नदशमौ द्वौ सौम्यग्रहवीक्षितौ वा युतौ वा प्रोषितानां आगमनं भवति कृतार्थानां। चिन्तितार्थकार्यं च साध्यं भवेत्। दशमगते क्रूरे कार्यनाशं वदेत्।।

हिबुकं ग्रहे प्रविष्टे गृहं प्रविष्टं प्रवासिनं विद्यात्
हिबुकास्तमयान्तरगे ग्रहे तु पथि वर्त्तते पुरुषः।। ७

उदयारूढाधिपतिः चतुर्त्थभवनगतश्चेत् प्रोषितं गृहं प्रविष्टं वदेत्। अन्यो वा स्वेच्चमित्र ग्रहः चतुर्त्थगतश्चेत् एवं वदेत्। तदधिपतिर् वा चतुर्त्थसप्तमभवनयोरन्तरे स्थितश्चेत् चिन्तितः पुरुषः पथि वर्त्तमानो भवति। तत्र सप्तमराशिगे ग्रहे प्रवासदेशान्निवृत्तः। षष्ठगते पथि मध्येस्थितः शीघ्रयातश्च। पञ्चमगते स्वराष्ट्रगतः। हिबुके गृहगत इति। ग्रहस्य शीघ्रा वा मन्दा वा मध्यमा वा गतिर्ज्ञात्वा तदनुरूपं प्रोषितस्य वदेत् गमनं।।

षष्ठत्रिकोणयोर्वा जामित्रे पापवीक्षिताः क्रूराः
पृष्ठोदये विलग्ने प्रोषितमरणं शुभादृष्टे।। ८

षष्ठकत्रिकोणयोः जामित्रे वा क्रूरवीक्षिताः पापाः तिष्ठन्ति चेत् पृष्ठोदयराशिलग्ने शुभवीक्षणरहिते सति प्रोषितस्य मरणं वदेत्। मृत इति वदेत्। मरणप्रदेशं पूर्व्ववत् वदेत्। चतुष्ठ राशिषु स्थितैरतिक्रूरेण मरणस्थानं वदेत्। नवमे क्रूरे प्रोषितकाले मृतः। सप्तमे क्रूरे प्रोषितः स्वसिद्धान्तदेशं गत्वा मृतः। षष्ठस्थिते निवृत्तः पथि गतो मृतः। पञ्चमे स्वदेशासन्नगतो मृत इति।

ग्रहो ग्रहेणाभिहतो यद्यस्तमुपगच्छति
सौम्यैरदृष्टस्तल्क्काले प्रोषितं मृतमादिशेत्।। ९

युद्धपराजितो ग्रहो(अ)स्तमयगतः सौम्यावीक्षितश्चेन्मरणं वदेत्। यस्मिन् दिने ग्रहः सप्तमगृहं प्रविष्टः तद्दिने मृत इति वदेत्।।

जामित्रान्तर्गते पापे तथा शत्रुनिरीक्षिते
पृष्ठोदये विलग्ने च बन्धो(अ)स्तीत्यचिराद्वदेत्।। १०

जामित्रगते पापे शत्रुवीक्षिते पृष्ठोदये पापयुते लग्ने प्रोषितो बद्धो भवति। वीक्षितग्रहवशात् तस्य पूर्व्वोक्ता ये मनुष्याः तैः शत्रुभिर् बन्धः कृत इति वदेत्। शत्रु वीक्षणरहिते बन्धुगृहे वा भवने वा रोगं वदेत्।।

द्विपदचतुष्पदविहगाः स्थलांबुचराश्च राशयः प्रोक्ताः
तेषां यादृक्षेण ग्रहो गतास्तादृगागच्छेत्।। ११

पूर्व्वोक्तलक्षणैः प्रोषितागमनं निश्चयात् ज्ञात्वा लग्नाधिपतिर्वा अन्यो वा बलयुतो य ग्रहः प्रोषितागमनकारणं भवति स ग्रहो यादृशे राश्यंशे स्थितः प्रोषितः तादृशेनागच्छेत्। लग्ने बलयुते तेनैव वदेत्। द्विपदराशिगते ग्रहे पदातिः ससहाय आगच्छेत्। चतुष्पाद्द्राशिगते चतुष्पाद्द्रथमारुह्यागच्छेत्। स्थलराशिगते स्थलेन आगच्छेत्। जलराशिगते जलेन नावा स्थित आगच्छेत्। शकटद्रेक्काणगतश्चेत् शकटेन वा रथेन वा आगच्छेत्। पक्षिद्रेक्काण राशिगते अश्वमारुह्यायात्। आकाशराशिगते शिबिकाद्यारुह्यायात्। यादृशेन ग्रहगतिर्वर्त्तते तादृशः

प्रोषितो(अ)प्यागच्छेदिति।

वृषाद्यो द्वन्द्वमध्यश्च कर्क्किसिंहादिमावपि

द्रेक्काणाः पक्षिणः प्रोक्ताः प्रवासेषु हिताहिते।।

पञ्चादशाध्यायः

दग्द्धं गृहमुर्व्वीजे नवं च भृगुजे तु चित्रकर्म्मयुतं
चन्द्रे दृढं पुराणं बहुविधशिल्पान्वितं सौम्ये।। १

अथ प्रोषितगृहं वा भोजनमैथुनादि गृहं वा चोराहृतद्रव्यस्थितगृहं वा अन्यद्वा कीदृग्विशिष्टं गृहमिति प्रष्टा पृच्छति चेत् तद्गृहज्ञानार्थमाह - लग्ने वा सप्तमे वा स्थितेन ग्रहेण वदेत्। उर्व्विजे दग्द्धं गृहं। भृगुजे नवं चित्रकर्म्मयुतं च। चन्द्रे पुरातनं दृढं च। बुधे बहुविधचित्रयुतं।।

जीवे चित्रविचित्रं काष्ठप्रायं रवौ विशीर्ण्णं च
रविजे जीर्ण्णविशीर्ण्णं काष्ठप्रायं गृहं वाच्यं।। २

गुरोः बृहच्चित्रेण विचित्रं गृहं। सूर्यस्य गृहं काष्ठप्रधानं जीर्णं भवति। मन्दस्य पुराणं दीर्घाकारं काष्ठाढ्यमतिजीर्ण्णं गृहमुक्तं।।

भौमस्य पाकशालामन्ये पाठ्यं गृहं वदन्ति गुरोः
सौम्यस्यालेख्यगृहं भानोरपि पाकशालेति।। ३

पूर्व्वोक्तग्रहाणां प्रवृत्तिकरणमुच्यते - अन्ये आचार्या एवं वदन्ति। कुजस्य पाकशाला अग्निगृहं वा भवति। जीवस्य वेदशास्त्रपठितार्त्थनिर्म्मितशाला अग्निहोत्रशाला वा भवति। बुधस्यालेख्यगृहं क्रीडागृहं वा वदेत्। आलेख्यगृहं चित्रशाला। सूर्यस्य जलराशिगतस्य स्नानगृहं। स्थलराशिगतस्याग्निशाला वा भवति। पथिकानां विश्रमार्त्थं निर्म्मितं गृहं वा इष्टकापाकशालां वा वदेत्।।

इन्दोर्वेश्म तु दिव्यं दैत्यगुरुरोर्जीर्ण्णमुच्यते वेश्म
गोशाला रविसूनो राहोर्वर्च्चस्कगृहं ब्रूवते।। ४

चन्द्रस्य सबलस्य विप्रगृहं वा राजगृहं वा वदेत्। शुक्रस्यासञ्चारितं जीर्ण्णगृहं वदेत्। मन्दस्य गोशाला वा शूद्रगृहं वा भवति। राहोर्वर्च्चालयं मलविसर्ज्जनगृहं वा चण्डालगृहमिति। लग्नेन वा वीक्षणग्रहेण वा उक्तानि गृहाणि विप्रादीनां वर्ण्णानां भवन्ति। उच्चगतग्रहस्य देवगृहं वा राजगृहं वा भवति। क्षेत्रगतस्य ग्रहस्य स्वजातिगृहं, नीचगतस्याधमगृहं, शत्रुगतस्य शत्रुगृहं, मित्रगतस्य मित्रगृहमित्यादि।।

अळिकर्क्कर्य्यजतौलिगवां यमगुरुभूसूनुशुक्रसूर्याणां
झषयुगमन्याधनुषां स्वदिशि बुधगृहं विनिर्द्देश्यं।। ५

समवृत्तं मकरगृहं कुंभधरस्यापि राहुवेश्म स्यात्
सिंहस्यालयमाहुः कोष्ठागारं त्रिकालज्ञाः।। ६

अथ वीक्षणग्रहाभवे च केवलराशिनोक्तिः श्लोकद्वयेन राशीनां गृहमुच्यते - वृश्चिकस्य मन्दस्योक्तं गृहं। कर्क्कटकस्य जीवस्योक्तं गृहं। मेषस्य कुजस्योक्तं भवति। तुलायाः शुक्रस्योक्तं गृहं। वृषभस्य सूर्यस्योक्तं गृहमिति। मीनमिथुनकन्याधनुषां चतुर्ण्णां राशीनां बुधस्योक्तं गृहं भवति। राशीनां स्वदिशि गृहं वदेत्। ग्रहेण द्वारं वदेत्। ग्रहभवनाभ्यां गृहं तद्द्वारं च निरूप्य संबन्धं ज्ञात्वा वदेत्। मकरस्य गृहं समवृत्तं। कुंभस्य राहोरुक्तं भवति। सिंहस्यालयं कोष्ठागारं भवति। एवमाहुरतीतानागतवर्त्तमानकालज्ञा इति।।

यदि केन्द्रगताः सौम्या लग्नादेकादशे(अ)थवा नियतं
कुर्युर्धनवद्गेहं द्वारं स्वस्यां दिशि प्रोक्तं।। ७

उक्तगृहेषु निधिधनधान्यादि अस्ति किं नु नास्ति किमिति प्रष्टा पृच्छति चेत्तदपि वदेत्। ग्रहोदयदृष्टिसंभवे वा ग्रहे बलहीने वा राशेरुक्तं गृहं वदेत्। उदयकेन्द्रगताः सौम्यग्रहा धनधान्यवन्तं गेहं कुर्व्वन्ति। एकादशगता वापि। उदयारूढाद्वा केन्द्रलाभेष्वेकत्र उच्चे सौम्यग्रहस्तिष्ठति चेत् पृच्छकस्य निधिरस्तीति वदेत्। नवमे शुभे निधिलाभो भवति। गृहस्य द्वारं ग्रहस्योक्तदिशि वक्तव्यं। तत्र केन्द्रलाभेषु पापग्रहाश्चेद् धान्यादि रहितं गृहं भवति।।

यस्मिन् भागे सौम्यो गृहेषु तद् द्रव्यमादिशेत्तत्र
यस्मिन् भागे पापस्तस्मिन् शल्यं विनिर्द्देश्यं।। ८

पूर्व्वोक्तगृहेषु यस्मिन् भागे अतिबलयुतं शुभग्रहस्तिष्ठति तत्र स्थाने तस्य धातुचिन्तायामुक्तं द्रव्यं वदेत्। स्थिरचक्रराशिविधानेन यस्मिन् राशौ ग्रहः स्थितः तत्रैव द्रव्यं भवति। ग्रहदृष्टराशौ वा विमृश्य वदेत्। गृहादन्यत्र वा उदयराशिग्रहद्रेक्काणस्थाने निधिं वदेत्। उदयराशिना वा फळदग्रहभुक्तभागैर्वा निष्कादिसहस्रान्तं द्रव्यं वदेत्। राश्याद्युदये वा राश्यादौ ग्रहे स्थिते वा स्वल्पं द्रव्यं वदेत्। एवं बहुग्रहेषु सहस्रादधिकं द्रव्यमपि वदेत्। उक्तराशिषु नीचशत्रुगतैः पापैः वल्मीकं च क्षुद्रं च सर्प्पादिसरीसृपाणि च पीडां च वदेत्।।

आरण्ये(अ)न्यगृहस्थे ग्रहे गृहं तस्य भवति परकीयं
स्वभवनयुक्ते स्वगृहं पूर्व्वोक्तविशेषणैर्युक्तं।। ९

पूर्व्वोक्तानि गृहाणि स्वस्य किन्नु परस्य इति पृच्छति चेत् तदपि लक्षणैर्विमृश्य वदेत्। आरण्ये राशिगते ग्रहे(अ)न्यग्रहस्य राशिगते वा वीक्षणग्रहे तस्य परस्य गृहं वदेत्। स्वभवनयुते ग्रहे वा स्वभवनं लग्नं वीक्षते वा ग्रहे स्वगृहमेव। शत्रुगृहे स्थित्वा ग्रहो वीक्षते चेत् शत्रुगृहं, मित्रगृहे मित्रगृहं, नीचगृहस्थितश्चेदधमजातेर्गृहं, उच्चे स्थित्वा वीक्षते चेद् देवगृहं। बहुग्रहवीक्षिते लग्ने(अ)धिकबलेन वदेत्।

अन्यैर्ग्रहैश्चिन्तितगृहस्य समीपे स्थानि जलकान्तारदेवगृहोद्यानानि वदेत्। पूर्व्वोक्तविशेषणैर्युक्तमेतद् गृहलक्षणं नष्टचिन्तासु वदेत्।।

शय्याकोशोपस्करविहारदेवालयाग्निजलनिलयाः
भृगुजीवयमबुधानां रविकुजशशिनां प्रदेशास्स्युः।। १०

आरूढदर्शनग्रहवशाद् यस्मिन् स्थाने स्थितं द्रव्यं चोरो(अ)प्याहरति तत् स्थानं ग्रहवशाद्वदेत्। शुक्रदृष्टे लग्ने शयने वा शय्यागृहे वा स्थितं द्रव्यं। गुरुवीक्षिते कोशगृहं वा आकाशे बद्धं वा द्रव्यमिति। मन्ददृष्टे उपस्करपात्रविन्यासगृहस्थं वी जीर्ण्णपात्रस्थितं द्रव्यं वा वदेत्। बुधस्य विहारदेशस्थं द्रव्यं। सूर्यदृष्टे देवगृहस्थं वदेत्। चन्द्रदृष्टे जले वा जलगृहे वा स्थितं द्रव्यमिति। कुजदृष्टे(अ)ग्निगृहे स्थितं द्रव्यमिति। अथ भूमेरधः स्थितं वा भवतीति सप्तमस्थग्रहवशान्नष्टद्रव्यस्थितस्थानं वदेत्। तदभावे सप्तमवीक्षणस्य ग्रहस्योक्तं स्थानं वदेत्। तस्याभावे उदयारूढच्छत्रराशिग्रहवशाद्वदेत् चोराहृतद्रव्यस्थानमिति। अत्र लग्ने बलहीने लग्नराशिमारूढमिति मत्वा लग्नोदितनवांशराशिं लग्नं मत्वा तयोः छत्रराशिर्ग्राह्यः। छत्रराशिना नष्टद्रव्यस्थितस्थानं वदेत्।।

मित्रर्क्षगतैस्सौम्यैर्दृष्टे युक्ते(अ)थवा विलग्ने तु
मैत्रीचिन्तां विद्याद् स्त्रीपुरुषसमागमं चापि।। ११

मित्रर्क्षगतैः सौम्यग्रहैः युतवीक्षिते लग्ने मैत्रीचिन्ता वक्तव्या। तत्र मित्रक्षेत्रगतो ग्रहः सौम्यराशौ मित्रदृष्टश्चेदतिशुभा मैत्री चिरकालं तिष्ठति। पापराशिवशावपि शुभमित्रवीक्षितश्चेत् शुभं भवति। पापराशिगतः क्रूरेण शत्रुणा दृष्टश्चेत् चिरं शत्रुर्भवति। मित्रक्लेशाय भवतीत्यर्थः। मित्रराशिगत शत्रुवीक्षितश्चेत् पुनः शत्रुर्भवति मित्रं। एवमेव विमृश्य वदेत् शत्रुचिन्तां। स्त्रीपुरुषसमागमं चापि - यदि विवाहप्रश्ने मित्रराशिगतः पुरुषग्रहः स्त्रीराशिस्थितश्चेत् स्त्रीनिमित्ताः सम्पदो भवन्ति। तयोः स्नेहश्चास्ति। सुहृदि पुरुषराशौ स्त्रीग्रहः स्थितश्चेद् पुरुषनिमित्ताः सम्पदः। अथोदितं पुरुषराशिं पुरुषग्रहं वा मित्रगतः स्त्रीग्रहः पश्यति चेत् सम्पदं वदेत्। पुरुषे स्त्री स्नेहिता। विपरीते पुरुषः स्नेहितः। शत्रुग्रहेण वा पापग्रहेण वा युक्तो वीक्षितश्चेत् तयोः शत्रुभावं च रोगं च वदेत्। तयोः स्त्रीपुरुषयोरधिकं च पुत्रलाभं च ब्रूयात्। एवं लग्नसप्तमाभ्यां स्त्रीपुरुषविकल्पकैर्ग्रहराशिद्रेक्काणांशकैः संभावितैरेव तयोः शुभाशुभं वदेत्। एतल्लक्षणमन्यस्मिन् विवाहे(अ)पि वदेत्। तत्राधिपतिदृष्टे युते स्त्रीग्रहोदये पुरुषेण आहता स्त्री। विपरीते विपरीतमिति। प्रश्ने उदयगतग्रहवशात् तद्ग्रहस्योक्तं भावं प्रष्टुः पूर्व्वं वदेत्। पश्चाच्चिन्तितप्रश्नफलं चाप्रमत्तो वक्ता ब्रूयात्।।

हृदयं गृहं च हिबुके मध्याह्नेस्थानमानकोशाज्ञाः
आत्मार्त्थजीवितान्यपि लग्ने श्रेयश्च चिन्तायां।। १२

हृदयस्य शुभाशुभत्वं च गृह विशेषं च मित्राणि च तोयं च स्वप्नं च चतुर्त्थराशिना वदेत्। चतुर्त्थराशिं यः पश्यति तद्वशाद्वा चतुर्त्थः पापराशिश्चेद्वा पापग्रहयुतवीक्षितो वा स प्रष्टा पापबुद्धिः। सो(अ)पि स्थलराशिर्वा शुष्कग्रहयुतवीक्षिता वा घर्म्मकाले तोयं नास्तीति वदेत्। गृहस्यासुखवत्वं च मित्रत्वं च वदेत्। शुभग्रहैः सर्व्वेषां शुभं प्रवृद्धिं च वदेत्। मध्याह्ने उदयरशमेन शुभाशुभग्रहांशक तद्द्रष्टृग्रहवशाच्च राशिभिः प्रवृत्त्यर्थं देशं चाभिमानं प्रवृद्धिं मानं च निधिस्थितस्थानं च भण्डारस्थं द्रव्यं च आज्ञाशब्दं च उच्चनीचबन्धु शत्रुगतैर्ग्रहैरज्ञातस्य प्रष्टुर्वदेत्। दशमराशिबलाभावे अंशकेनेत्यर्थः। लग्नेन वदेत्। तद्यथा शरीरस्य सुखं च रोगं चार्त्थानर्त्थार्ज्जितत्वं च आजीवनान्तमाहारप्रवृत्तिं च उदयेन वदेदित्यर्थः।।

हृतपतिनष्टजायाप्रवासपरिदेवनानि जामित्रे
मृतरोगगता चिन्ता कथा प्रवादश्च विज्ञेयाः।। १३

बलाद्धृतं द्रव्यं च नष्टद्रव्यं च स्त्रीयो वा पुरुषस्य वा पतितत्वं च भार्यायाः सम्पदसम्पदच्च प्रवासदेशं च दुःखालापं चिरोधं च सप्तमभवनेन शुभाशुभग्रहराशिवशाद्वदेत्। कथिताः रोगचिन्ता मृतचिन्ता प्रवादकृताः शब्दाः सप्तमेन वदेत्। यात्राकाले कथिताः कथाश्च दृष्टान् प्राणिनश्च पथि प्रतिरोधकान् द्विपदादींश्च लग्नाद्वा आरूढाद्वा सप्तमग्रहराशिवशात् सर्व्वं वदेत्। एवमुदयचतुष्टयगतैर्ग्रहवशाद् उक्तानि सर्व्वाणि वदेत्। ये(अ)नुक्ता भावास्तेषां पूर्व्वोक्तानि लक्षणानि द्वितीयादिषु राशिषु ज्ञेयानि। पूर्व्वलब्धं द्रव्यं च कुटुंबं च वाङ्माधुर्यं च भविष्यच्च सर्व्वं द्वितीयेन भावेन वदेत्। तृतीयेन भ्रातृणां च प्रष्टुः पराक्रमं च लाभालाभं च प्रवासेन सह गतांश्च अनुचरांश्च ब्रूयात्। पञ्चमेन पुत्रांश्च प्रष्टुर्मनसि स्थितं यत्तदपि उदरे शुभं च रोगं च क्षुल्पिपासाञ्च पञ्चमराशिना वा ग्रहवशाद्वा वदेत्। अष्टमेनान्नपानादि आयुश्च छिद्रं च ब्रूयात्। नवमेन धर्म्मं चाधर्म्मं च अदृष्टफलं च पितृशुभाशुभं च। एकादशेन यल्लभ्यते तदपि सुखं च। द्वादशेन व्ययं च व्यपगमं च द्रव्यहानिं च ब्रूयात्।।

षोडशाध्यायः

शुक्रो मधुरिनग्द्धश्चन्द्रः शीतो(अ)ग्गिरोबुधौ रूक्षौ
लवणकषायस्सूर्यः शनिरम्लकटुः कुजस्तिक्तः।। १

शुक्रस्य मधुरिनग्द्धरसः, चन्द्रस्य शीतमधुररसः, गुरुबुधयो रूक्षमधुररसः, सूर्यस्य रूक्षकषायौ रसौ, शनेश्चरस्याम्लकटुकौ रसौ, कुजस्य तिक्ताः।

मधुरस्तीक्ष्णसमेतस्तिक्तकषायाम्लकटुकलवणानि
गुरुसूर्यसौरबुधभृगुभौमेन्दूनां परे ब्रूवते।। २

गुरोर्मधुररसः, सूर्यस्य तीक्ष्णमिश्रितास्सर्व्वे, मन्दस्य तिक्तः, बुधस्य कषायरसः, शुक्रस्याम्लः, भौमस्य कटुकः, चन्द्रस्य लवणः। एतान् षड्रसान् केचिद् ब्रूवते।।

सौम्यग्रहस्य लग्ने सौम्यर्क्षे वा(अ)शितं भवति मृष्टं
ओजेषु रूक्षमन्नं द्रवं तु युग्मे जलचरे वा।। ३

सौम्यग्रहस्योदये सौम्यराश्युदये वा मृष्टं भुक्तमिति वदेत्। पापग्रहोदये ओजराश्युदये रूक्षं स्नेहरहितं भुक्तं स्वल्पमिति। युग्मराश्युदये जलराश्युदये वा द्रवमन्नं भुक्तं, बहुभुक्तमिति वदेत्।।

भुक्तं सुशुष्कमुष्णं रविकुजयोरजलराशिसंयोगे
सजल व्यञ्जनबहुळं तदेव शीतं यमासुरयोः।। २

रविकुजयोः स्थलराशिगतयोः लग्नसप्तमगतयोः सुशुष्कमुष्णमिति वदेत् भुक्तं। जलराशिगतयोः शनिराह्वोः व्यञ्जनमेव भक्षितमिति वदेत्। तदेव शीतं भवति। स्थलराशिगतयोरुष्णशुष्कं भवति। असुरो राहुः।।

सद्रवमनुष्णमुशनश्शशिनोरुदकात्मकानि सम्पाते
युक्तव्यञ्जनमजले गुरुबुधयोराश्रयेण स्यात्।। ५

द्रव्ययुतमनुष्णं भुक्तं शुक्रस्य। शश्युदये ईक्षिते वा उदकात्मकानि भुक्तानि। अजले स्थितस्य युक्तव्यञ्जनं। गुरुबुधयोः जलस्थलराशिवशाद् भुक्तं वदेत्।।

मृगपिशितमर्क्ककुजयोरिन्दोः कौळीरमात्स्यममरगुरोः
द्वैपाश्चमर्क्कसूनोर्माहिषवाराहमादेश्यं।। ६

भोजनविषये मांसविशेषः कथ्यते - अर्क्ककुजयोर्लग्नसप्तमगतयोः मृगमांसं। चन्द्रस्य कौळीरं वा मात्स्यं वा वदेत्, चन्द्रस्थितद्रेक्काणवशात्। जीवस्य द्वैपाश्यं पिशितं। शनेर्माहिषं वाराहं वा राशिद्रेक्काणवशाद्वदेत्। यो ग्रहो मांसविषयः स यस्मिन् द्रेक्काणे स्थितः तस्य द्रेक्काणस्याकृतिं वा हस्तगतं फलमामिषं वा सर्व्वं वदेत्।।

पाक्षिणमुडुपतिसूनोरमाहिषगव्ये भृगोस्समुद्दिष्टे
शाकं स्वयोनिमूलं स्वस्वामीयं वदेद् राशौ।। ७

बुधस्य पक्षिमांसं। शुक्रस्य माहिषं गव्यं वा वदेत्। उपदंशं शाकं वा मूलफलं वा यद्यदुक्तं ग्रहस्य मूलचिन्तायां तद्वदेत्। ग्रहस्योक्तं भावं स्वराशौ वदेत्।।

जलजं जलात्मकेन ग्राम्यं ग्राम्यैररण्यमारण्यैः
पापैर्विलेपकं हि स्वधान्यजं भुक्तमथ सौम्यैः।। ८

जलराशिना वा जलग्रहेण वा भुक्तमन्नं व्यञ्जनं जलसंभवमिति वदेत्। स्थलग्रहराशिभिः स्थलसंभवं। ग्राम्यग्रहराशिभिर्ग्राम्यं। आरण्यैरारण्यं। पापग्रहराशिभिर्निस्सारं भुक्तं लेपकरहितं भवति। अन्नरहितं भक्ष्यमेव वा। सौम्यग्रहैः स्वोक्तधान्यजमन्नं भुक्तमिति वदेत्। पूर्व्वं मूलचिन्तायां यदुक्तं तद्धान्यमिह विमृश्य वदेत्।।

उदकयवागूश्शशिनो बुधेन संभावसंस्कृता सैव
घृतमिन्द्रगुरोस्तैलं शेषाश्शुक्रस्य नवनीतं।। ९

पुनरपि भोजनविशेषाः कथ्यते - सप्तमगतेन ग्रहेण सेकं वदेत्। केवलजलयवागूं चन्द्रस्य। कटुकादि संभारसंस्कृतयवागूं बुधस्य। गुरोर्घृतं गुळं च वदेत्। शुक्रस्य नवनीतं। शेषाणां रविकुजशनीनां तैलं वदेत्।।

आजं पयो(अ)जकुजयोर्माहिषमार्क्केर्गवां वृषोशनसोः
अन्येष्वाश्रयतुल्यं भवनेषु चतुष्पदेषूह्यं।। १०

अनेनापि सेकविशेषः - सप्तमगतेनैव वदेत्। मेषे सप्तमगे कुजे वा आजं पयः सेकः। शनेश्चरदर्शने माहिषं पयः। वृषोदये शुक्रदर्शने वा गव्यं। शेषाणां ग्रहाणां आश्रित चतुष्पात् पयः सेकः। तदूह्यं वक्तव्यं। उदयकेन्द्रेषु चतुष्पात्संबन्धो न चेत् तदा चतुष्पात्सेको न वक्तव्यः।।

मांसव्यञ्जनमारे(अ)स्तमये सौम्यस्य पानकं हरितं
व्यञ्जनबहुत्वमुशनास्चित्रं कुरुते बुधो(अ)प्यत्र।। ११

कुजे सप्तमगे मांसं सेकद्रव्यं। बुधे सप्तमस्ते हरितालवर्ण्णयवाग्वादि सेकद्रव्यं। अनेकवर्ण्णमनेकं सेकद्रव्यं यूषादि शुक्रस्य। बुधस्य सुरादि वा वक्तव्यं।।

सौरे परान्नमम्लं व्यञ्जनमथ मृतदर्शनं वापि
कुरुते सकाष्ठशाकं भार्यालाभं च दिवसकरः।। १२

सौरे सप्तमस्थे परान्नं भुक्तमिति वदेत्। पुराणमन्नं वा आम्लसेकद्रव्ययुक्तं भुक्तमिति वदेत्। पथि शवदर्शनं मृतकवार्त्तां वा मृतकथां वा प्रष्टुर्वदेत्। सरीसृपमांसं च वदेत्। सूर्ये सप्तमस्थे काष्ठशाकादिबहुळं भुक्तमिति वदेत्। स्त्रीलाभं च जातमिति वदेत्।।

क्रूरा अनन्ति पिशितं तृणमुशना द्वयमपीन्दुजो भुङ्क्ते
तृणधान्यं गुरुरिन्दुः कृमिमत्स्यौ जातिवद्राशिः।। १३

भोजनविधौ मांसव्यञ्जनके निश्चिते कस्य मृगस्य मांसमिति पृच्छति चेत् क्रूरदर्शने मांसादानां शार्दूलादीनां मांसमिति वदेत्। शुक्रदर्शने तृणादानां मांसमिति वदेत्। बुधदर्शने द्वयं। सौम्यराशिस्थितस्य शुक्रवत्। क्रूरराशिगतस्य क्रूरवत्। गुरु सप्तमस्थे तृणधान्यादानां मांसं। चन्द्रे सप्तमस्थे कृमिमात्स्यादानां। सप्तमे ग्रहरहिते सप्तमराशिवशाद्वदेत्। राशिजातिमांसं वा तदशितस्य मांसं वा विमृश्य वदेत्।।

सहभोक्तृभुक्तिवेळाजात्याकृतयो व्यवस्थेयाः
पूर्व्वोक्तभोजनानि च वक्तव्यानि ग्रहैस्सततं।। १४

उदयमारूढं वा ये ग्रहा वीक्षन्ते तैः सर्व्वे व्यवस्थेयाः। पितृमातृसहज इत्यनेन सहभोक्तारो ज्ञेयाः। उक्तप्रकारेणान्नविशेषो ज्ञेयः। ग्रहगृहयोर्दिशमर्क्कः अनेनाहनि

रात्रौ वा भुक्तिकालो विज्ञेयः। विप्रौ भृगुदेवगुरू अनेन भोजयितारश्च विज्ञेयाः। उदयराशिवशादाकृतिं च वदेत्। पूर्व्वोक्तभोजनविशेषान् ग्रहैरेव वदेत्। चकारेण चैभ्यो विज्ञाय वदेत् सततं। उदयेनारूढेन वा भोक्तुः शरीराकृतिं च शुद्धिं च वदेत्। ग्राम्यराश्युदये ग्राम्यग्रहोदये वा ग्रामे भुक्तिरिति। तथा नागरग्रहान्नगरे, आरण्येराण्यं, जलेन जलं, भूमिं तथा स्थलेन। उदयद्रेक्काणराशिस्वभावं चाकारं च वदेत्। उदये स्थिरे एकभुक्तिं वदेत्। चरेण बहुभुक्ति। उभयेन द्विभुक्तिमिति। एवं निरूप्य वदेत्। द्वितीयेनामत्रविशेषं वदेत्। चरे वृक्षपत्रं। जलस्थलराशिग्रहवशाद् वृक्षप्रदेशो ज्ञेयः। स्थरे च चषकादि वदेत्। तत्र ग्रहैः स्थानावकाशं पत्रविशेषं वदेत्। तृतीयेन राशिना ग्रहेण वा पूर्व्वोक्तफलंमूलं भक्ष्यं वदेत्। चतुर्थेन भोजयितृजातिं वदेत्। पञ्चमराशिग्रहेण तद्भीक्षणाद्वा भोक्तुश्चिन्तितं वदेत्। भोजनकाले मानुषद्विपदपक्षिसरीसृपचिन्तां वा यद्यच्चिन्तासूक्तं तल् सर्व्वं विमृश्य वदेत्। षष्ठराशिस्थितग्रहवीक्षितैः सस्यमुपदंशं वदेत्। षड्रसश्चिन्तनीयः। सप्तमे घृतगळसूपादिसेवनं स्त्रीसंगतिश्च विज्ञेयं। अष्टमेन अन्नविशेषं च वदेत्। नवमवीक्षणग्रहैर्वा रश्मिसंख्यैः ये ग्रहाः पश्यन्ति तैर्वा सहभोक्तृन् वदेत्। दशमेन भक्तुर्भुक्तिपूर्त्तिमपूर्त्तिं वा वदेत्। कथमिति चेत् ऊर्ध्वतिर्यगधोमुखिषु अग्रमध्यस्वल्पपूर्त्तिं क्रमेण वदेत्। एकादशेन मेषनृपसेनापति इत्यादिं तथा वदेत्। द्वादशेन शयनस्य शुभाशुभत्वं वदेत्। जलस्थलराशिवशात् जलस्थलप्रदेशं च शुभाशुभवशात् स्वप्नं जागरणं च सर्व्वं निरूप्य वदेत्।।

सप्तदशाध्यायः

भयमक्कों लग्नगतस्सौरो व्याधिं धारासुतो घातं
मरणं वैकल्यं वा चन्द्रः कुरुते विलग्नस्थः।। १

पुनरपि प्रष्टुः प्रश्नफलप्रत्ययार्थं भोजनमैथुननष्टादिषु एतानि फलानि वदेत् - उदये(अ)प्यारूढे वा रविः स्थितश्चेत् भयचिन्तां करोति। सौरो रोगं करोति। कुजो युद्धं ताडनं वा। चन्द्रो(अ)पि मरणं वैकल्यं वा। बलाबलवशाद्वदेत्।।

वस्त्रार्थयुतविलाभं बृहस्पतिश्चन्द्रजस्तु राशिफलं
अन्यस्त्रीसंगमनं वस्त्रोल्पत्तिं भृगुः कुरुते।। २

गुरुः प्रथमद्रेक्काणोदये वस्त्रलाभं करोति। द्वितीयद्रेक्काणोदये(अ)र्थलाभं। तृतीयद्रेक्काणे स्त्रीलाभं। मेषे नृपसेनापतिं वा। बुधो राशिफलं ददाति। शुक्रः उदये प्रथमहोरायामन्यस्त्रीसंगमनं, द्वितीयहोरायां वस्त्रलाबं करोति। मेषांशे(अ)जावीति यदुक्तं तद्राशिफलं।।

मेषूरणे दिनेशः कुरुते स्थानार्थरोगभयचिन्तां
चन्द्रो(अ)र्थागमचिन्तामिष्टश्रवणाश्रयां कथां चैव।। ३

दशमगो दिवसकरः प्रथमद्रेक्काणोदये स्थानचिन्तां, मध्यद्रेक्काणे(अ)र्थचिन्तां, तृतीयद्रेक्काणे रोगभयचिन्तां करोति। दशमगतश्चन्द्रो लग्ने प्रथमहोरायामर्थागमचिन्तां, द्वितीयहोरायां स्वजनबन्धुजनवार्त्तामिष्टकथां चैव करोति।।

स्थानार्थज्ञानगतां करोति चिन्तां बृहस्पतिर्मध्ये
अरिवृद्धिमर्थनाशं स्थानाल्परिवर्त्तनं भौमः।। ४

दशमगतो गुरुरुदयद्रेक्काणक्रमात् स्थानचिन्तामर्थचिन्तां ज्ञानचिन्तां करोति। तथा कुजश्च शत्रुवृद्धिमर्थनाशं स्थानाल्परिवर्त्तनं च करोति।।

स्थानभ्रंशं व्याधिं प्रवासचिन्तां शनैश्चरः कुरुते
वस्त्रार्थागमचिन्तां करोति शुक्रस्तु मध्यगो नभसः।। ५

शनिर्दशमगतः प्रथमद्रेक्काणोदये स्थानभ्रंशं करोति। द्वितीयद्रेक्काणे व्याधिं करोति। तृतीये प्रवासचिन्तां करोति। दशमे शुक्रः उदयराशिद्रेक्काणक्रमात् वस्त्रचिन्तामर्थागमचिन्तां च शय्यासनचिन्तामाज्ञाचिन्तामपि करोति।।

मरणं प्रवासनं वा जामित्रे(अ)र्क्को विनष्टचिन्तां वा
स्त्रीगर्भार्थाश्रयजां करोति चिन्तां गुरुश्चात्र।। ६

जामित्रे रवियुते द्रेक्काणक्रमेण मरणचिन्तां नष्टचिन्तां वदेत्। गुरुः सप्तमगतश्चेत् चन्द्रहोरायां स्त्रीगर्भाश्रयचिन्तां करोति।।

स्वस्त्रीशीलभ्रंशं हृतं च मेढ्राश्रयं तथा रोगं
कुरुते कुजे(अ)स्तमयगे भ्रष्टाचारां भृगुर्नारीं।। ७

प्रष्टुः स्वस्त्री। कुजे(अ)स्तमयगे उदयवशात् स्वस्त्रीदुश्शीलं च अपहृतं च मेढ्राश्रयं रोगं वदेत्। स्त्रीयो वा गुह्याश्रयं वदेत्। शुक्रे(अ)स्तमयगे प्रष्टुः स्त्री भ्रष्टाचारा भवति अचारित्रा।।

वृद्धां शीलभ्रष्टां सरोगविकलां शनैस्चरे(अ)स्तमये
कुर्यात् स्त्रीकलहं वा चन्द्रः कांस्यं कुलांगनानाशं।। ८

अस्तमये शनैश्चरे स्थिते प्रष्टुरेव स्वस्त्रीयं वृद्धां दुश्शीलां रोगविकलां च उदयद्रेक्काणवशाद्वदेत्। स्त्री मरणं वा वदेत्। चन्द्रः सप्तमे द्रेक्काणक्रमात् स्त्री कलहं च कांस्यचिन्तां च स्त्रीनाशं च करोति।।

हृच्छूलमंगदाहं रुधिरस्रावं नृपाद्भयं हिबुके
सूर्यः करोति भृगुजः स्त्रीजां गुरुरर्थजां चिन्तां।। ९

रवौ चतुर्थे लग्नं चतुर्थां कृत्वा चतुर्भागक्रमेण हृच्छूलमंगदाहं रुधिरस्रावं नृपात्भयं हिबुके सूर्यः करोति। भृगौ चतुर्थे स्त्रीचिन्तां। गुरुरर्थागमचिन्तां करोति।।

हिबुके(अ)वनिजः कुरुते स्वजनविरोधं च मानसं दुःखं

त्रासभयमर्क्ककसूनुर्निर्याणं वा वदेद्धिबुके।। १०

कुजे चतुर्त्थप्रथमहोरायां स्वजनविरोधं। द्वितीयहोरायां मानसं दुःखं। शनैश्चरे चतुर्त्थे प्रथमहोरायां महत्भयं। द्वितीयहोरायां मरणं च चिन्तयति।।

नारीं शशिनि सुरूपां करोति हिबुके बुधस्तु वादकरः
फलमेतदेव वाच्यं त्रिकोणसंस्थग्रहैर्विधिवत्।। ११

चन्द्रे चतुर्त्थे सुरूपनारीचिन्ता भवति। बुधश्चतुर्त्थे विवादं चिन्तयति। अत्र पूर्व्ववत् क्रमेण लग्नचतुर्त्थसप्तमदशमेषु इति ग्रहवशात् बलाबलं निरूप्य बलवद्ग्रहवशात् फलचिन्ता वक्तव्या। केन्द्रेषु ग्रहाभावे पञ्चमस्थितैश्चतुर्त्थवद्वदेत्। तदभावे नवमस्थितैः सप्तमवद्वदेत्। केन्द्रत्रिकोणेषु ग्रहाभावे कण्टके बलवद्राशिवशात् स्वामिचिन्ता वक्तव्या।।

अष्टादशाध्यायः

क्रूरेषु पतिं त्यजति प्रमदा नन्दयति पतिमपापेषु
चन्द्रे पापसमेते पुरुषो भुङ्क्ते बलाद्रवौ नारीं।। १

क्रूरेष्विति। अथ मैथुनप्रश्न आरभ्यते। तत्र यदि कश्चिद् भार्यामात्मनि रक्तां विरक्तां वा ज्ञातुमिच्छति चेत्तदा उदयलग्नवशाद्वक्तव्यं। पापग्रहदृष्टे लग्ने विरक्ता। सौम्यग्रहदृष्टे लग्ने सुरक्ता। चन्द्रेण पापयुतदृष्टे लग्ने विरक्ता। शुभदृष्टेन शुभयुतेन वा दृष्टे लग्ने(अ)नुरक्ता। चन्द्रेण रवियुतेन रविदृष्टेन वा दृष्टे(अ)प्यनुरक्ता भवति। चन्द्रवच्छुक्रो(अ)पि वक्तव्यः। अर्थान्तरेण च रवौ पापयुते पुरुषः स्त्रिया भुक्तो भवति। एवं चन्द्रशुक्रवीक्षितरहिते(अ)स्ते पापयुते मैथुनं न वक्तव्यं। अन्यथा वक्तव्यं। रविवर्ग्गे चन्द्रे स्थिते रविदृष्टयुते वा पुरुषः सुभगः। सौम्यदृष्टयुते वा चन्द्रे स्त्री सुभगा। एवं तयोः स्नेहं च सौभाग्यं च वदेत्।।

स्वदिशं ग्रहे प्रयाते स्वस्थे चात्मीययान्ययान्येषु
उच्चारिमित्रनीचाश्रयेण तेषां स्त्रियो वाच्याः।। २

स्वस्त्री वा परस्त्री वा तदपि वक्तव्यं। यो गृहो लग्नं पश्यति स्ववर्ग्गे स्थित्वा चेत् स्वकीये गृहे स्वकीया स्त्री, परवर्ग्गस्ते परस्त्री। उच्चे स्थित्वा वीक्षते चेत् पूज्या राजस्त्री वा भवति। शत्रुवर्ग्गस्थे शत्रोः स्त्री, मित्रवर्ग्गस्थे बन्धुस्त्री, नीचस्थे नीचस्त्री भवति। तेन ग्रहेण विप्रादिवर्ण्णान् योजयेत्। ग्रहस्थितिद्रेक्काणाकृतिं स्वभावं प्रवृत्तिं च स्त्रीणां वदेत्। अटवीक्षेत्रादिसमागमभूमिमुदयेन वदेत्। विवाहप्रश्ने(अ)प्येवमेव वदेत्, तत्रोदयवशात् स्त्रियः शुभाशुभं वदेत्। आरूढवशात् पुरुषस्य।।

मेषाष्टमयोर्मेषोपगते स्वस्त्रीभिरेव संगमं
मैत्र्या बुधभृगुभवने शत्रोर्वध्वा ततो(अ)न्येषु।। ३

छत्रेणापि स्त्री निर्ण्णयः कथ्यते - मेषे आरूढे वृश्चिके छत्रे वा वृश्चिके आरूढे मेषे छत्रे वा तयोरप्येकस्मिन्नारूढे छत्रराशौ कुजे स्थिते स्वकीये गृहे स्वस्त्रीभिः संगमनं वदेत्। मेषे वृश्चिके वा आरूढे मिथुनवृषतुलाकन्यासु एकः छत्रगतश्चेत् छत्रराशौ बुधशुक्रदृष्टे वा बन्धुस्त्री। मेषाष्टमयोरन्येषु राशिषु छत्रगतेषु शत्रोर्भार्यायाः संगमनं वदेत्। एवमेव निरूप्य वदेत्। एवमन्येषु राशिषु वदेत्। उच्चगते पूज्या स्त्री, नीचगते नीचा तरुणी।।

वेश्या कर्षकभार्या मन्त्रिस्त्री ब्राह्मणी नृपोपेता
कुजभृगुगुरुशशिरविभिश्शेषैः पाषण्डिनां युवतिः।। ४

परवर्ग्गस्थे ग्रहे परकीये परस्त्रीविशेषः कथ्यते - कुजदृष्टे वेश्या, शुक्रदृष्टे शूद्रस्त्री, गुरुदृष्टे मन्त्रिणी, चन्द्रदृष्टे ब्राह्मणी, आदित्यदृष्टे नृपस्त्री। शेषैः बुधशनिराहुभिः पाषण्डी स्त्री वक्तव्या।।

विषमेषु ग्रहराशिषु मैथुनमेकं द्विवारमितरत्र
बहुशो विभ्रमबहुळं भृगुकुजवर्ग्गात्मके सुरतं।। ५

अनेन सुरतप्रकार उच्यते - ओजराश्युदये ओजराशिस्थितग्रहदृष्टे एकमेव मैथुनं। युग्मराश्युदये युग्मराशिस्थितग्रहदृष्टे द्विवारं मैथुनं वदेत्। तत्र वात्स्यायनोक्तप्रकारं मिश्ररविवर्ग्गे(अ)हनि चन्द्रवर्ग्गे मिश्रे रात्रौ।।

होरा त्रिकोणजामित्रभेषु शशिना सहार्क्कपुत्रश्चेत्
स्वप्नेषु सुरतमाप्तं कुजश्चेल्कोपेन जागरितं।। ६

लग्नत्रिकोणसप्तमेषु शशिना सहार्क्कपुत्रः स्थितश्चेद्रात्रौ स्वप्ने मैथुनं वदेत्। चन्द्रसहितः कुजः स्थितश्चेत् कलहात्तयोर्जागरं वदेत्। ऋतुमद्द्रेक्काणवशाद्रजस्वला परस्त्री। तेषु रविः स चन्द्रः स्थितश्चेत् स्त्रीगुह्यस्पर्शनादि मैतुनरहितं वदेत्। सचन्द्रो जीवः स्थितश्चेलसविलासहासयुक्तं मैथुनं। तत्र गर्भोत्पत्तिः। अथवा गर्भस्त्रीमैथुनं वदेत्। बुधश्चेत् परस्त्री मैथुनमेव। शुक्रयुते चन्द्रे तेषु बहुस्त्रीसङ्कथनं वदेत्।।

लग्नगते रवितनये जामित्रे भूमिनन्दने सभयं
इतरेतरालयस्थौ यदि सौरारौ च जागरितं।। ७

लग्ने मन्दयुते सप्तमे कुजे अथवा व्यत्ययाद्वा चोरभयाद्वा अग्निभयाद्वा तयोर्बलयुतेन जागरं वदेत्। सर्व्वत्र गतावितरेतरराशिगतौ यदि जागरितं पूर्व्ववत्।।

अरिंमश्चन्द्रे(अ)न्यतरेण युते नार्या सहात्र कलहः स्यात्
यमकुजराशिषु भृगुजो यदि परशय्यास्त्रियो वाच्याः।।

अरिमन् लग्नसप्तमे यमकुजयोरन्यतरेण युतश्चन्द्रः स्थितश्चेन्नार्या सह कलहं वदेत्। लग्ने स्थितश्चेत् पुरुषविषयात्, सप्तमे स्त्रीविषयात्। अरिंमस्तयोरेकेन युतः शुक्रश्चेत् तयोः कलहात् परशय्यास्वप्नं वदेत्। राशिग्रहणं ग्रहवत् तस्य

क्षेत्रमित्यर्थः।।

जामित्रगते चन्द्रे कुजे तु दशमे(अ)थवा तृतीयेस्मिन्
शुक्रे भूमौ शयनं कलहनिमित्तेन संवृत्तं।। ९

जामित्रगते चन्द्रे दशमे तृतीये वा कुजे स्थिते स्त्रिया कलहेन भूमौ शयनं संवृत्तमिति वदेत्। शुक्रे सप्तमगे पूर्व्ववत्। कुजे स्थिते परस्त्रिया कलहेन भूमौ शयनमिति वदेत्।।

होरातृतीयसप्तमचतुर्त्थभवनेषु चन्द्रशुक्रौ चेत्
विद्यात् वस्त्रच्छेदं कलहनिमित्तेन नारीणां।। १०

उक्तस्थानेषु चन्द्रशुक्रौ एकत्र स्थितौ चेत् कलहेन वस्त्रच्छेदो वक्तव्यः। तत्र सप्तमे पुरुषग्रहे स्त्रीवस्त्रच्छेदः। विपरीते विपरीतं।।

एकोनविंशत्यध्यायः

ज्योतिषिको वनवासी व्यन्तरसुरसत्तमा विनिर्द्दिष्टाः
एते चतुष्प्रकारा ग्रहावलोकने जायन्ते।। १

एते देवजातयो ग्रहावलोकने जायन्ते। प्रष्टुश्चेष्टाकारकम्पनादिभिर्बाधां ज्ञात्वा ग्रहवशाद्राशिवशाद्वा जातिभेदं वदेत्। चतुष्प्रकारा देवताः। प्रथमो ज्योतिषिको गणः। सूर्यचन्द्रवत् ज्योतिर्म्मयाः प्रत्यक्षरूपिणः। द्वितीयो वनवासी गणः असुरभुजंगा पाताळवासिनश्च। तृतीयो व्यन्तरगणः असुरभुजगाः पाताळवासिनश्च। चतुर्त्थो देवगणः स्वर्ग्गवासिनः। सर्व्वे ग्रहराशिवशाद्ज्ञेयाः। कथमिति चेत् प्रथमगणस्यार्क्ककुजौ चतुष्पाद्राशयश्च। द्वितीयगणस्य चन्द्रशुक्रौ जलराशयश्च। तृतीयगणस्य शनिराहू सरीसृपराशिश्च। चतुर्त्थगणस्य गुरुबुधौ द्विपाद्राशयश्च। प्रश्नकाले विमृश्यमेवं वदेत्। एषां गत्यनूकचिन्तायामप्युपयोगः।।

राक्षसपिशाचयक्षास्तथैव किन्नरसभूतनागगणाः
भौमयमशुक्रबुधगुरुचन्द्रेष्विन्द्रो रवौ देवाः।। २

पूर्व्वोक्तगणस्य विशेषः कथ्यते - कुजस्य राक्षसाः, शने पिशाचाः, शुक्रस्य यक्षाः, बुधस्य किन्नराः, गुरोर्भूतगणाः, रवेरिन्द्रः। एते देवता ग्रहावलोकनाद् विज्ञेया बलयुतेन।।

श्रीरुद्रविष्णुदुर्ग्गाब्रह्मकुमाराश्च लोकपालयुताः
शुक्रार्क्कसौम्यशीतगुगुरुकुजसौरेषु जानीयात्।। ३

शुक्रस्य श्रीः, सूर्यस्य महादेवः, बुधस्य विष्णुः, चन्द्रस्य दुर्ग्गा, गुरोर्ब्रह्मा, कुजस्य सुब्रह्मण्यः, सौरस्य लोकपालाः। एते ग्रहदेवताः। तेषां स्थानवासिनो वा पूर्व्वोक्तदेवता

भवन्ति। तेष्वेव चोरस्य निवासः। स्वकेन्द्रगतेषु प्रष्टुः कुलदेवता। उच्चगते श्रीरुद्र इत्यादिर्ग्राह्यः। अन्यत्र बन्धुशत्रुगते राक्षसपिशाच इत्यादि। मित्रक्षेत्रगते मित्रवदाचरति। शत्रुगते रोगाय भवति देवता। क्रूरेषु लग्नसप्तमाष्टमगतेषु देवताभिर्महापीडां वदेत्। ग्रहे लग्नगते प्रतिबिम्बं देयं, सप्तमगे नृत्तं देयं, अष्टमगे बलिर्देयः, चतुर्त्थगते गृहारामो देयः।।

ग्रहराशिभिर्विचार्य ज्योतिषिकाः पृच्छते फलं ब्रूयुः
यमसदृशफलो राहुः स्वामिफला राशयस्सर्व्वे।। ४

ग्रहराशिभिर्विमृश्य ज्योतिषिकाः प्रष्टुः फलं ब्रूयुः। यत्र राहोः फलं नोक्तं तत्र शनैश्चरफलमेव वक्तव्यं। ग्रहरहितराशीनामपि ग्रहवत् फलं वक्तव्यमिति सार्व्वत्रिको(अ)यं विधिः।।

मनुजग्रहभवनेषु हि वस्त्राभरणादि सन्ति देवानां
न भवन्ति शेषराशिग्रहेषु वर्ण्णान् ग्रहैर्ब्रूयात्।। ५

मनुष्यग्रहराशिषूदितदृष्टेषु देवानां वस्त्राभराणशस्त्राणि सन्तीति वदेत्। ग्रहस्थितद्रेक्काणं वा उदितद्रेक्काणं वा विमृश्य वस्त्रादीन् वदेत्। शेषराशिग्रहेषु स्वं स्वं वदेत्। उच्चगतस्य देववद्वदेत्।।

विंशाध्यायः

मेषे नृपसेनापतिचोरस्थानानि पृच्छते ब्रूयात्
गन्धाच्छादनमाल्यचतुष्पदकर्षककथा वृषभे।। १

यस्य कस्यचिद्राशेर्मेषनवांशके उदिते फलमुच्यते - वृषांशे वृषाद्यंशेषु यानि सन्ति फलानि कीर्त्यन्ते - तत्तदंशकं तावद्भेदकं कृत्वा यथासंख्यं फलानि वाच्यानि। मेषांशं त्रिधा कृत्वा यथासंख्यं फलानि वाच्यानि। मेषांशं त्रिधा कृत्वा राजा, सेनापतिः, चोरस्थानं। वृषांशे गन्धः, आच्छादनं, माला, चतुष्पात्, शूद्रः। वृषांशं पञ्चधा कृत्वा क्रमाद्वदेत्।।

गन्धर्व्वहास्यनर्त्तकमैथुननारीकथा भवेन्मिथुने
आरामोद्यानौषधशय्या राशौ चतुर्त्थे स्युः।। २

मिथुनांशोदये तमंशकं पञ्चधा कृत्वा प्रथमभागे गन्धर्व्वाः, द्वितीयभागे विदूषकाद्याः, तृतीयभागे नर्त्तकाः, चतुर्त्थे मैथुनं, पञ्चमे नारीकथाः। कर्क्कटांशं चतुर्द्धाकृत्वा आरामः, उद्यानं, औषधं, शयनं क्रमाद्वदेत्।।

सिंहे(अ)रण्यचतुष्पददुर्ग्गगुहालेख्यवस्त्रगन्धर्व्वाः
षष्ठे सप्तमराशौ मानतुलाभण्डमद्यानि।। ३

सिंहांशं चतुर्द्धा कृत्वा अरण्यं, चतुष्पदः, दुर्ग्गमप्रदेशः, गुहाप्रवेशं च। कन्यांशं त्रिधा कृत्वा क्रमात् लेख्यवस्त्रगन्धर्व्वा इति। तुलांशे क्रमात् मानं, तुलायष्टि, भाण्डं, मदकरवस्तूनि इति।।

कीटाग्निजीविगोम्यहिभोजनविषहास्तु वृश्चिके लग्ने
दैवज्ञविप्रगुरुमाल्यगन्धाश्वयोधस्त्रियो नवमे।। ४

वृश्चिकनवांशके षडेतानि वाच्यानि क्रमात्। प्रथमे कीटः, ततो(अ)ग्निजीविनः, गोमीति जळूकः, सर्प्पः भोजनं, विषहा। धनुरंशकं सप्तधा कृत्वा प्रथमे(अ)म्शे देवज्ञः, विप्रः, गुरुः, माल्यं, गन्धः, अश्वयोधाः, स्त्री। यथांशमवगन्तव्यं।।

मकरे मैथुनपाषण्डिवृषभक्ष्याणि वाद्यकथितानि
दीर्घनखदीर्घरोमपुरुषस्त्रीनरयुगं क्रमाज्ज्ञेयं।। ५

मकरांशं पञ्चधा कृत्वा मैथुनं, पाषण्डी, वृद्धः, भक्ष्याः, वाद्यं क्रमादवगन्तव्यं। कुंभांशं पञ्चधा कृत्वा दीर्घनखाः, दीर्घरोमाः, पुरुषः, स्त्री, नरयुग्मं क्रमात् ज्ञेयं।।

रमणीयरूपनारीसुहृदुल्पलमत्स्यपङ्कजानि झषे
कथिता लब्धा दृष्टाश्चैते राश्यंशकैर्ज्ञेयाः।। ६

मीनांशं पञ्चधा कृत्वा प्रथमांशे रमणीयरूपं नारी, सुहृत्, उल्पलं, मत्स्यं, पङ्कजं। एतेषां कथितवस्तूनां कथा वा लाभं वा दर्शनं वा भवतीति वदेत्। अंशकोदये राश्युदये वा वक्तव्यं तयोर्बलयुतेन। यस्मिन् कस्मिंश्चिद् राशौ प्रथमद्रेक्काणोदये कथां वदेत्। द्वितीय द्रेक्काणोदये लाभं वदेत्। तृतीयद्रेक्काणोदये दर्शनं वदेत्। सप्तमे ग्रहयुक्ते दर्शनं, द्वितीयतृतीययोः कथाश्रवणं वदेदिति केचिद्वदन्ति। एतानि लक्षणानि मुहूर्त्तेषु वदेद्विद्वानिति।।

एकविंशाध्यायः

दिवसकरस्य पुरस्ताच्चतुर्त्थराशीश्वरो भवति केतुः
राहुरपि पृष्ठतः किल चतुर्त्थ इष्टो(अ)र्क्कचारवशात्।। १

रविगतराशेः पुरस्ताच्चतुर्त्थराश्यधिपतिः केतुर्नाम भवति। पश्चाच्चतुर्त्थराशीश्वरो राहुर्भवति। रविचारवशात् ज्ञेयौ।।

चोरहृतार्थकलहव्याधिभयचतुष्पदो यथाक्रमशः
आरशनैश्चरगुरुभृग्विन्दुजशीतांशुसूर्याणां।। २

एकैकस्य ग्रहस्य एकैकचिन्ता कथ्यते - भौमस्य चोरचिन्ता, शनैश्चरस्य हृतद्रव्यं, गुरोरर्त्थः, शुक्रस्य कलहः, बुधस्य व्याधिः, चन्द्रस्य भयं, रवेश्चतुष्पात्। अयं श्लोको दिवसकरस्येत्यादेः पुरस्ताल्पतितः।।

यद्यर्क्कगते केतुर्लग्ने नृपमानलाभसम्पत्तिं
स्थानार्त्थपुत्रलाभं करोति केतुर्यदार्क्किगृहे।। ३

एवं केतुराहू ज्ञात्वा ताभ्यां फलमुच्यते - अर्क्कराशिगतः केतर्लग्ने स्याद् द्रेक्काणक्रमाद् नृपपूजां चार्त्थलाभं च सर्व्वसम्पत्तिं च वदेत्। आर्क्किराशौ केतुर्लग्नगतश्चेत् क्रमात् स्थानलाभं चार्त्थसिद्धिं च पुत्रलाभं च वदेत्।।

यमराशिफलं शौक्रे दायादफलं च युवतिनाशं च
सौरस्योक्तं भौमालये(अ)पि चायससंयुक्तं।। ४

शुक्रक्षेत्रगतस्य केतोर्यमराश्युक्तफलानि वदेत्। इदमपि वृषभवने दायादगृहलाभादि वदेत्। तुलालग्ने स्त्रीनाशं च वदेत्। सौरक्षेत्रगतस्य केतोः फलं कुजक्षेत्रगतस्यापि वदेत्। इदमप्यधिकं रोगं च ब्रूयात्।।

बौधे(अ)म्बरार्त्थनाशं चान्द्रे नृपभीतिपुत्रनासौ च
व्याधिं गृहस्य नाशं गुरुराशिगते भवति केतौ।। ५

बौधे मिथुनगतस्य केतोः अंबरनाशं वदेत्। कन्यागतस्यार्त्थनासं। चान्द्रे कर्क्कटगतस्य सूर्यहोरायां नृपभयं चन्द्रहोरायां पुत्रनाशं गुरुराशिगतक्रमवशाद् व्याधिं गृहनाशं च वदेत्।।

भृगुचन्द्रामरगुरवो यदि लग्नगताः स्युरत्र कालवशात्
कुर्व्वन्त्याज्ञां पूजां मित्रार्त्थं युवतिपुत्रसम्पत्तिं।। ६

अत्र केतुलग्ने केतुभवने वा सहस्थिताः शुक्रचन्द्रजीवाः आज्ञादिफलानि कुर्व्वन्ति। तत्राज्ञां पूजां करोति शुक्रः। मित्रार्त्थसिद्धिं युवतिलाभं च चन्द्रः। गुरुः पुत्रलाभं सम्पत्तिं च।।

यदि भवति केतुरिन्दूशनसोरेकेन संयुतो लग्ने
जनयति गर्भोल्पत्तिं सौररयुतो विनाशयति।। ७

गर्भप्रश्ने सदसद्भावं भवेत्। तत्र केतुः चन्द्रशुक्रयोरेकेन युतश्चेत् गर्भं जनयति। तौ ध्वजहस्तद्रेक्काणस्थौ एवमेव वदेत्। केतुः पापग्रहयुतश्चेत् गर्भनाशो भवति। एके चन्द्रशुक्रयोरेकेन युतो बुधश्चेत् गर्भं कुरुते पापयुतश्चेन्नाशयतीति वदन्ति।।

केतुः शशाङ्कयुक्तो भृग्वंगिरसोरथैकतरयुक्तः
कुरुते गर्भोल्पत्तिं जातमरोगं बलोपेतः।। ८

शशाङ्कयुक्तः केतुः भृग्वंगिरसोरेकेन युतश्चेत् गर्भोल्पत्तिं कुरुते। केतुवद् बुधश्चेद् गर्भस्थस्य वा जातस्य वा अरोगं सुखं ज्ञेयं।।

पुत्रस्य वातरोगं कुरुते रजनीसूनुनोपेतः
गृहमपि जितमंगनया प्रष्टुर्गमनं च निर्द्देश्यं।। ९

केतुर्बुधेन युक्तश्चेत् जातस्य पुत्रस्य वातरोगं वदेत्। गृहं वा भार्यया जितं। गमनं पृच्छति चेत्तद्भवतीति वदेत्।।

प्रमदाभोजनगर्भोल्पत्तिं शुक्रेण केतुरुदितश्चेत्
बन्धनमरणं कुरुते कनकविनाशं च भौमेन।। १०

केतुः शुक्रेण सहोदितश्चेत् प्रमदालाभं भोजनं गर्भलाभं च कुरुते। यदि केतुः भौमेन सहोदितश्चेत् बन्धनं मरणं कनकविनाशं वा करोति। अग्निभयं च करोति।।

सौरेण युतः केतुर्गृहदहनं वित्तसङ्निरोधं च
भौमेन वीक्षितो(अ)सौ परयोषिल्संगमं वदन्ति।। ११

केतुस्सौरेण सहोदितश्चेत् गृहदहनं चोरभयं च वित्तनाशं च वदेत्। केतुर्भौमवीक्षितश्चेल् परयोषिल्संगमं वदन्ति।।

भृगुराशावंशे वा केतुर्लग्ने रहस्यसङ्कथनं
यदि दृष्टो(अ)र्क्कसुतेन तु दास्या गुरुयोषितां चोक्तं।। १२

भृगुराशौ तदंशे वा स्थित केतुरुदितश्चेत् स्त्रीरहस्यसङ्कथनं मैथुनसङ्कथनप्रसंगं वदेत्। स केतुः शनैश्चरदृष्टश्चेत् दास्या वा गुरुयोषिता वा मन्दस्थितांशवशात् कथयेत्।।

स्त्रीरहितं जागरणं विवादममरगुरुशुक्रबुधदृष्टे
गुरुचन्द्रवीक्षणाभ्यां वदन्त्यलङ्कारलाभं च।। १३

पूर्व्वोक्तकेतौ क्रमेण गुरुशुक्रबुधदृष्टे स्त्रीरहितं स्वप्नं कलहाज्जागरणश्चोद्ग्राहं च वादं च गुरुशुक्रबुधानां क्रमात् त्रीण्यपि वदेत्। यदि केतुरेकराशिगतौ चन्द्रजीवौ वीक्षते तदा अलङ्कारादिलाभं चकारान्मैथुनं च भवति।।

चोरसमागमदूषणपत्नीद्रोहं विदेशगमनं च
यद्यत्र पापयुक्तो ददाति संपृच्छमानाय।। १४

केतुः पापयुक्तश्चेदेतानि ग्रहवशाद्वदेत् - चोरसमागमदूषणत्वं च पत्नीद्रोहं च विदेशगमनं च प्रष्टुः ब्रूयात्।।

द्विविंशाध्यायः

अथ भौमयुतं राहुक्षेत्रं होरागतं यदा भवति
अर्त्थवियोगं कुरुते(अ)न्येन च योजयत्याशु।। १

अथशब्दः पुनर्वृत्तिवचनः। कुजयुतं राहु भवनं लग्नगतं चेदर्त्थवियोगं कुरुते। द्रव्यसंभवं च नाशं च क्षिप्रं वदेत्।।

यदि सौरयुते लग्ने पूर्व्वोक्तफलेन गर्भनाशमपि
कथयति गुरुणा युक्तः पश्चाल्लाभं प्रवृद्धिकरं।। २

सौरयुते राहुक्षेत्रे लग्नगते पूर्व्वोक्तफलेन सह गर्भनाशं वदेत्। एवं सौरगुरुयुक्तश्चेत् पश्चाल्पुनः पुत्रलाभं। करोति प्रवृद्धिं च।।

कलहं कार्यविघातं पुरुषवियोगं तथोत्सुकत्वं च
देहविशेष वातं कुजबुधयुक्तः सदा कुरुते।। ३

देहविशेषः पूर्व्वोक्तः। तस्मिन् वातरोगं च सदा कुरुते द्वयोरेकयुक्त इति।।

त्रिषु वा सप्तसु मासेषूल्पादयतीन्दुरसृरसृजमंगेषु
उदितश्चेद् भौमगृहे तच्चेद्राहोर्गृहं भवति।। ४

भौमगृहे राहुगृहसंज्ञे चन्द्रमा उदितश्चेद् येन केन प्रकारेण प्रष्टुरंगाद्रुधिरस्रावं जनयति उल्पादयति चन्द्रः। तृतीये मासे सप्तमे वा। जन्मषष्ठाष्टमेषु वा युते चन्द्रे रुधिरस्रावो भवति।।

वातव्याधिं जनयति नार्याश्चन्द्रो(अ)त्र गुरुयुते लग्ने
फलमेतदेव वाच्यं नैशाकरिणोदयस्थेन।। ५

राहुक्षेत्रे लग्ने गुरुसहितश्चन्द्रोदयश्चेद् नार्या वातरोगं वदेत्। भविष्यति। अथ चन्द्रो राहुक्षेत्रे लग्ने बुधेन सह युतश्चेदंगनायाः वातरोगं एव वदेत्।।

चोरेक्षणार्त्थनाशौ विदेशगमनं च चित्तसम्मोहं
रविगतिवशेन राहुर्लग्ने भौमालये कुरुते।। ६

रविगत्या पूर्व्वोक्तराहुर्भौमालयस्थो - यदि तदोदयति तदा चोरदर्शनार्त्थनाशौ भवतः विदेशगमनं - च चित्तसम्मोहं च वदेत्।।

सौरेणार्त्थविनाशो विदेशगमनं च चित्तसम्मोहः
भृगुणा सहितो रोगं करोति हानिं च नारीणां।। ७

अथ राहुः सौरसहितो लग्नगतश्चेदर्त्थनाशो भवति। क्रोधाद्विदेशगमनं च भवति। भृगुणा युतो भार्यारोगं नारीणां मरणं च करोति।।

कार्यात्थनाशमाहुर्बुधस्य शुक्रस्य चांगनानाशं
बहुतरसुतार्त्थलाभं करोति सौरस्य वेश्मगतः।। ८

राहुर् बुधक्षेत्रलग्नगतो(अ)र्त्थनाशं कार्यनाशं करोति इति सर्व्वे आहुः। शुक्रस्य अंगनानाशं सौरवेश्मनि बहुतरसुतार्त्थलाभं करोति।।

अंगनखांबरहानिं कार्यविनाशं करोति गृहदाहं
नीचजनेभ्यः पूजां पितृमरणं चार्क्करशिगतः।। ९

राहुरर्क्करार्श्युदितो गृहदाहं च अधमजनेभ्यः पूजां पितृमरणं च करोति।।

सम्पादयति स्थानं मानं द्रव्यं च गुरुगृहे लग्ने
चन्द्रावासे जनयति पूजां पीडां जनन्याश्च।। १०

राहुसहिते गुरुगृहे लग्ने स्थानं मानं द्रव्यं च सम्पादयति सज्जनयतीति। चन्द्रराशिगतः सर्व्वजनपूजां मातृवियोगं च।।

त्रिविंशाध्यायः

रविगतराशावुदिते तदनन्तरमुदयगे तु भृगुयुक्ते
कनकस्य सिद्धिनाशौ भवत इति ब्रह्मशौण्डमतं।। १

आदित्यस्थितराशावुदिते तदनन्तरं द्वितीय राशावुदिते भृगुयुक्ते सति तत्रादित्योदये स्वर्ण्णसिद्धिर्भवति। अथ शुक्रयुते लग्नगते सुवर्ण्णनाशो भवति।।

शुक्रादपि भौमयुते भौमाल्सौरिस्ततः परं सौम्यः
आद्यस्ताम्रविनाशो बुधस्य नाशो भवत्ययसः।। २

शुक्राद् द्वितीयराशौ भौमयुते अथवा भौमाद् द्वितीये सौरयुते प्रथमराशौ तयोस्ताम्रविनाशो भवति। द्वितीये त्रपुलाभः अर्त्थादेवान्येष्यः। सौरलग्ने द्वितीये बुधयुक्ते अयोलाभो भवति। बुधलग्ने द्वादशे अयसो नाशो भवति। शुद्धायसमायुधमित्यर्थः। एतच्छ्लोकद्वयार्थः। ब्रह्मशौण्डाचार्यमतं।।

ग्रहपतिलग्ने नाशश्चतुष्पदानां कुजस्य मृत्युभयं
रविभुधयोः कीटभयं बुधलग्ने बन्धुसुतनाशः।। ३

ग्रहपतिरादित्यः। तस्योदये चतुष्पाल्लाभं पृच्छति चेत् पूर्व्वार्ज्जितानां नाशो भवति। कुजलग्ने मृत्युभयं च वदेत्। सूर्यबुधयोर्लग्ने कीटजनितं भयं वदेत्। बुधलग्ने बन्धुसुतनाशं। अत्यन्तं बलहीनस्य ग्रहस्य फलमेतत्। नीचशत्रुक्षेत्रमूढगतस्येत्यर्थः।।

यदि गुरुरुच्चस्थाने लग्नगतो भवति चन्द्रसंयुक्तः
प्रीतिश्चतुष्पदानां लाभं पक्षेण सज्जनयेत्।। ४

यदि गुरुः जीव उच्चे कर्क्कटलग्नगतो लग्ने भवति, न केवलं चन्द्रयुतो भवति यदा तदा सर्व्वेभ्यः प्रीतिर् भविष्यति तस्मिन् योगे चतुष्पदानां पक्षेण यूतेन सज्जनयेत् लाभो भवति।।

चतुर्विंशाध्यायः

आद्ये च संप्रयच्छति सुमनस्त्रीगन्धभक्ष्यरूपाणि
उडुपतिरनभायोगे कलहं नृगृहे विलग्ने वा।। १

अनभायोगफलमुच्यते - शुभानभायुक्ते चन्द्रे उदयराशिं पञ्चधा कृत्वा प्रथमभागोदये सुमनः, द्वितीयभागोदये स्त्रीलाभं, तृतीये चन्दनादिलाभं गन्धस्य वा, चतुर्त्थे तांबूलक्रमुकफलादिभक्ष्यलाभं, पञ्चमे रूपं सुन्दरवस्तुलाभं, दर्शनमथवा वदेत्। नृगृहे पुरुषराशौ चन्द्रे स्थिते वा लग्ने वा कलहमेव भवति। पापग्रहानभायामपि कलहं पूर्व्वोक्तलाभानामपि हानिश्च भवति। आरूढेनापि वदेत्।।

स्त्रीराशिषु भृगुशशिनोर्होरायां पृच्छतीषु नारीषु
नार्या लाभो वाच्यो दास्या नीचस्थयोर्लाभः।। २

युग्मराशिषु स्थितयोः स्वहोरास्थितयोः शुक्रचन्द्रयोरन्यतमस्योदये यदि नारीषु पृच्छतीषु मैथुनं वा लाभं वा पृच्छति चेत्तल्प्रष्टुर्वदेत्। यदि स्वनीचस्थयोरुदयगतोर्दास्या लाभो भवति। एवं सन्ततिप्रश्ने पुरुषग्रहराशिवशात् पुत्रलाभो भवति।।

यदि पापयुतौ स्यातां कुरुतो(अ)त्रायासमंगनानाशं
नृगृहेष्वर्क्कारयमा मित्रविरोधस्य कर्त्तारः।। ३

चन्द्रशुक्रौ पापयुतौ उदयगतौ स्त्रीरोगं स्त्रीमरणं वा कुरुतः। आदित्यकुजमन्दाः एकतः प्रथमाद्योनराशिगताः मित्रेषु विरोध कर्त्तारो भवन्ति।।

यद्येतौ सौम्ययुतौ लग्ने कुरुतो(अ)त्र युवतिधनलाभं
सौरस्त्रिकोणयुक्तः सुतमरणं चोरवीक्षां च।। ४

एतौ चन्द्रशुक्रौ शुभग्रहयुतौ लग्नगतौ युवतीस्त्रीलाभं युवतिदृश्यलाभं वस्त्रपुष्पादिलाभं कुरुतः। सौरः पापयुतस्त्रिकोणे पञ्चमे स्थितः पुत्रमरणं करोति। अथवा चोरदर्शनं वा वदेत्।।

होराद्वादशराशौ षष्ठे वा भवति बन्धनं रविजे
भौमे रुधिरं सूर्ये युद्धं चन्द्रे तु विस्फोटं।। ५

लग्नारूढाद्वा द्वादशभवने षष्ठराशौ वा रविजे स्थिते बन्धनं वदेत्। चरस्थिरोभयराशिवशाद् दूरादूरपथिषु निर्द्दिशेत्। तयोरेकत्र भौमे स्थिते रुधिरविकाररोगो भवति। एवं सूर्ये युद्धं भवति। क्षीणचन्द्रे स्थिते मसूरिकादिरोगो भवति। एते ग्रहाः शुभवीक्षिताः उक्तफलाभावं कुर्युः। न भवतीत्यर्थः। एते पापग्रहाः शुभवीक्षणयुता वा पापफलं न कुर्युः। यदि पापग्रहाः बलवन्तः स्वल्पमशुभं कुर्युः।।

चन्द्रेण गुरुर्लग्ने वरिष्ठभोगार्त्थयुवतिलाभकरः
गोरसबहुळं भुक्तं वार्त्ताद्या श्रूयते चेष्टाः।। ६

चन्द्रेण सह लग्नगतस्य ग्रहस्य फलमुच्यते - सचन्द्रे गुरौ लग्नगते उदितराशिद्रेक्काणक्रमेण वरिष्ठभोगं वरिष्ठार्त्थं वरिष्ठयुवतिः मुख्यस्त्री एतेषां लाभं वदेत्। तेनैवोदयेन भुक्तौ गोरसबहुळं च इष्टवार्त्तां च इष्टकथां च वदेत्। आदिशब्देन

श्रवणदर्शनलाभादीन् वदेत्।।

भोजनमुदारमंबरलाभं विख्यातकुलजसम्पर्कं
शुक्रः कुरुते सौम्यो विजयं विद्यां विवादं च।। ७

सचन्द्रे शुक्रे लग्ने द्रेक्काणक्रमान्मृष्टभोजनमंबरलाभः प्रसिद्धकुलजसंबन्धः एतानि वदेत्। कुरुते - बुधः सचन्द्रः विजयं च विद्यां च विवादं च कुरुते। विवादं तार्किकं।।

स्थानचतुष्पान्नाशं नेत्रविकारांगरोगविच्छायाः
वदतीन्दुनोष्णकिरणः स्त्रीगुह्यस्पर्शनं चैव।। ८

स्थानेति। चन्द्रेण सह आदित्य उदितश्चेत् उदितभागक्रमेण स्थाननाशं चतुष्पान्नाशं नेत्ररोगं अंगरोगं विच्छायां च वदेत्। स्त्रीगुह्यस्पर्शनं च वदेत्। विच्छाया विगतच्छाया।।

यद्यत्रैव बुधः स्यात् प्रष्टारं पारदारिकं विद्यात्
चलचित्तमर्थलुब्धं परपरिवादे च नित्यरतं।। ९

यदीति - अत्रैव रविचन्द्रयुते लग्ने बुधयुक्ते सति पूर्वोक्तफलानि च इहोक्तफलानि वदेत्। प्रष्टा पारदारिकः चलचित्तः द्रव्येष्वतिलुब्धः परपरिवादे च नित्यरतिः।।

शशिवेश्मनि रविलग्ने सन्तापोद्वेगनिर्ग्गमायासाः
चोरभयरुधिरबन्धनसुवर्ण्णनाशं च कुजलग्ने।। १०

शशीति। शशिगृहे कर्क्कटके लग्नगते ग्रहयुते फलमुच्यते - यावन्ति फलानि ग्रहस्योक्तानि तावन्ति तल्लग्नभागानि कृत्वा एकैकस्य एकैकक्रमाद्वदेत्। अतः कर्क्कटे रवियुते लग्नगते मनस्सन्तापः, उद्योगः, निर्ग्गमो यात्रा, आयासो रोगः एते भवन्ति। कर्क्कटे सकुजे चोरभयं रुधिरस्रावं बन्धनं सुवर्ण्णनाशं च वदेत्।।

उत्तमपुरुषः प्रष्टा गुरुलग्ने स्थानमानलाभो(अ)स्य
उशना शशिगृहलग्ने करोति नारीगतां चिन्तां।। ११

उत्तमेति। कर्क्कटके गुरुयुते लग्नगते प्रष्टुरुत्तमशीलस्थानमानलाभादीन् वदेत्। शशिगृहे शुक्रयुते नारीचिन्ता वक्तव्या।।

स्थानभ्रंशं व्याधिं बन्धं रोधं निकर्त्तनं च तनोः
सुहृदां निवृत्तमार्क्किः करोति शय्यालये लग्ने।। १२

स्थानभ्रंशमिति। कर्क्कटे सौरयुते लग्नगते राशिभागक्रमेण स्थानभ्रंशं व्याधिं बन्धं रोधं शरीरनिकर्त्तनं प्रष्टुर्वदेत्।।

भौमगृहे शशिलग्ने व्याधिं शौक्रे(अ)र्थनाशमर्क्कगृहे
उत्कण्ठामायासं सौरे विद्याविनाशं च।। १३

भौमेति। कुजक्षेत्रे मेषवृश्चिकयोरन्यतमे चन्द्रे लग्नगते व्याधिं वदेत्। शौक्रे वृषतुलयोरन्यतमे चन्द्रे स्थिते लग्नगते प्रष्टुरर्थनाशं वदेत्। अर्क्कगृहे सिंहे च सचन्द्रे लग्ने उत्कण्ठां वदेत्। सौरेमकरकुंभयोरन्यतमे चन्द्रे लग्नगते रोगं च सर्व्वस्य चिन्तितस्य नाशं वदेत्।।

बन्धुजनार्थविनाशौ भार्यासम्पत्तिमृणमथायासं
बौधे जैवे मैत्रीं शौर्यं चात्मालये कुर्यात्।। १४

बन्धिति। बौधे मिथुनकन्ययोरन्यतमे चन्द्रे लग्नगते बन्धुनाशमर्त्थनाशं भार्याया असम्पत्तिं ऋणं आयासमेतानि वदेत्। जैवे धन्विमीनयोरन्यतमे चन्द्रे लग्नगते मैत्रीचिन्ता वक्तव्या। आत्मालये चन्द्रे स्वक्षेत्रे उदयगते आत्मशौर्यं वदेत्। ग्रहरहिते मेषादौ लग्नगते मेषे नृपसेनापतीत्यादि।।

केशनखद्विजकक्षस्तनाभ्यूरुमूर्द्धभगचरणाः
ज्ञेयाः पुल्लिंगाख्याः क्षिप्रं पुत्रार्थलाभकराः।। १५

केशेति - पुत्रप्रश्ने अर्थसिद्धौ वा केशाद्यंगस्पर्शे कृते तस्य प्रष्टुः पुत्रलाभमर्त्थसिद्धिं च वदेत्। अचिरेणेत्यर्थः।।

ग्रीवाभ्रूनासांगुलिजंघाहनुनाभिकर्ण्णपाळ्यश्च
पार्ष्णी कटचौ नार्यो(अ)र्थदुहितृकृद्दीर्घकालेन।। १६

ग्रीवेति - ग्रीवाद्यंगस्पर्शे कृते पुत्रिकालाभं स्त्रीकृतार्थसिद्धिं च दीर्घकालेन वदेत्।।

मुखपक्ष्ममेढ्रजानूदरपार्श्वशिरोललाटदेशास्तु
एते नपुंसकाख्याश्चामर्शे निष्फलाः प्रोक्ताः।। १७

मुखाद्यंगस्पर्शने प्रष्टुः कृते पुत्रप्रश्ने नपुंसकलाभं च अन्यकार्याणां निष्फलत्वं च वदेत्। न सिध्यतीत्यर्थः।।

यदि परिमृशन् स्ववक्षः पृच्छेत्तस्याग्रतो भवति लाभः
अन्यत्र निम्नदेशस्पर्शे हानिं वदेत्तस्य।। १८

यदि प्रष्टा स्वोरःप्रदेशं परिमृशन् पृच्छेत् तस्य प्राप्तं चिन्तितस्य लाभं वदेत्। अत्र यानि स्थानानि नोक्तानि तेषु च गळगुदजान्वन्तरादिषु निम्नप्रदेशेष्वामर्शे द्रव्यसिद्धिं पुत्रसिद्धिं वा पृच्छति चेद् द्रव्यहानिं सन्तानहानिं वदेत्।।

पञ्चविंशाध्यायः

केन्देर ग्रहे(अ)रिराशावंबरमध्ये(अ)थवा भवेत् क्रूरः
द्रव्यं हृतमिति विद्याद्राश्यवसाने ग्रहे युक्ते।। १

नष्टप्रश्ने उदयारूढचन्द्राणामेकतमस्यापि केन्द्रराशावरिराशौ कश्चिद् ग्रहः तिष्ठति चेद् नष्टचिन्ता वक्तव्या। अथवा दशमस्थाने कश्चित् क्रूरग्रहस्तिष्ठति चेत् तदेव।

यस्य राशौ कर्क्कटकवृश्चिकमीननवांशकेष्वेकत्र करिंमश्चिद् ग्रहे युक्ते यद् द्रव्यं नष्टं तद् ह्रतमिति विद्यात्। चोराह्रतमित्यर्थः।।

भौमर्क्षे कुजदृष्टे ताम्रं शुक्रार्क्कसौरिशीतगुभिः
कांस्यं बुधेन दृष्टे जीवे कनकं वदेन्नियतं।। २

नष्टप्रश्ने धातुत्वे पूर्व्वोक्तलक्षणैर्निश्चयिते धातुविशेषः कथ्यते भौमर्क्ष इति। ऋक्षशब्देन नवांशक उच्यते। मेषवृश्चिकनवांशकयोरन्यतरस्योदये कुजेन दृष्टे ताम्रं। तस्मिन्नेव भौमनवांशे शुक्रार्क्कशनैश्चरचन्द्रैर्दृष्टे कांस्यं भवति। बुधेन दृष्टे कनकं। जीवेन दृष्टे शुद्धकनकं।।

भौमे बुधेन वज्रं कनकं सूर्ये भृगौ मणिर्ज्ञेयः
काचं निशाकरे स्याद्देवगुरौ बहुविधं लोहं।। ३

लग्नगते भौमे बुधेन दृष्टे वज्रं, सूर्येण कनकं, भृगुना माणिक्यं, शशिना काचं, गुरुणा बहुविधं मणिरत्नलोहं, शनिना आयसं।।

ग्रीवाभरणं सूर्ये शुक्रर्क्षे हस्तभूषणं शुक्रे
भाजनमिन्दोः कांस्यं कार्षापणमिन्दुजोरवीजौ।। ४

शुक्रांशके सूर्येण दृष्टे उदयगते ग्रीवाभरणं भवति। शुक्रदृष्टे हस्तभूषणं। चन्द्रदृष्टे कांस्यभाजनं। इन्दुजोर्व्वीजौ शुद्धसुवर्ण्णं। गुरुराहुभ्यां भौमांशकोक्तं वदेत्। उदयगते शुक्रे(अ)प्येवं वदेत्।।

स्त्रीपुरुषावपि सौरे सौरर्क्षे कांस्यभाजनं शुक्रे
भुजभूषणांगुलीये बुधः कुजो हस्तभूषणकृत्।। ५

जीवचिन्तां ज्ञात्वा बुधनवांशके लग्नगते सौरदृष्टे स्त्रीपुरुषौ नष्टौ। शुक्रदृष्टे कांस्यभाजनं। भुजभूषणमंगुलीयं वा बुधः। कुजो(अ)पि हस्तभूषणं।।

वेष्टनमिन्दोर्वाच्यं सूर्ये शृंगोद्भवं वदेन्नष्टं
उरगार्क्कजसंयुक्ते सूर्ये नारीरौ नष्टौ।। ६

उदयगतं बुधांशकं वीक्षितस्य चन्द्रस्य चेद् वेष्टनं भवति। वेष्टनं नाम कर्ण्णाभरणविशेषः। सूर्यदृष्टे शृंगोत्भवं। तेन रचितं नष्टमिति वदेत्। तमेवांशकं राहुशनियुते सूर्ये पश्यति तदा नारीनरौ नष्टौ भवतः।।

बुधशशिशुक्रा रजतं चन्द्रगृहे काचवज्रकांस्यानि
भौमः कुरुते सूर्यस्ताम्रं सम्पादयेन्नष्टं।। ७

लग्ने चन्द्रांशके उदिते बुधशशिशुक्रैः समस्तैर्दृष्टे रजतं काचं वज्रं कांस्यमेतानि कुजस्य। सूर्यस्ताम्रं सम्पादयेत्।।

लोहद्वयमिन्दुसुतः सूर्यर्क्षे चन्द्रभास्करौ कनकं
ग्रैवेयकमवनिसुतो हस्त्यश्वौ शुक्रदेवगुरू।। ८

सूर्यांशके लग्नगते बुधदृष्टे लोहद्वयं भवति। दीपभाजनादि लोहद्वयं। चन्द्रभास्करौ कनकं। अवनिसुतो ग्रीवाभरणं। शुक्रजीवौ हस्त्यशौ।।

ताम्रायसरुप्याणि च कनकं सूर्यबुधजीवरुधिरांगाः
काचकृतौ शशिशुक्रावायसमार्क्किर्यमर्क्षगतः।। ९

शनैश्चरांशके लग्नगते सूर्यदृष्टे ताम्रं भवति। बुधदृष्टे सुद्धायसं। जीवदृष्टे काचकृतौ। शनैश्चरदृष्टे चायसं। एके आचार्या भौमार्क्ष इति राशिग्रहणं वदन्ति।।

यस्मिन् भावेन नोक्तं तस्मिन् कनकं बृहस्पतौ वाच्यं
आयसमार्क्कापत्ये नोक्ते धातौ भवत्येव।। १०

यस्मिन् राशावंशके वा उदिते गुरुदर्शने फलं नोक्तं तस्मिन् सर्व्वत्र सुवर्ण्णं भवति। तथैव शनैश्चरस्यायसं। धातुचिन्तां नष्टे एतानि धातूनि गृह्णीयात्। यस्मिन् भवने नोक्तमिति। जीवभवने जीवांशे वा लग्नगते ग्रहदृष्टे(अ)प्यदृष्टे वा धातौ नष्टे सति कनकमेव वदेत्। उक्तांशके बहुग्रहदर्शिते बलवतो वक्तव्यं। बलसाम्ये समुच्चयो वक्तव्यः। येन ग्रहेण यन्नष्टनिर्ण्णयः कृतः तेनैव नष्टस्य कालनिश्चयो(अ)पि कार्यः। तद्ग्रहस्थितराशिवशाद् अंशकवशाद्वा नष्टराशिनिश्चयश्च कार्यः।।

इन्दुं पश्यति भौमे नष्टं भूमौ तदादिशेद्धीरः
धात्वादिभाजनेष्वपि नष्टं विद्याददृष्टश्चेत्।। ११

भौमे इन्दुं पश्यति सति नष्टं भूमौ निहितमिति वदेत्। सूर्यो(अ)पि भौमवत्। शुक्रे जले, बुधे भूमौ, जीवे आकाशे लंबमानं, शनौ वायुस्पर्शे। एवमारूढवशाच्चोराह्रतकाले द्रव्यस्थितप्रदेशं वदेत्। चन्द्रेणैव पश्चाल्स्थितस्थानमपि वदेत्। शशी ग्रहादृष्टश्चेत् धात्वादि चन्द्रस्थितराशिवशाद् भाजने न्यस्तं वदेत्। धातुराशिस्थितश्चेद्धातुभाजने न्यस्तं नष्टं। मूलराशिगतश्चेन्मूलभाजने। जीवराशिस्थितश्चेत् कृत्रिमजीवभाजने वदेत्।।

स्थालीकुंभोदञ्चनघटिकासंभिन्नभाजनांबुधराः
रविजीवभौमबुधभृगुसौरेन्दूनां च पात्राणि।। १२

सूर्यस्य कुडारादि बृहत् पात्रं। गुरोः कलशाकृतिः कुंभः। कुजस्य उदञ्चनं हस्तचषकादि। बुधस्य घटिका। शुक्रस्य संभिन्नं भग्नयुक्तं। मन्दस्य भूकृतं भाजनं। चन्द्रस्यांबुपात्रं। नष्टप्रश्ने भाजने निश्चयिते यो ग्रहो लग्नं पश्यति उक्तप्रकारेण वदेत्। तत्र गृहे चोरप्रदेशं वीक्षेते रविभौमा वित्यत्रोक्तं वदेत्। उदये यावन्तः पापग्रहाः पश्यन्ति तावन्तश्चोराः भवन्ति।।

मूलदेशे वस्त्राणि यानि तान्येव चेह वाच्यानि

जलराशावशुभयुते तैलं सर्पिः शुभैरबुधैः।। १३

मूलचिन्तायां द्रेक्काणवशाद्यानि वस्त्रविशेषाण्युक्तानि तान्येव नष्टे वदेत्। तैलादिनष्टप्रश्ने तन्निश्चिते जलराश्युदये पापदृष्टे तैलं भवति। तस्मिन्नेव बुधरहितैः शुभैर्दृष्टे घृतं। बुधस्य सुरा। शशिवशात्तैलघृतभाजनं वदेत्।।

जातिफलकटुकचन्दनतमालतक्कोलकुष्ठधन्वाषाः
आदित्यसौरभार्ग्गवबुधगुरुशशिलोहिताः क्रमशः।। १४

मूले नष्टे पूर्व्वोक्तलक्षणैस्तद्विशेषं वदेत्। औषधविशेषे सति जातिफलं सूर्यस्य, कटुकरोहिणी सौरस्य, चन्द्रनं शुक्रस्य, तमालं बुधस्य, तक्कोलं गुरोः, कुष्ठं चन्द्रस्य, धन्वाषः कुजस्य। एतानि गन्धद्रव्याणि विमृश्यान्यानि च स्वादुना गन्धेन च वदेत्। उच्चगतग्रहकारणाद्वदेत्।।

षड्विंशाध्यायः

गुरुदृष्टे भृगुराशौ मधु शीथु रवौ प्रसन्नमुडुपतिना
कर्त्तनशालिकमुशना वर्त्तिसुरा भौमसन्दृष्टे।। १

अथ मध्वादिपानवारुणीविशेष उच्यते - शुक्रक्षेत्रोदये येन केन शुक्रदृष्टचा मधुपानचिन्ता वक्तव्या। तस्मिन् क्षेत्रे गुरुदृष्टे मधु नष्टं। सूर्यदृष्टे शीथु। शशिना प्रसन्नं मधु। शुक्रदृष्टे कर्त्तनशालिकं। भौमदृष्टे वर्त्तिसुरा।।

भुजगशनैश्चरदृष्टे भवति विनष्टा रसेन दुर्गन्धा
बुधदृष्टे हरितसुरा नोक्तास्तूह्या रसाद्येन।। २

तस्मिन्नेव शुक्रक्षेत्रे राहुणा शनैश्चरेण वा दृष्ट रसेन हीना दुर्गन्धयुता सुरा विनष्टा भवति। तस्मिन्नेव बुधदृष्टे हरितसुरा। ये मद्यविशेषाः नोक्तास्ते रसगन्धदोषैरनुमेयाः।।

ह्रस्वविषाणो भौमे मुण्डश्चन्द्रे गुरौ सिते दीर्घः
सङ्कटविशालशृङ्गो रविबुधयोर्भग्नशृंगको(अ)र्क्कसुते।।३

अथ चतुष्पात्त्वे निश्चिते जीवयोनौ शृंगविशेषनिर्ण्णय उच्यते - लग्ने भौमदृष्टे किञ्चिदुन्नतविषाणः। चन्द्रवीक्षिते मुण्डशृंगः। गुरुशुक्रवीक्षिते दीर्घशृंगः। रविवीक्षिते सङ्कटशृंगः। बुधवीक्षिते विशालशृंगः। शनिराहुवीक्षिते भग्नशृंगः। उल्पाटितशृंग इत्यर्थः। चतुष्पाल्प्रश्ने येन ग्रहेण उक्तलक्षणं लक्ष्यते तेनैव वर्ण्णव्रणादीन् वदेत्।।

क्रूरः क्रूरं पश्येन्नष्टं शुभवीक्षणेन तल्लभते
यदि वीक्षते शुभर्क्षं सौम्यो निस्संशयो लाभः।। ४

अनेन नष्टस्य लाभालाभमुच्यते - क्रूरराशिस्थितमुदयगतं पापग्रहं पापग्रहः पश्येद्यदि तदा लाभो नास्ति। यदि तमेव पापग्रहं शुभग्रहो बलवान् वीक्षत्तदार्द्धलाभो भवति। अथवा तस्य प्रतिनिधिर्वा सिध्यति। चिरकालादुदयगतं शुभग्रहः पश्यति चेत्तदा अद्यैव लाभो भवति। उदये शुभ सति बलवत् पापदर्शनेन नश्यति इति वक्तव्यं। लाभकालः पूर्व्वोक्त एव। उदयसप्तमराशिवशान्नष्टस्य दर्शनं वदेत्। तत्र स्थितं द्रव्यं द्रव्यविशेषाश्च पूर्व्वं धातुमूलजीवचिन्तायामुक्ताः तानपीह वदेत्।।

प्रष्टुर्नष्टं द्रव्यं वदेत् स्वदिक्स्थे ग्रहे स्थितं तत्र
भवनग्रहाश्रयेणोच्चनीचारिमित्रधनमूह्यं।। ५

यो ग्रहो लग्नं पश्यति स स्वराशिस्वांशगतश्चेत् नष्टं द्रव्यं तत्रैवास्तीति वदेत्। भवनेनाश्रयग्रहेण वा स एव ग्रहः स्वोच्चनीचसुहृच्छत्रुजनानां द्रव्यमिति वदेत्।।

विभ्रमति चरविलग्ने स्थिरराशौ तत्र निर्द्दिशेत् द्रव्यं
द्विशरीरे प्रतिवेश्मन्यथवा ग्रामे गृहे स्वदिशि।। ६

चरराश्युदये नष्टं पृच्छति तदा सञ्चरति द्रव्यं। स्थिरराश्युदिते तत्र गृहे स्थितं। उभयोदये गृहाद्बहिः प्रतिवेश्मनि वदेद् द्रव्यं। अथवा ग्रामे गृहे वा अन्येष्यं स्वदिशि। बलवति लग्ने राशेर्दिशि द्रव्यं वदेत्। बलरहिते वीक्षणग्रहस्य या दिक् सा वक्तव्या।।

द्रव्यं गृहादतीतं राशिमुखे द्वार उच्यते लग्ने
मध्ये गृहमध्ये स्यादवसाने(अ)न्त्ये गृहे द्रव्यं।। ७

लग्ने प्रथमद्रेक्काणे द्रव्यं गृहादतीतं चोरगृहद्वारगतं। मध्यद्रेक्काणे चोरगृहमध्यगतं। अन्त्यद्रेक्काणे गृहमतीत्य पश्चाद्भागे न्यस्तमिति वदेत्। यो ग्रहः चोरकर्त्ता तेन स्थितद्रेक्काणवशादन्ये वदन्ति।।

नवनवगृहप्रदेशे स्थितनवभागैर् द्विषड्भिदोपेतैः
बलवच्छुभसंयुक्तैः द्रव्यद्वारं वदेत् केन्द्रैः।। ८

नष्टद्रव्यं गृहे स्थितमिति निश्चित्य गृहप्रदेशमेकाशीतिपदं कृत्वा तस्मिन् द्वादशराशीन् विन्यस्य यस्मिन् राशौ यतमे(अ)म्शे बलवान् शुभग्रहस्तिष्ठति तत्र द्रव्यमिति वदेत्। अथवा केन्द्रगतानां राशीनां यो राशिः शुभयुतः तत्र द्रव्यं वदेत्। केन्द्रे नष्टद्रव्यस्थितस्य गृहस्य द्वारं केन्द्रगतस्य ग्रहस्यातिवीर्यस्य या दिक् तास्यां दिशि वक्तव्यं।।

योजनहस्तक्रोशा वाच्या मध्याच्च्युतैर्ग्रहैर्नीचैः
अंशैरिंत्रशद्भागैर्द्वादशभागैरतीतेषु।। ९

नष्टद्रव्ये दूरगते निश्चिते नवमाष्टमसप्तमस्थैरशुभग्रहैर्भुक्तनवांश-त्रिंशांशकद्वादशांशकैश्च एतावद्देशमतीत्य स्थितं नष्टद्रव्यमिति वदेत। एकत्र बहवो भवन्ति यदा तदा पृथक् पृथक् योजनानि गृह्णीयात्। गणना कर्त्तव्या। एवं चरलग्ने, स्थिरलग्ने द्रव्यस्थितत्वे निश्चयिते सति किष्कवंगुलयवाः। उभयराशिलग्ने(अ)थवा

प्रतिवेश्मनि नष्टद्रव्ये निश्चयिते तैरशुभैः गव्यूतिकिष्क्वंगुलयवा वाच्याः।।

गोष्ठागारपुरोहितदेवागारेषु सुरगुरौ वाच्यं
व्रतवन्नारीणां वा गृहेषु नष्टं विनिर्द्देश्यं।। १०

गुरुदर्शने लग्नं चतुर्धा कृत्वा क्रमाद् गोष्ठागारादि चत्वारि स्थानानि वक्तव्यानि।।

शय्योद्यानजलाशयलळितस्त्रीगन्धमाल्यनिलयेषु
शुक्रे कुजे(अ)ग्निनिलये कर्म्मारगृहे वदेन्नष्टं।। ११

शुक्रदर्शने लग्नं षोढा विभज्य क्रमेण शय्यास्थानं उद्यानं जलाशयस्थानं सुभगस्त्रीगृहं गन्धालयं माल्यालयं च वक्तव्यानि। कुजदर्शने लग्नं द्विधा कृत्वा अग्निनिलये कर्म्मकारादिधातुकारादिगृहे वक्तव्यं।।

यत्र प्रतिनिवसन्ति प्रमदाः कलहप्रिया वयोमध्याः
तत्रादेश्यं नष्टं निलयद्वारे(अ)थवा सूर्ये।। १२

आदित्यदर्शने कलहस्त्रीगृहे गृहद्वारे च वक्तव्यं।।

चन्द्रे सलिलाभ्याशे जले(अ)थवा नष्टमादिशेत् सततं
अथवा यत्र सुवेषा विदग्धनार्यो भवन्त्यत्र।। १३

चन्द्रदर्शने लग्नं त्रिधा कृत्वा यथार्हं वक्तव्यं।।

निवसन्ति यत्र नार्यो यौवनवेषांगरूपसम्पन्नाः
तासां गृहमध्यगतं सौम्ये नष्टं समादेश्यं।। १४

सौम्यगृहे बहुनारीगृहे नष्टं वक्तव्यं।।

कलहप्रियाश्च पिशुना वृद्धा वा यत्र योषितः सौरे
जीर्णोपस्करभाण्डेषु कर्दमे वा विनिर्द्देश्यं।। १५

शनैश्चरदर्शने लग्नं त्रिधा कृत्वा यथास्थानं जीर्णोपस्करादिभाजनेषु न्यस्तं नष्टमिति वदेत्।।

श्वभ्राश्रितं दृगाणं सूर्यः पश्येत् समग्रबलवीर्यः
विबलौ यदीन्दुशुक्रौ श्वभ्रस्थाने वदेन्नष्टं।। १६

श्वभ्रशब्देन नगरसमीपमुच्यते। इन्दुशुक्रौ बलिनौ चेत्तत्रैव जले वदेन्नष्टं।।

सप्तविंशाध्यायः

स्थिरराश्यंशकलग्ने मध्ये वर्ग्गांशके(अ)पि वा लग्ने
नष्टं स्वगृहे ब्रूयात्तस्य स्वामी भवेच्चोरः।। १

स्थिरराश्युदये स्थिरराश्यंशोदये वा दशमगतग्रहांशोदये वा वर्ग्गोत्तमांशोदये वा नष्टद्रव्यं स्वगृहे वदेत्। द्रव्यस्वामी तस्य संबन्धी वा चोरो भवति।।

चरराशावंशे वा प्रोषितमुदयेन संगतं ब्रूयात्
बाह्योपगस्तेनो यमळे तु सहोषितश्चोरः।। २

चरराश्युदये चरांशोदये वा बहिश्चरश्चोरः, द्रव्यं च। उदयगतग्रहांशोदये(अ)पि बहिश्चरः। उदयराशिवशाद् दूरत्वं वदेत्। उभयराश्युदये तदंशोदये समीपोषितश्चोरः। द्रव्यं समीपस्थितं।।

द्रेक्काणो भवनादावुत्थित इति कीर्त्यते(अ)न्त उपविष्टः
मध्ये शयितो ज्ञेयस्तेषु च भावस्तथा योज्याः।। ३

सर्व्वेषां राशीनां प्रथमद्रेक्काणः उत्तिष्ठति, मध्यमः शेते, उत्तरः आस्ते। अयं भवः - उदयद्रेक्काणवशाच्चोरो वक्तव्यः।।

यादृग्भवति विलग्ने द्रेक्काणस्तादृशो भवेच्चोरः
केन्द्रगतो वा यादङ्ग्रहस्तु तादृङ्निर्द्देश्यः।। ४

उदये बलवति उद्यद् द्रेक्काणसदृशश्चोरः। उदये बलहीने केन्द्रगतबलवद्ग्रहसदृशाकृतिश्चोरः। केन्द्रे यावन्तो ग्रहा बलिनो भवन्ति तावन्तश्चोराः। गुणकाराश्च कर्त्तव्यः। यद्येको बलवान् तदा एक एव चोरः। सर्वे बलयुक्तास्तावत्संख्याश्चोराः।।

लग्ने ग्रहे स्वयं स्याद् दुश्चिल्क्के भ्रातरं वदेच्चोरं
हिबुके मातृस्वजनो माता वा पञ्चमे(अ)पत्यं।। ५

लग्नादिषु यस्मिन् भावे बलवद्ग्रहस्तिष्ठति तद्भावकश्चोरः। तत्रापि स्ववर्ग्गे स्थिते स्वयमेव चोरः। लग्ने बलवद्ग्रहयुते स्वयमेव चोरः। द्वितीये कुटुंबजनः। भ्रातादिषु परवर्ग्गस्थे ग्रह एते। पूर्व्वाचार्यो भौमर्क्ष इति राशि गणनं वदन्ति। भ्रातादिषु परवर्ग्गस्थे ग्रहे तत्संबन्धिनश्चोराः। चतुर्त्थे स्ववर्ग्गे माता। परवर्ग्गस्थे मातृस्वजनः। पञ्चमे पुत्रः। परवर्ग्गस्थे पुत्रस्वजनः।।

षष्ठे चोरः शत्रुभार्या स्वजनो(अ)थवास्तमुपयाते
नवमे पितैव चोरस्तत्स्वजनो वा(अ)थवा भवेद्धत्ताः।। ६

षष्ठे ग्रहे शत्रुश्चोरः। सप्तमे स्ववर्ग्गस्थे ग्रहे भार्या। परवर्ग्गस्थे तत्स्वजनः। अष्टमे केवलशत्रुः। नवमे पिता चोरः तत् स्वजनो वा।।

नभसि क्रूराः प्रोष्याः कर्म्मकराः प्रेष्यजातयो नीचाः
मेषूरणे तु सौम्ये कोशाध्यक्षेण तज्ज्ञीतं।। ७

दशमे क्रूरग्रहे प्रेष्याः कर्म्मकराः। नीचस्थे ग्रहे नीचः प्रेष्याः। लाभे तु न नष्टं।

द्वादशे नष्टस्य नासो विद्यते, न लभ्यते।।

स्त्रीसंज्ञे वा लग्ने युग्मक्षेत्रेषु वा ग्रहा बहवः
चोरी स्त्रीति ब्रूयादोजेषु पुमान् ग्रहे पुंसि।। ८

स्त्रीराशौ लग्नगते स्त्रीक्षेत्रे बहवो ग्रहास्तिष्ठति चेत् चोरी स्त्री। स्त्रीराशौ स्त्रीग्रहदृष्टियुक्ते स्त्री। पुंसि लग्ने पुंराशौ बहुग्रहाः पुमांश्चोरः यथा चिन्तायमुक्तं तथा वक्तव्यः।।

नागरिकद्रेक्काणे नागरिको वीक्षते ग्रहः कश्चित्
चोरो नागरिकः स्याच्छेषैरपि चैवमूह्यन्ते।। ९

नगरावासिद्रेक्काणे लग्ने नगरवासी ग्रहः पश्यति चेत् नागरिकश्चोरः। शेषैर्द्रेक्काणैर्ग्रहैरेवं निवासभूमिं वदेत्। जलनिवासिद्रेक्काणे जलग्रहदृष्टे वा जलनिवासिकः। तथा आरण्ये तथा ग्रामे वासी। तथा देवगृहवासी। एवमेव विमृश्य वदेत्।।

मनुजसमानाकारा द्रेक्काणास्तूत्तमा नरा ज्ञेयाः
वानरतुरगवराहाश्वमुखे सर्पाकृतौ त्वधमाः।। १०

मनुजद्रेक्काण लग्नगते उत्तमाश्चोराः वानराद्यैरधमाः। द्रेक्काणवशाद्वदेत्।।

श्वभ्रांबुसमीपगताः स्थिताश्च पौराः प्रवासिनो ग्राम्याः
द्रेक्काणसदृशरूपाश्चोरा वस्त्रादिभूषणैर्ज्ञेयाः।। ११

एषां द्रेक्काणानां य उदयति तादृशश्चोरः तद्वासीत्यर्थः। वस्त्रार्थभूषणैस्सह द्रेक्काणसदृशाश्चोराः।।

ह्रस्वं केन्द्रे द्रव्यं त्रिकोणचतुरश्रगा ग्रहा दीर्घं
कुर्युर्विपुलं स्वांशालयेषु सच्छिद्रमन्येषु।। १२

केन्द्रे बहुग्रहयुते ह्रस्वं द्रव्यं नष्टं। त्रिकोणचतुरश्रगताश्चेद्दीर्घं। स्वांशेषु स्वगृहगतेषु विपुलं वृत्ताकारं नष्टं। अन्येषु परांशक्षेत्रगतेषु सच्छिद्रं। भिन्नमित्यर्थः।।

आदौ चतुरश्रकरास्त्र्यंश्रं मध्ये ग्रहाः प्रकुर्व्वन्ति
राश्यवसाने वृत्तं स्वरूपतुल्यं हि वा कुर्युः।। १३

सर्व्वे ग्रहा सर्व्वराशिषु प्रथमद्रेक्काणे स्थिताः दर्शनेन नष्टद्रव्यं चतुरश्राकृतिं कुर्युः। मध्यद्रेक्काण गतास्त्र्यश्रं कुर्व्वन्ति। अन्यद्रेक्काणस्था वृत्तं। द्रेक्काणे विबले ग्रहे बलवति ग्रहस्वरूपसदृशं नष्टद्रव्यं भवति।।

स्वांशक्षेत्रगतेषु ग्रहेषु चात्मीयमादशेद् द्रव्यं
स्वांशेतरराशिगते मित्रद्रव्यं समादेश्यं।। १४

यो ग्रहो लग्नं वीक्षते स स्वांशक्षेत्रस्थश्चेत् तस्य कर्तृद्रव्यं भवति। परांशक्षेत्रगते ग्रहे मित्रद्रव्यं भवति। शत्रुक्षेत्रांशे वा शत्रोर भवति।।

संबन्धिनां स्वराशावन्यांशे द्रव्यमुच्यते सद्भिः
पररश्यंशकयुक्ते परभे परकीयमिति वाच्यं।। १५

स्वराशावेव ग्रहे अन्यांशकगते संबन्धिनां द्रव्यं भवति। पररशौ परांशकगते परस्य द्रव्यं भवति।।

चरभवनांशेषु शिरः स्थिरभवनांशेषु कायमध्यं स्यात्
उभयालयांशकेषु च जघन्यकायो विनिर्द्देश्यः।। १६

नष्टद्रव्ये भूषणे निश्चयिते कस्यावयवस्य भूषणं आह - चरराशौ वा चरद्वादशांशे वा लग्नगते शिरसो भूषणं। तथा स्थिरराश्यंशकेषु लग्नगतेषु ग्रीवाभरणं। उभयराश्यंशकेषु पादाभरणं। अथवा भिन्नं नष्टं चेत्तस्य द्रव्यस्यावयवमुक्तप्रकारेण द्रव्यं भवति।।

सौम्यैर्महापथः स्यादशुभैर्दुर्म्मार्ग्गमादिशेत् प्राज्ञः
हित्वा देशविभागं प्रष्टुर्ब्रूयात् ग्रहोद्देशं।। १७

सौम्यग्रहवीक्षिते लग्ने महापथेन गतश्चोरः। अशुभेन दुर्म्मार्ग्गगतः यानि योजनानि पूर्व्वोक्तानतानि हित्वातीत्य ग्रहस्य पूर्व्वोक्तभूमौ नष्टद्रव्यं वदेत्।।

उडुतारा यावत्यस्तावद्द्रव्यप्रमाणमुदये स्यात्
यावन्तो वा चन्द्रस्थानं पश्यन्ति तावत् स्यात्।। १८

उदयगतस्य नक्षत्रस्य यावत्यास्तारकाः तल्प्रमाणमुदये बलवति। अश्वयुजस्तिस्रः, भरणी तिस्रः, कृत्तिका षट्, रोहिण्यः पञ्च, मृगशीर्षास्तिस्रः, आश्लेषा षट्, मघाः पञ्च, पूर्व्वफाल्गुनी द्वे, उत्तरफल्गुनि द्वे, हस्ताः पञ्च, चित्रेका, स्वात्येका, विशाखे द्वे, अनुराधास्तिस्रः, ज्येष्ठास्तिस्रः, मूलं नव, आषाढाद्वयं चतस्रः, श्रवणस्तिस्रः, श्रविष्ठा चतस्रः, शतभिषगृक्षशतं, पूर्व्वप्रोष्ठपदा द्वे, उत्तरप्रोष्ठपदं द्वे, रेवती तिस्रः। इत्येतल्कृष्णाचार्यस्याभिप्रेतं। आचार्यैर्बहुधाचोक्तं। उदये दुरुब्बले चन्द्रं पश्यन्तो यावतो ग्रहाः सा संख्या नष्टद्रव्यस्य। नक्षत्रतारासंख्यानां संहितासूक्तं।।

शिखिगुणरसेन्द्रियानलशशिविषयगुणर्त्तुपञ्चवसुपक्षाः

विषयैकचन्द्रभूतार्ण्णवाग्निरुद्राश्विवसुदहनाः

भूतशतपक्षवसवो द्वात्रिंशच्चेति तारकामानं

क्रमशो(अ)श्विन्यादीनां कालस्ताराप्रमाणेन।।

नक्षत्रफलं - उद्वाहे वर्षैस्तन्मितैः तद्दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्याथवा वाच्यः। ग्रहतुल्यतारमासैर्नष्टस्य लाभं वदेत्, अन्यदुक्तप्रकारेण ग्रहकालमपि वक्षति -

पक्षाद्भानोः, सोमस्य मासिकः, अंगारस्य वक्रप्रोक्तः। आदर्शनाच्च भावप्रोक्ता बुधस्य जीवस्य वर्षेण। षड्भिः सितस्य मासैः। अब्देन शनैश्चरस्य। सुरद्विषो(अ)ब्दार्द्धात्। एते कालविभागाः। ग्रहावलोकेषु वक्तव्याः।।

अथवात्र राशिभेदः कत्युडुभिः परिसमाप्येते लग्नं
तावल्प्रमाणमथवा राशिग्रहतारतो वाच्यं।। १९

लग्नराशिर्याभिरुडुताराभिः परिसमाप्यते तावल्प्रमाणं वा वदेत्। द्रव्यसंख्यानं राश्यधिपतिना वा पश्यता ग्रहेण वा उक्तवद्वदेत्। उदये दुर्ब्बले चन्द्रं ये ग्रहाः पश्यन्ति सा संख्या नष्टस्य। नीचारिगतैर्मासंख्या। क्षेत्रगते निष्कसंख्या। उच्चगतैर्दशगुणिता। बन्धुक्षेत्रगतैस्त्रिगुणितनिष्कं। अथवा लग्नगतस्य राशेरभुक्तगतारासम्मितं नष्टद्रव्यं। उदये दुर्ब्बले चन्द्रावलोकनग्रहाणामुक्तं राशिप्रमाणं।।

उदितनवांशतुल्यं द्विगुणं द्विशरीरराशिहोरायां
द्वित्रिगुणैः स्थिरचरभे(अ)प्युदितनवांशैर्वदेद् द्रव्यं।। २०

लग्ने द्विशरीरे अनुभुक्तनवांशद्विगुणसंख्या। स्थिरे(अ)पि तथा। चरे त्रिगुणा। अयं क्रमो लग्ने दुर्ब्बले वक्तव्यः।।

अष्टाविंशाध्यायः

अजवृषधनुषां नवतिः शतानि झषमकरकुंभानां
तौलेः सप्तदशाधिकमन्येषु शतं दशाभ्यधिकं।। १

अजवृषधनुषां मयूखसंख्या नवतिः। मीनकुंभमकराणां शतं। तुलाधरस्य सप्तदशाधिकशतं। अन्येषु मिथुनकर्क्कटसिहकन्यावृश्चिकेषु शतं दशाधिकं भवति।।

चन्द्रस्यैका नवतिः षष्टिर्जीवे(अ)शुभेषु पञ्चकृतिः
सप्ततिरधिका षड्भिः शुक्रे सौम्ये चतुर्भिः स्यात्।। २

चन्द्रस्यैका नवतिः, गुरोः षष्टिः, रवि कुज शनैश्चराणां पञ्चविंशतिः, षट्सप्ततिः शुक्रस्य, चतुस्सप्ततिर्बुधस्य मयूखाः।

द्विगुणं स्वगृहे कुरुते चतुर्गुणं स्वोच्चवक्रगो ज्ञेयः
त्रिगुणं ग्रहस्त्रिकोणे जनयति शेषे यथाप्राप्तं।। ३

सर्व्वग्रहाः स्वगृहे मयूखान् द्विगुणान् कुर्व्वन्ति। स्वोच्चे चतुर्गुणं, वक्रगतश्चतुर्गुणं, मूलत्रिकोणे त्रिगुणं, अन्यथा यथाप्राप्तं।।

हन्त्यस्तमये षष्ठं पञ्चममायुषि चतुर्त्थमथ नवमे
दशमे तृतीयमाये दायार्द्धं सर्व्वहानिरन्यत्र।। ४

सप्तमभवनादिगतो ग्रहः सौम्येतरो यथोक्तप्रकारं हरति। तदर्द्धं शुभग्रहः। किन्तु अदृश्यार्द्धगता अपि हरन्ति। कथमिति चेत् - प्रश्नादिगानां शुभग्रहाणामायुषि द्वित्रिचतुष्पञ्चषड्भक्तानि गृह्णीयात्। तदर्द्धं क्रूरग्रहस्य गृह्णीयात्। यो यो ग्रहो लग्नगतः पृथक् पृथक् तस्य तस्यायुषो मयूखान् संगुण्य लग्नायुः संयोज्य द्विगुणयेत्। ततो दृश्यार्द्धहरणमदृश्यार्द्धहरणं च कृत्वा सर्व्वेषां ग्रहाणामायूंषि लग्नायुषि संयोज्य पञ्चविंशाधिकशतेन हृत्वा शिष्टं प्रष्टुरायुर्वर्षाणि भवन्ति। दृश्यार्द्धहरणादन्यार्द्धहरणं न किञ्चिल् कर्त्तव्यं।।

एकोनत्रिंशाध्यायः

पुनरपि नष्टविसेषो योगविशेषेण कीर्त्यते सम्यक्
मेषविलग्ने शशिना दारककटकं भवेन्नष्टं।। १

पुनरपि नष्टविशेष इत्यादि - शुक्रेरिष्यते हिरण्यं इत्यन्तेन मूलग्रन्थेनावगन्तव्यं पूर्व्वोक्तलक्षणं। योगफमयोर्विरोधे सति तयोर्बलाधिक्येन फलं ब्रूयात् सम्यगिति।।

उद्यानपुष्करण्यां बुधयुक्ते हेजालकथ कटकं
भृगुणा हिरण्यवस्त्रं स्वस्त्रा मात्राथवा नीतं।। २
कनकं गुरुणा युक्ते नष्टं मृतिसंभ्रमे(अ)ग्निनयोगे वा
प्रतिवेशिना गृहीतं द्विजेन कनकोज्ज्वलांगेन।। ३
सौरेण मेषलग्ने भूमौ कार्षापणानि निहितानि
दास्या प्रतिवेशिकया हृतानि तानीति वक्तव्यं।। ४
जलमवतीर्ण्णा शोणा द्वितीयदिवसे शशिप्रभा नष्टा
द्रक्षति चतुर्त्थदिवसे मध्याह्नार्क्केण संयुक्ते।। ५
अजलग्ने बुधदृष्टे ह्यश्वतरीणामदर्शनं ब्रूयात्
श्वः काले रव्युदये लभ्यन्ते मृगयमाणेन।। ६
शुक्रेक्षिते(अ)जलग्ने धेनुद्वयमत्र गर्भिणी चैका
तिसृणां गवामदर्शनमष्टमदिवसे भवेल्लाभः ७
अद्य चतुर्त्थे दिवसे छागा नष्टास्तथार्किकणा दृष्टे
प्रतिवेशिको वयस्यो नवमे दिवसे स्वयं नेता।। ८
शशिशुक्राभ्यां दृष्टे(अ)शीतिर्गावो हृताः सगोपालाः
निशि सूचको(अ)द्य वक्ष्यति वार्त्तामिति पृच्छते ब्रूयात्।। ९
चन्द्रांगारकदृष्टे द्वादश नष्टा दिवा महिष्यस्ताः
आनेष्यन्ते सुहृदा द्वितीदिवसे(अ)पि नष्टैका।। १०

नाशयतो गां बलिनै चतुरश्रगतौ शशाङ्कदेवगुरू
एका निर्वर्त्तन्ते सा कपिला वर्ण्णेन निर्द्देश्या।। ११
अन्यच्चाभिज्ञानं त्रीणि च कार्षापणानि चोत्संगे
द्धे कूटके भवेतामेकं नष्टं विनिर्द्देश्यं।। १२
बुधगुरुशशिभिर्दृष्टे सुवर्ण्णकृतपरशुलोहरूपाश्च
प्रतिवेशिन्या नीता ब्राह्मण्या क्रूरकर्म्मिकया।। १३
सौराराभ्यां दृष्टे पात्रविशेषा हिरण्यकांस्यमयाः
लभ्यन्ते च विनष्टा गोपालैः सप्तमे दिवसे।। १४
गुरुशुक्रचन्द्रदृष्टे कटकं प्रावारकं च यन्नष्टं
पर्यङ्कगतं दास्या तुरंगनाम्न्या च तन्नीतं।। १५
गेहान्तरे चतुर्त्थे(अ)प्युदकसमीपे करण्डके निहितं
प्रावारकमुपरि जलाल्लंबितमिति पृच्छते ब्रूयात्।। १६
गुरुकुजदृष्टे मेषे स्वर्ण्णाकृतिगोळिकां च मञ्जुषां
हृत्वा कुब्जा दासी दत्तवती मित्रजनहस्ते।। १७
बुधसौराभ्यां दृष्टे जानियाज्जीर्ण्णकंबळं नष्टं
द्रामिळभूमिकसंज्ञौ वैश्या प्रतिवेशिनौ चोरौ।। १८
कांसीयभाजनानि च हिरण्यवस्त्राणि भौमबुधदृष्टे
लेखकहृतानि भाजनमेकं भिन्नं विजानीयात्।। १९
श्रवणं तव नक्षत्रं हस्तः पुत्रस्य रोहिणी च पितुः
अतिबाध्यते शिरो(अ)स्य त्रस्यति कालेन चेति वदेत्।। २०
गुरुकुजयोरुच्चगयोर्मेषे च विलग्नमुपयाते
राजाभिषेकभाण्डं नष्टं दुःखेन तल्लभ्यं।। २१
सौम्यग्रहसंयुक्ते शशिजे लभ्येत नष्टमिति वाच्यं
आग्नेययुते सौम्ये न चास्ति लाभो विनष्टस्य।। २२
उच्चाश्रितयोर्गुर्वर्क्कजयोरंबरसुवर्ण्णरत्नानि
लोहं च हृतं दास्या गर्भिण्या विस्मृतं गेहे।। २३
गुरुसौम्यावुच्चगतौ मेषविलग्ने(अ)श्वनाशमथ कुरुतः
लभसे विदिशं गत्वा त्वमिति ब्रूयात्तु पृच्छन्तं।। २४
शुक्रार्क्काभ्यां दृष्टे कनकप्रावारकंबळादर्शान्
दिवसत्रयेण नष्टांश्चोरो(अ)र्प्पयतीति वक्तव्यं।। २५

इन्दुगुरुभ्यां दृष्टे भार्याभरणं विनष्टमजलग्ने
विप्रप्रतिवेशिकया दास्या मुषितं विजानीयात्।। २६
लग्नस्य पूर्व्वभागे विप्रेणोद्योगकारिणा व्याळे
स्यात् क्षत्रियेण मध्ये सरीसृपेणान्त्यगे नीतं।। २७
शुक्रे पूर्व्वविभागे रजको मध्याश्रिते तु वणिजकः
लग्नान्तगते शुक्रे प्रमदा चोरीति वक्तव्यं।। २८
राशिप्रमुखे शशिजे शबरी मध्याश्रिते शिरोरक्षः
प्रेषणकृत्तु बुधे(अ)न्त्ये स्तेनो निर्द्दिश्यतां सततं।। २९
लग्नाद्ये चन्द्रयुते चोरं राजाश्रितं विजानीयात्
मध्ये(अ)ग्गनावसाने हर्त्तास्य तु कारुको भवति।। ३०
उदयाद्ये भौमयुते बालो मध्ये कविः समाहर्त्ता
दासो(अ)न्त्यगते वाच्यो भवनैः सर्व्वैः क्रमश्चायं।। ३१
यज्जातयो ग्रहा ये ते चोच्चगता वदन्ति तज्जातिं
तद्वल्स्वराशिनीचाश्रितास्तयो(अ)न्यत्र तद्धीनां।। ३२
चतुरश्रचतुष्टयगैस्त्रिकोणनिलयैर्ग्रहैरथ क्रूरैः
दृष्टे ब्रूयान्नष्टं विनष्टमित्यन्यथा सौम्यैः।। ३३
सौम्यैरुच्चालयगैर्नो नश्यति मित्रदृष्टे च
सौम्यैरपि नीचस्थैर्विनष्टमुच्चाश्रितैररिभिः।। ३४
लग्नं मेषसमानं चतुष्पदस्था ग्रहा निरीक्षन्ते
जनयन्ति चतुष्पादं द्विपदे चायं क्रमो ज्ञेयः।। ३५
शुक्रश्चतुष्पदस्थः कुरुते गामर्क्कजो बलीवर्द्दान्
सुरगुरुरस्तोपगतः कुरुते तुरगाश्रयां चिन्तां।। ३६
गौरिति जांगलराशौ जलचरभवने विनिर्द्दिशेन्महिषीं
द्विशरीरे(अ)श्वं ब्रूयाल् सरीसृपर्क्षे चतुष्पदिनः।। ३७
दृष्टे सरीसृपस्थैः सरीसृपाख्यैर्ग्रहैरलङ्कारः
सिंहगतैरप्येतैर्दृष्टे कांस्यं हिरण्यश्च।। ३८

त्रिंशाध्यायः

नष्टं चतुष्पदं स्याद् वृषलग्ने शुक्रदर्शने वस्त्रं
ताम्रं सुरगुरुदृष्टे बुधेन मणिभाजनं ज्ञेयं।। १

सौरेण काललोहं शशिना स्त्री दिनकृता हिरण्याख्यं
मूर्द्धाभरणं पृथिवीसुतेन कटिभूषणञ्चैव।। २
सौरगुरुभ्यां दृष्टे हिरण्यमपि काचकं ततो विद्यात्
गुरुशुक्राभ्यां दृष्टे सधातुताम्रेण तद्वाच्यं।। ३
भौमशनैश्चरदृष्टे नारीमुखभूषणानि तानि स्युः
शशिशुक्राभ्यां दृष्टे चामीकरयुक्तवस्त्राणि।। ४
शुक्रदिवाकरदृष्टे काञ्चनकृतभाजनं हिरण्यं च
शेषेणोच्चादिविधिर्व्याख्यातः सर्व्वभवनेषु।। ५
पुरुषौ नरराशिगतौ रविशशिपुत्रौ नपुंसकौ स्त्र्यक्षे
गुरुरविभौमाः पुरुषाः पुरुषालयगा न सन्दिग्धाः।। ६
सर्व्वत्र शुक्रचन्द्रौ स्त्रीभावौ सर्व्वभावचिन्तायां
पल्वलकूपनदीनां चरभवनादौ प्रभू ज्ञेयौ।। ७
गान्धर्व्वदूतलेखकनारीप्रतिहारिशिल्पिमिथुनानां
आभरणानि विलग्ने मिथुनस्यैतानि बुधदृष्टे।। ८
भृगुणा वस्त्रं भूमेः सुतेन कनकं यमेन लोहं स्यात्
कनकं गुरुणा रविणा चतुष्पदं वस्त्रमुडुपतिना।। ९
यमबुधदृष्टे ज्ञातं सुवर्ण्णमितरैर्बुधेन मिथुनगतैः
वाच्यं ग्रहैः प्रमाणं प्रवेशरूपालयाकारैः।। १०
कर्क्किकण्युदयं प्राप्ते ह्यारामोद्यानभूमियातस्य
नष्टं कनकाभरणं दास्या मुषितं जलाभ्याशे।। ११
शशिनेक्षिते कुळीरे जलगतमथ तत्र संस्थिते(अ)भ्युदयात्
पुष्पसमीपे भोज्ये सुहृदां तु समागते पतितं।। १२
शुक्रेण युते नार्या यमेन दास्या द्विजेन रवियोगे
गुरुणा सुहृदा मुषितं शशिजेन तु सूपकारेण।। १३
उदके भृगुणा युक्ते शुष्कतटाके(अ)र्कभौमसंयुक्ते
उद्याने बुधयुक्ते स्नानगृहे चन्द्रसंयुक्ते।। १४
शशिवीक्षणे हिरण्यं बुधेन सह वीक्षणेन मणिमुक्ते
लोहोपस्करमसितेनाच्छादनमाह शुक्रेण।। १५
हिबुके निधानमुदये कनकं मेषूरणे हिरण्यं स्यात्
जामित्रे चोपस्करमाहुर्ग्रहवर्ज्जिते मुनयः।। १६

सिंहास्याद्ये लग्ने कनकं मध्ये हिरण्यमिति विद्यात्
आच्छादनं तृतीये ग्रहरहिते सर्व्वदा वाच्यं।। १७
कनकं ताम्रं रजतं मणिरायसकांस्यपात्रसीसानि
आदित्यभौमसुरगुरुबुधयमशशिशुक्रसंयुक्ते।। १८
सूर्यः पश्यति यदि वा कनकं सौरस्तु हारकं हरितं
सौम्येन महारजतं शुक्रेणाच्छादनं चैव।। १९
भवति हिरण्यं शशिना भौमेन तु काञ्चनं प्रभूतं स्यात्
दृष्टे चार्क्केण युते कनकं सिंहे विजानीयात्।। २०
आदित्यशुक्रदृष्टे चामीकरमंबरं च निर्द्देश्यं
बुधदृष्टे तु सुवर्ण्णं मुक्तामणयस्तथा ज्ञेयाः।। २१
चन्द्रेक्षिते हिरण्यं वस्त्रं यमवीक्षिते त्वयोभाण्डं
सोपस्करमथ गुरुणा कुजेन कनकायुधं वाच्यं।। २२
शिल्पचतुष्पदमुक्ताकाञ्चनमणिवज्रहाटका धनुषि
गुरुणा कनकं शिल्पं हिरण्यमप्युशनसा युक्ते।। २३
हैरण्यायुधकनकं रविणा सौरेण चापि भाण्डमिति
जीर्ण्णा स्त्री दासी वा चापविलग्ने गते राहौ।। २४
सौम्येन सर्व्वशिल्पं मौक्तिकमणयश्च सूरिभिः कथिताः
कवचं धनुश्च दन्तं चर्म्म च भौमेन कनकं च।। २५
मकरोदये सुवर्ण्णं भूषणशयनीयसीसवस्त्राणि
स्थानारकूटलोहककांस्यत्रपुराणि जानीयात्।। २६
सौरेण युते क्षेत्रे बुधसौराभ्यां च पानकद्रव्यं
भोजनभाण्डं विद्याच्छुक्रार्किकभ्यां समायुक्ते।। २७
रविरविजाभ्यां युक्ते सुवर्ण्णमथवा चतुष्पदं चैव
चन्द्रशनैश्चरयुक्ते काञ्चनवस्त्रे समादेश्ये।। २८
दैवाकरिभौमाभ्यां युक्ते तपनीयमाह ताम्रं च
गुरुरविजैः संयुक्ते वस्त्रं चामीकरं चैव।। २९
भृगुदिनकरपुत्राभ्यां नष्टं वस्त्रं वदन्ति कनकं च
काचकृताभरणानां विनाशमाचक्षते मुनयः।। ३०
कालायसमर्क्कसुते चन्द्रे वज्रं बुधे तु मणिभाण्डं
शुक्रे गन्धद्रव्यं भौमे लाक्षा रवौ तु कनकं च।। ३१

उच्चे स्थित्वा पश्येत् गुरुश्चो नीचमाश्रिते महिषी
नीचोच्चगतेनापि च यमेन दृष्टे भवेन्महिषी।। ३२
अत्युच्चस्थानगते चन्द्रे नीचे(अ)म्गना विनिर्द्दिष्टा
उच्चे नीचे वापि च शुक्रे योषित् सदा वाच्या।। ३३
अश्वतरी स्याल् सौम्ये नीचे वोच्चे(अ)थवाश्रिते नियतं
संयोगे द्विशरीरे चरे तु बाह्यः स्थिते चान्तः।। ३४
मेषवदष्टमराशिर्वृषेण तुल्यस्तुलाधरः फलतः
कन्या मिथुनेन समा धनुषा मीनो मृगेण घटः।। ३५
स्वांशं चन्द्रः पश्येद्धिरण्यमादित्यदर्शने ताम्रं
गुरुवीक्षणे सुवर्ण्णं भृगुणा नार्यार्क्किणा कांस्यं।। ३६
शुक्रांशे गुरुदृष्टे नारीपुरुषौ तु ताम्रमर्क्केण
चन्द्रात्मजेन वाहनमुडुपतिदृष्टे भवेद्वस्त्रं।। ३७
गुरुभौमाभ्यां दृष्टे सुवर्ण्णमुशनो(अ)म्शके विनिर्द्दिष्टं
आत्मांशकेन सुवर्ण्णं गुरुणा रविवीक्षिते कनकं।। ३८
शशिना दुकूलवस्त्रं भृगुभौमाभ्यां च काञ्चनं दृष्टे
भास्करसुतेन दृष्टे विरागभाण्डं च काष्ठकृतं।। ३९
भौमः स्वांशं पश्येत् कनकं सूर्यो गुरुश्च तत् कुरुते
इन्दुर्वस्त्रं कुरुते सौरस्ताम्रं भृगुर्नारीं।। ४०
स्वांशं वीक्षेतार्क्किकर्लोहं सूर्येक्षणेन करवाळं
चन्द्रेण मण्डलानि च गुरुणा दृष्टे बलीर्वर्दः।। ४१
शुक्रेक्षिते हिरण्यं बुधेन दृष्टे प्रवाळमिति वाच्यं
प्रवदन्त्याभरणानि च धरणीपुत्रेण सन्दृष्टे।। ४२

एकत्रिंशाध्यायः

वग्गाः कचटतपाद्या लोहितभृगुसौम्यजीवसौराणां
सूर्यस्याकाराद्याः शशिनो वर्ण्णा यकाराद्याः।। १

नष्टद्रव्येषु चोरेषु विज्ञातेषु चोराणां नामविज्ञापनार्थमक्षराणां ग्रहराशिषु संबन्ध उच्यते वग्गा इति। अवग्ग सूर्यस्य। अ, आ, इ, ई, उ, ऊ, ऋ, ॠ(लु), ए, ऐ, ओ, औ एते द्वादशाक्षराः सूर्यस्य भवन्ति। ऋ(लू), आ, अं, अः एते वर्ण्णा नामादौ न भवन्ति। तस्मादिदानीं न गृह्यन्ते। क, ख, ग, घ, ङ कुजस्य। च, छ, ज, झ, ञ शुक्रस्य। ट, ठ, ड, ढ, ण बुधस्य। त, थ, द, ध, न जीवस्य। प, फ, ब, भ, म शनेः। य, र, ल, व चन्द्रस्य। श, ष, स, ह, ळ, क्ष राहोः इति।।

मेषादौ द्वादशके चकारादीन् नियोजयेद्वर्ण्णान्
इत्येवं ब्रूवते(अ)न्ये परे तु लग्नादिमिच्छति।। २

अकारादीन् वर्ण्णान् मेषादिषु राशिषु संयोगजयेत्। कथमिति चेत् अ, आ, इ, ई, मेषस्य। उ, ऊ, ऋ वृषभस्य। ऋ, ॠ(लु), आ मिथुनस्य। ए, ऐ कर्क्कटकस्य। ओ, औ सिंहस्य। अं, अः कन्यायां। कवग्ग्र्यास्तुलायां। चवग्ग्र्याः वृश्चिकस्य। टवग्ग्र्याः धनुषः। तवग्ग्र्याः मृगस्य। पवग्ग्र्या कुंभस्य। य, र, ल, व मीनस्य। श, ष, स, ह, ळ, क्ष इति कन्यायाः। प्राहुराचार्याः। केचिल्लग्नादिषु द्वादशराशिषु अकारादीन् वदन्ति। न तत् कृष्णाचार्यस्य मतं। पूर्व्वोक्तग्रहवर्ण्णविधौ ओजराशिषु स्थितस्य कुजस्य प्रथमतृतीयपञ्चमावर्ण्णा अक्षरा इत्यर्थः। शेषाणां द्विभवनानामेवं योजयेत्। युग्मे स्थितस्य कुजस्य द्वितीयचतुर्थौ। सूर्यस्य चन्द्रमसश्चैतन्नास्ति, एकभवनाधिपत्यात्। उदितभागक्रमादक्षरो ग्राह्यः।।

मेषादिषु नवभागाः स्वेश्वरवर्ण्णाः क्रमेण समभिहिताः
वग्गे च परिसमाप्ते पूर्व्ववदारभ्यते भूयः।। ३

मेषादिषु राशिषु नवांशकः स्वेश्वरवर्ण्णा उक्ताः। मेषांशे मेषवदित्यर्थः। वग्गे परिसमाप्ते पूर्व्ववदकारादिः प्रारभ्यते मुनिभिः।।

वग्गाः स्वस्वामिपरांत्रिंशद्भाबेष्वनुक्रमात् काद्याः
राशेर्द्वादशभागे दिनकरभागः स्वरा भाव्याः।। ४

राशेर्द्वादशभागाः दिनभागाः स्वराः भाव्यः। त्रिंशद्भागेषु स्वस्वामिवर्ण्णाः काद्याः ग्राह्याः। राशिं विभज्य षट्सु षट्सु भागेषु ककाराद्याः वग्गाः ज्ञेयाः इति केचिद्वदन्ति। ओजयुग्मविधिना अक्षरव्यक्तिरिष्यते। सूर्याक्षरद्वादशभागात् क्रमादकाराद्या ज्ञेयाः। चन्द्रस्थितराशिं चतुर्धा विभज्य यस्मिन् चन्द्रः स्थितः तल्क्रमाद् यादीन् वदेत्। तथा षड्धा विभज्य राहोरिति।।

स्वांशे ग्रहे स्ववर्ण्णं तद्वर्ण्णयुतं परांशके कुरुते
पुरुषेषु महाप्राणाः ह्रस्वा नारीषु मृदुदीर्घाः।। ५

स्वांशके ग्रहे स्थिते स्ववर्ण्णमेव कुरुते। परांशके तद्वर्ण्णयुतं। संयुक्तमित्यर्थः। पुरुषेषु महाप्राणाः। घोषाक्षराः प्लुताः भवन्ति। त एव नारीषु अघोषा मृदुदीर्घाः भवन्ति। द्रव्यमित्यर्थः। कथं घोषाक्षरेषु अघोषाः। स्त्रीवाचित्वाद् कथं। असंस्कृतत्वाद्। प्रायेण जनाः मूढा असंस्कृतभाषिणः। तेषां वक्ष्ये प्राकृतलिपीन् - अ, आ, इ, ई, उ, ऊ, ए(लघु), ऐ(गुरु), ऐ, ओ(लघु), ओ(गुरु), औ सूर्यस्य। क, ङ कुजस्य। च, ञ भृगोः। ट, ण बुधस्य। त, न गुरोः। प, म मन्दस्य। र, य, ल, व चन्द्रस्य। ळ, ळ, ऱ, ऩ इति राहोरिति। कुजादीनां पूर्व्वार्द्धभागे पूर्व्वाक्षरं। अपरमाग्गें वग्गपञ्चमं। अन्ये पूर्व्ववत् ग्रहादीनां बलाधिकेन नामप्रथमाक्षरं रचयेत्। अंशकाधिपतौ बलयुते

संयोगाक्षरं भवतीति।।

होरामारूढं वा यावन्तो(अ)त्र ग्रहा निरीक्षन्ते
यावन्तो वा केन्द्रान्तरेषु वर्ण्णास्तु तावन्तः।। ६

प्रश्नलग्नं प्रष्टा आरूढराशिं वा बलयुतं यावन्तो ग्रहाः पश्यन्ति, यावन्तो वा केन्द्रान्तरेषु वर्ण्णास्तु तावन्तः। यावत्संख्या ग्रहास्तिष्ठन्ति तावत्संख्या वर्ण्णा ग्राह्याः। बहुषु चोरेषु उक्तैः प्रश्नकारैर्नामानि वदेत्।।

अथवा शङ्कुच्छायानिहतं केन्द्रं भवेद् ग्रहैः क्रमशः
गणयेच्छेषं रविकुजभृगुबुधगुरुसौरशशिन इति।। ७

अथवा प्रश्नकाले उदयगतिराशिं ताल्क्कालीकृत्य तल्क्कालां शङ्कुच्छायां गुणित्वा ग्रहैः सप्तभिर्विभजेत्। तच्छेषं क्रमेण गणयेद्रविकुजभृगुबुधगुरुसौरशशिनः। ततस्तस्य वर्ग्गो ग्राह्यः।।

विषमे चैवं युग्मे रविकुजयमजीवसौम्यभृगुचन्द्राः
एवं वर्ग्गानयनं वर्ग्गच्छिन्नो भवेद्वर्ण्णः।। ८

विषमराशावुक्तं। युग्मराशौ रविकुजशनिजीवसौम्यभृगुचन्द्राः क्रमाद् ग्राह्याः। यदवशेषितस्तदन्त्यवर्ण्णश्चोरनामाद्यक्षरः।।

केन्द्रेषु चतुर्षेवं कृत्वा बलपूर्व्वकेण नामाद्यं
रचयेदक्षरपंक्तिं ग्रहगृहयोगं समालोक्य।। ९

चतुर्षु केन्द्रेष्वेवं गुणहारौ। शेषं गृह्णीयात्। पूर्व्ववदोजयुग्मे ज्ञात्वा गणयेदित्यर्थः। अयं तु विशेषः - चतुर्ण्णां केन्द्राणां पूर्व्वं बलाधिको ग्राह्यः। ततस्त्रयाणां बलाधिकः। तयो द्वयोरपि केन्द्रेषु ग्रहयुक्तेषु तद्ग्रहाक्षरमपि गृह्णीयात्। ततो राशिवर्ण्णमपि। आद्याक्षरं पूर्व्वं कृत्वा पश्चाद् ग्रहराशिभिर्बलाधिकैश्चोरनामाक्षराणि गृह्णीयात्। एवं चोराणां नामानि तत्तल्लक्षणैरन्यान् चिह्नान् ज्ञात्वा वदेत्। येन राशिना यत्र स्थितेन ग्रहेण वा चोरनामाद्यक्षरं परिगृह्यते तस्य राशेर्नवमराशौ चोरस्य पितुर्नामाक्षरं भवति। ततस्तल्केन्द्रबलक्रमादन्येषां नामाक्षराश्च ग्राह्याः। एवं भ्रातृपुत्रकळत्रादिषु ज्ञेया इत्यर्थः।।

द्वात्रिंशाध्यायः

अत्यर्थानतिप्रकीर्ण्णान् होराशास्त्रान्तरेभ्य उद्धृत्य
ग्रथितमिदं परमार्थं होराशास्त्रं समासेन।। १

होराशास्त्रेभ्य अतिप्रकीर्ण्णानत्यर्थानवश्यान् प्रधानान् गृहीत्वा इदं शास्त्रं समासेन रचितमित्यर्थः।।

इति संक्षेपो(अ)शक्यो ज्ञातुं ह्यतिविस्तरो मतिं हन्ति
युक्तप्रमाणयुक्त्या कृतमिदमुभयं परित्यज्य।। २

इति परिसमाप्तौ संक्षेपं शास्त्रं। यद्युतिविस्तरं स्याद् दुर्धियां मतिं हन्ति। युक्तप्रमाणयुक्त्या व्यवहारक्षमं कृतं। उभयमतिलघुतामतिगुरुतां च त्यक्त्वा आचार्येण सुरचितमिति।।

दातव्यमपापेभ्यो निपुणमतिभ्यः प्रशान्तशीलेभ्यः
शुभदिवसे गुरुलग्ने चन्द्रे मृदुशीघ्रवर्ग्गस्थे।। ३

अपापेभ्यः शिष्येभ्यः निपुण बुद्धिभ्यः प्रशान्तशीलेभ्य इदं शास्त्रमवश्यं दातव्यं। साधुवृत्तेभ्य इत्यर्थः। शुभदिवसे सुमुहूर्त्ते गुरूदये चन्द्रे बुधांशकस्थे तत्र प्रारभ्यते इदमिति।।

बलिहोमगन्धपुष्पैरादित्यादीन् ग्रहान् समभ्यर्च्च्य
प्रारंभ्यमिदं शास्त्रं विधिवत्कृत्वा गुरोः पूजां।। ४

आदित्यादिग्रहान् बलिहोमगन्धपुष्पादिभिः समभ्यर्च्च्य संपूज्य विधिवत् गुरोः पूजां कृत्वा इदं शास्त्रं प्रारभ्यते येन तेन सर्व्वार्थाः साध्यन्ते।।

विधिवन्मन्त्राः पठिता भवन्ति सर्व्वार्थसाधका लोके
एवं सफलं शास्त्रं भवति हि विधिपूर्व्वकं पठितं।। ५

यथा महामन्त्राः विधिवत्पठिता लोके सर्व्वार्थसाधका धर्म्मार्थकाममोक्षसाधका भवन्ति तथेदं शास्त्रं विधिपूर्व्वकं पठितं सफलं भवति हि। अन्यधा ह्यन्यथा भवति। तस्माद् ग्रहादिपूजा कर्त्तव्या।।

सर्व्वस्यादेशस्य तु लाभालाभादिकस्य पर्याप्तां
एवं सुगृहीतमिदं जनयति हि यशो(अ)र्थसिद्धिं।। ६

सर्व्वस्य लाभालाभादिकस्य जयाजयस्य। इदं विधिवत् सुगृहीतं सर्व्वं जनयति। यशो(अ)प्यर्थसिद्धं च। तस्माद्यत्नात् ग्राह्यमित्यर्थः।।

व्याकरणादिष्वंगेष्वधिगततत्त्वस्य दैवशास्त्रविदः
कृष्णस्य कृतिश्चिन्ताज्ञानं कृष्णीयमिति नाम्ना।। ७

व्याकरणादिशास्त्रेषु अंगशास्त्रेषु अधिगततत्त्वस्य विदिततत्त्वस्य दैवविदः सर्व्वशास्त्रनमस्कृत्य कृष्णाचार्यस्य कृतिः चिन्ताज्ञानमिदं शास्त्रं कृष्णीयमिति नाम्ना भवति।।

- कृष्णीयं समाप्तं -